ĀŚVALĀYANA-APARA-PRAYOGA

Edited by

ŚRI S. SUNDARESA SOMAYAJI

and

ŚRI VATTARAM SUNDARA SASTRI

Published by

SRI O. A. NARAYANASWAMI, B. A., B. L.,
Honorary Secretary,

FOR THE ADMINISTRATIVE COMMITTEE OF
THE TANJORE MAHARAJA SERFOJI'S SARASVATI MAHAL LIBRARY,
THANJAVUR.

Śaka 1888 A. D. 1967

Price: Rs. 1–50

ĀŚVALĀYANA-APARA-PRAYOGA

Edited by

ŚRI S. SUNDARESA SOMAYAJI

and

ŚRI VATTARAM SUNDARA SASTRI

Published by

SRI O. A. NARAYANAŚWAMI, B. A., B. L.,
Honorary Secretary,

FOR THE ADMINISTRATIVE COMMITTEE OF
THE TANJORE MAHARAJA SERFOJI'S SARASVATI MAHAL LIBRARY,
THANJAVUR.

Śaka 1888 A. D. 1967

Price: Rs. 1-50

॥ श्रीः ॥

॥ आश्वलायनापरप्रयोगः ॥

श्रीसुन्दरेशसोमयाजिना
वट्टारम् श्री सुन्दरशास्त्रिणा च
संशोध्य परिष्कृतम् ।

तञ्जापुरी सरस्वतीमहाल् ग्रन्थालयस्य निर्वाहकसमित्याः अवैतनिककार्यदर्शिना
बि. ए., बि. एल., बिरुदाङ्कितेन
श्री O. A. नारायणस्वाम्यार्येण
प्रकाशितम् ।

शकाब्दः 1888 क्रैस्तवाब्दः 1967

मूल्यम् रू १-५०

॥ शुभमस्तु ॥

भूमिका ।

वेदैकप्रमाणाः वैदिकमार्गशरणाः विद्वन्मणयः! विदितचरमेवैतत्तत्रभवतां यदनादेः कालात्प्रवर्तमाने प्रवर्धमाने चास्मिन् संसारचक्रे जनिमतां आध्यात्मिकाधिदैविकाधिभौतिकतापत्रय-तप्तानां सर्वेषां तनुभृतां स्वत एव पुरुषार्थसंपादने प्रवृत्तिस्समुज्जृम्भत इति । स च पुरुषार्थः द्वेधा विभक्तः दृष्टः अदृष्टश्चेति । वेदेषु प्रतिपाद्यमानस्यापि दृष्टस्य पुरुषार्थस्य संपादने मानवो न वेदमपेक्षते । नहि जातमात्रशिशुः स्तन्यपानाय वेदमीक्षते । अतः वेदमधीत्यैव मानवः अदन-क्रियायां प्रवर्तेते इति विप्रतिषिद्धमेतत् । परन्तु अदृष्टे पुरुषार्थे वेदा एव प्रमाणमित्यत्र न कापि संशीतिः ॥

तादृशो वेदः कर्मकाण्डत्वेन उपासनाकाण्डत्वेन ज्ञानकाण्डत्वेन च त्रेधा विभक्तो भवति । तैस्सर्वैरपि विभागैः पुरुषार्थत्वेन प्रतिपादितः मोक्ष एक एव । स च मोक्षः ज्ञानेनैकेनैव साध्यत इति ज्ञानस्य प्राधान्यमुक्तम् । तथापि तद्ज्ञानसाधने साधने भवतः कर्मोपासने इति कर्मणोऽपि मुख्यत्वमप्रतिहतमेव । तादृशं च कर्म श्रौतस्मार्तवृद्धसंप्रदायादिना बहुविधमपि गहनमिव वनं दुस्तरणं भवति । किंतु प्रमाणभूतैर्ग्रन्थविशेषैस्सम्यक् ज्ञातं कर्म कुर्वन्नेव तदुदितफलं प्राप्तुं शक्नोति । काशीं जिगमिषुः कश्चिद्रामेश्वरं प्रति यदि गच्छेत् तदा नहि स्वाभीष्टं स्थानं प्राप्नोति । अतः इदं निर्णीतं भवति यत् सम्यक् ज्ञातमेव कर्म तत्तत्प्रामाणिकोपदिष्टेन विधिनानुष्ठितं सत् विशिष्टफलं विधास्यतीति । अभ्यर्हिते वेदे परस्परविरोधवन्ति कर्माणि यदि श्रूयन्ते–यथा उदिते जुहोति, अनुदिते जुहोतीति, तदा तद्व्यवस्थायै यथा जैमिनिः द्वादशलक्षणीं पूर्वमीमांसां रचयामास यथा वा ज्ञानकाण्डपराणि वेदवाक्यानि ब्रह्मपर्यवसायीनि उत अन्यपराणीति सन्देहे तद्व्यवस्थायै भगवान्बादरायणः चतुरध्यात्मिकां उत्तरमीमांसामरचयत्, तथैव मन्त्रतन्त्राभ्यामनुष्ठीयमानेषु कर्मसु अपि विना संदेहं तन्निर्णयाय प्रयोगमार्गं व्यवस्थापयामासुः ॥

तत्तत्सूत्रकारैरुपदिष्टाः प्रयोगविशेषा एव तत्तत्सूत्रानुसारिणां कर्मणां प्रमाणं भवतीति हेतोः आश्वलायनापरप्रयोगविधिं नाम ग्रन्थमिमं यथामति संशोध्य प्रकटीकृतवन्तः स्मः । ग्रन्थमिमं न केवलं आश्वलायनसूत्रानुसारिण एव अपितु सूत्रान्तरानुसारिणोपि गृह्णीयुः तेन स्वयमधीत्याध्यापन-कर्मणि च प्रवृत्ताः अन्यानपि प्रवर्तयेयुरिति आशास्महे ॥

एवं परोपकारित्वेन प्रकटीकृतोऽयं ग्रन्थः सर्वेषामपि वैदिकानां वेदमार्गानुयायिनां लौकिकानामपि प्रमोदमुत्पाद्य आदरणीयतां च भजेत् इति दृढं विश्वसिमः। एवं नित्यनैमित्तिक-कर्मानुष्ठानेन चित्तशुद्धिं सम्पाद्य सर्वे निरतिशयनिरवधिकनित्यानन्दमनुभवेयुरिति भगवन्तं चन्द्रशेखरं प्रार्थयामहे ॥

इत्थं पण्डितसेविनौ,

सुन्दरेशसोमयाजी ।

वट्टारं सुन्दरशास्त्री ।

INTRODUCTION

Ritualism has a very significant part to play in any religion. With their liturgical, disciplinary, purificatory and symbolical value, rituals are inviolable aids to religious advancement, although their importance has been sometimes overrated by mistaking them as the end and not the means and by allowing the form to overide the spirit. From the prenatal to the post-mortem stage of a soul's sojourn in this world, a regular chain of sacraments has been prescribed by the Hindu scriptures.

In this booklet is presented to the reading public interested in the ritualistic literature of the Vedic religion and to the priests officiating in the conduct of religious ceremonies an authentic version of the *Āśvalāyana Apara Prayoga.* It is a compilation of the procedural details and the hymns employed in the conduct of the obsequial ceremonies to be performed for the departed souls in accordance with the traditions followed by the adherents of *Āśvalāyana Sūtra.* These ceremonies are believed to contribute to the comfort of the soul in its post-mortem journey and also to the welfare of the survivors by securing for them the benediction of the departed ancestors. They are at the same time considered to win for the performer the grace of God.

It is our fervent hope that this and the other publications of works on similar subjects from our library will be availed of mainly by the people engaged in the priestly profession to understand aright the traditional version of the Prayoga and to keep the practice of priest-craft in its pristine purity. It is also hoped that it will be of use to the general readers, as well, who are interested in the study of the sacramental aspect of Hindu religion.

To the editor of this book, Sri S. Sundaresa Somayaji, we are doubly beholden, firstly for his presentation to this library of the original palm leaf manuscript of this work preserved by his ancestors and secondly for the labours he has undertaken to edit the work for our Journal. Our thanks are due, in no less measure, to his collaborator, Sri Vattaram Sundara Sastrigal, for having shared the editorial responsibility.

T. M. S. S. M. Library,
Thanjavur; 7-3-67.

O. A. NARAYANASWAMI,
Honorary Secretary.

शुभमस्तु

॥ आश्वलायनापरप्रयोगः ॥

आचान्तविश्वविज्ञानं प्राचामपि विपश्चिताम् ।
आश्वलायनमेवाहं वन्दे सूत्रकृतं मुदा ॥ १ ॥

आचम्य प्राणानायम्य स्नानं कारयित्वा मन्त्रस्नानं वा विभूतिस्नानं कारयित्वा शुद्धवस्त्रं धारयित्वा ऊर्ध्वपुण्ड्रं त्रिपुण्ड्रं वा धारयित्वा सालग्रामतीर्थं प्राशयित्वा भूमिं गोमयेनोपलिप्य दक्षिणाग्रान्दर्भानास्तीर्य प्रज्ञावांश्चेत् स्वयमेव संकल्प्य अशक्तश्चेत् पुत्रादयः। पूर्वोक्त एवंगुण-विशिष्टायां शुभतिथौ मम अनाद्यविद्यावासनया प्रवर्तमाने अस्मिन्महति संसारचक्रे विचित्रैः कर्मभिः (विचित्राभिः कर्मगतिभिः) विचित्रासु नानायोनिषु (पुनः पुनः अनेकधा जनित्वा) अनेकधा जन्मानि प्राप्य इदानीं मनुष्यजन्म प्राप्तवतः मम इहजन्मनि जन्मान्तरेषु बाल्ययौवन-कौमारवार्धकेषु जाग्रत्स्वप्नसुषुप्त्यवस्थासु रहसि प्रकाशे च मनोवाक्कायकर्मेन्द्रियव्यापारैः मया कृतानां पापानां अवस्थात्रये च अज्ञानतो ज्ञानतश्च अकामतः कामतो वा संभावितानां पापानां अपनोदनार्थं मम जन्माभ्यासात् जन्मप्रभृत्येतत्क्षणपर्यन्तं मध्ये वर्तिनि काले मनोवाक्कायकर्मभिः कामक्रोधलोभमोहमदमात्सर्यैः मनोबुध्यहङ्कारचित्तैः त्वक्चक्षुःश्रोत्रजिह्वाघ्राणैः वाक्पाणिपादपायू-पस्थैः ज्ञानतोऽज्ञानतश्च संभावितानां पापानां अज्ञानतस्सकृत्कृतानां अज्ञानतोभ्यस्तानां ज्ञानतोभ्य-स्तानां ज्ञानतोऽज्ञानतश्च अत्यन्ताभ्यस्तानां निरन्तराभ्यस्तानाञ्चिरकालाभ्यस्तानां प्रकाशकृतमहापातक-चतुष्टयव्यतिरिक्तानां रहसिकृतब्रह्महत्यादिमहापातकानां प्रकाशकृतमहापातकानां दिष्टरूपव्रतदेशिक-रूपपातकानां संकलीकरणानां मलिनीकरणानां अपात्रीकरणानां जातिभ्रंशकराणां प्रकीर्णकानां एवं नवानां नवविधानां सर्वेषां पापानां च पूर्वजन्मार्जितपापानां निवृत्त्यर्थं च ज्ञानतोऽज्ञानतश्च सकृत्कृतानां ज्ञानतोऽज्ञानतश्च चिरकालेषु निरन्तराभ्यस्तानां बहूनां बहुविधानां सर्वेषां पापानां अपनोदनार्थं प्रायश्चित्तं प्राजापत्यकृच्छ्रप्रत्याम्नायं यथाशक्तिहिरण्यं कावेरीस्नानरूपेण करिष्ये। 'हिरण्य-गर्भगर्भस्थं हेम बीजं विभावसोः। अनन्तपुण्यफलदमतश्शान्तिं प्रयच्छ मे' इदं प्राजापत्यकृच्छ्र-प्रत्याम्नायं यथाशक्तिहिरण्यं नानागोत्रेभ्यः ब्राह्मणेभ्यस्तेभ्यस्तेभ्यस्संप्रददे न मम ॥ एवं गुणविशिष्टायां पुण्यतिथौ पितुः अक्षय्यपुण्यलोकावाप्त्यर्थं गवादिदशदानानि करिष्ये ॥

॥ दशदानश्लोकाः ॥

गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ।
तस्मादस्याः प्रदानेन अतश्शान्तिं प्रयच्छ मे ॥

सर्वसस्याश्रया भूमिः वराहेण समुद्धृता ।
अनन्तसस्यफलदा अतश्शान्तिं प्रयच्छ मे ॥

तिलाः पापहरा नित्यं विष्णोर्देहसमुद्भवाः ।
तिलदानादसह्यं मे पापं नाशय केशव ॥

हिरण्यगर्भगर्भस्थं हेम बीजं विभावसोः ।
अनन्तपुण्यफलदं अतश्शान्तिं प्रयच्छ मे ॥

कामधेनोस्समुद्भूतं सर्वक्रतुषु संस्थितम् ।
देवानामाज्यमाहारः अतश्शान्तिं प्रयच्छ मे ॥

धन्यं करोषि दातारं इहलोके परत्र च ।
प्राणिनां जीवनं धान्यमतश्शान्तिं प्रयच्छ मे ॥

श्रेष्ठं सर्वरसानां च मनःप्रीतिकरं शुभम् ।
गुडं कल्याणकृद्यस्मादतश्शान्तिं प्रयच्छ मे ॥

पितृप्रीतिकरं चाशु रजतं पापनाशनम् ।
सर्वभूतप्रियकरमतश्शान्तिं प्रयच्छ मे ॥

रसानामग्रजं श्रेष्ठं लवणं बलवर्धनम् ।
सर्वस्वादुकरं यस्मादतश्शान्तिं प्रयच्छ मे ॥

मम (पितुः) अक्षय्यपुण्यलोकावाप्त्यर्थं इदं सदक्षिणाकं सताम्बूलं महाविष्णुप्रीतिं कामयमानस्तुभ्यमहं संप्रददे ॥

अथवा प्रकारान्तरम्

गोभूतिलहिरण्याज्यवासोधान्यगुडानि च ।
रौप्यं लवणमित्याहुर्दशदानान्यनुक्रमात् ॥

दशदानप्रत्याम्नायं यथाशक्तिहिरण्यं महाविष्णुप्रीतिं कामयमानस्तुभ्यमहं संप्रददे ॥ न मम ॥

अथ उत्क्रान्तिगोदानम्

अद्यपूर्वोक्त एवंगुणविशेषणविशिष्टायां पुण्यतिथौ (अस्मत्) पितुः गोत्रस्य शर्मणः (पञ्चानां) प्राणानां उत्क्रमणसमये सुखोत्क्रमणसिध्यर्थं उत्क्रान्तिगोदानं करिष्ये। गामलंकृत्य महाविष्णुस्वरूपस्य ब्राह्मणस्य इदमासनं सकलाराधनैः स्वर्चितम् ॥

अथ श्लोकः

अत्युत्क्रान्तौ प्रवृत्तस्य सुखोत्क्रमणसिद्धये ।
तुभ्यं संप्रददे धेनुमिमां उत्क्रान्तिसंज्ञिकाम् ॥
गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ।
तस्मादस्याः प्रदानेन अतश्शान्तिं प्रयच्छ मे ॥

इमामुत्क्रान्तिसंज्ञिकां गां सवत्सां सदक्षिणाकां सताम्बूलां (अस्मत्पितुः) प्राणोत्क्रमणसमये सुखोत्क्रमणसिद्धिं महाविष्णुप्रीतिं कामयमानस्तुभ्यमहं संप्रददे ॥

अथ तिलदानम्

अद्यपूर्वोक्त एवंगुणविशिष्टायां पुण्यतिथौ (अस्मत्पितुः) समस्तपापक्षयार्थं तिलपात्रदानं करिष्ये ॥

तिलाः पापहरा नित्यं विष्णोर्देहसमुद्भवाः ।
तिलदानादसह्यं मे पापं नाशय केशव ॥

इदं तिलपात्रं सदक्षिणाकं सताम्बूलं पापहरमहाविष्णुप्रीतिं कामयमानस्तुभ्यमहं संप्रददे ॥

मुमुर्षुं शुद्धदेशे दक्षिणाग्रदर्भेषु दक्षिणशिरसमुत्तानं शाययित्वा तत्पुत्रस्संकल्प्य पितुः गोत्रस्य शर्मणः जन्मप्रभृत्येतत्क्षणपर्यन्तं मनोवाक्कायकृतसमस्तपापक्षयार्थं पुरुषस्य भगवतः नारायणस्य सामीप्यसिध्यर्थं नारायणसूक्तमन्त्रपठनं करिष्य इति संकल्प्य ॥

अथ कर्णमन्त्रप्रारम्भः

नानानं वा इत्यस्य सूक्तस्य शिशुः ऋषिः शर्यणावतियइन्द्रोस्सूक्तयोः कश्यप ऋषिः त्रयाणां पवमानसोमो देवता पंक्तिश्छन्दः नारायणप्रीत्यर्थे जपे विनियोगः ॥

नानानं वा उनो धियो विव्रतानि जनानाम्। तक्षारिष्टं रुतं भिषग्ब्रह्म सुन्वन्तमिच्छतीन्द्रायेन्दो परिस्रव। जरतीभिरोषधीभिः पर्णेभिश्शकुनानाम्॥ कार्मारो अश्मभिर्द्युभिर्हिरण्यवन्तमिच्छ-

तीन्द्रायेन्दो परिस्रव। कारुरहं ततो भिषगुपलप्रक्षिणीनना। नानाधियो वसूयवोनुगा इव तस्थिमेन्द्रायेन्दो परिस्रव। अश्वो वोळ्हा सुखं रथं हसनामुपमन्त्रिणः। शेपो रोमण्वन्तौ भेदौ वारिन्मण्डूक इच्छतीन्द्रायेन्दो परिस्रव ॥ १ ॥

शर्यणावति सोममिन्द्रः पिबतु वृत्रहा। बलं दधान आत्मनि करिष्यन्वीर्यं महदिन्द्रायेन्दो परिस्रव ॥ आपवस्व दिशां पत आर्जीकात्सोममीढ्वः ॥ ऋतवाकेन सत्येन श्रद्धया तपसा सुत इन्द्रायेन्दो परिस्रव। पर्जन्य वृद्धं महिषं तं सूर्यस्य दुहिताभरत्। तं गन्धर्वाः प्रत्यगृभ्णन् तं सोमे रसमादधुरिन्द्रायेन्दो परिस्रव। ऋतं वदन् ऋतद्युम्न सत्यं वदन् सत्यकर्मन्। श्रद्धां वदन् सोमराजन् धात्रा सोमपरिष्कृत इन्द्रायेन्दो परिस्रव। सत्यमुग्रस्य बृहतः संस्रवन्ति संस्रवाः। संयन्ति रसिनो रसाः पुनानो ब्रह्मणा हर इन्द्रायेन्दोपरिस्रव ॥ २ ॥

यत्र ब्रह्मा पवमान छन्दस्यां उ वाचं वदन्। ग्राव्णा सोमे महीयते सोमेनानन्दं जनयन्निन्द्रायेन्दो परिस्रव। यत्र ज्योतिरजस्रं यस्मिन् लोके स्वर्हितं। तस्मिन्मां धेहि पवमानामृते लोके अक्षित इन्द्रायेन्दो परिस्रव। यत्र राजा वैवस्वतो यत्रावरो धनं दिवः। यत्रामूर्यह्वतीरापस्तत्र माममृतं कृधीन्द्रायेन्दो परिस्रव। यत्रानुकामं चरणं त्रिनाके त्रिदिवे दिवः। लोका यत्र ज्योतिष्मन्तस्तत्र माममृतं कृधीन्द्रायेन्दो परिस्रव। यत्र कामानि कामाश्च यत्र ब्रध्नस्य विष्टपम्। स्वधा च यत्र तृप्तिश्च तत्र माममृतं कृधीन्द्रायेन्दो परिस्रव। यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते। कामश्च यत्राप्ताः कामास्तत्र माममृतं कृधीन्द्रायेन्दो परिस्रव ॥ ३ ॥

य इन्दोः पवमानस्यानुधामान्यक्रमीत्। तमाहुस्सुप्रजा इति यस्ते सोमाविधन्मन इन्द्रायेन्दो परिस्रव। ऋषे मन्त्रकृतां स्तोमैः कश्यपोद्वर्धयन् गिरः। सोमं नमस्य राजानं यो जज्ञे वीरुधां पतिरिन्द्रायेन्दो परिस्रव। सप्तदिशो नानासूर्यास्सप्तहोतार ऋत्विजः। देवा आदित्या ये सप्त तेभिस्सोमाभिरक्षन इन्द्रायेन्दो परिस्रव। यत्ते राजञ्छृतं हविस्तेन सोमाभिरक्षणः। अरातीवामानस्तारीन्मोच नः किंच नाम मदिन्द्रायेन्दो परिस्रव ॥ ४ ॥

यत्र तत्परमं पदं विष्णोर्लोके महीयते। देवैस्सुकृतकर्मभिस्तत्र माममृतं कृधीन्द्रायेन्दो परिस्रव। यत्र तत्परमाव्यं भूतानामधिपतिः। भावभावी च योगी च तत्र माममृतं कृधीन्द्रायेन्दो परिस्रव। यत्र गङ्गा च यमुना यत्र प्राची सरस्वती। यत्र विश्वेश्वरो (सोमेश्वरो) देवस्तत्र माममृतं कृधीन्द्रायेन्दो परिस्रव ॥ ५ ऋक् २२ ॥

प्राणनिर्याणपर्यन्तं मुमूर्षोर्दक्षिणकर्णे 'श्रीमन्नारायण वासुदेव गोविन्द वैकुण्ठ मुकुन्द कृष्ण। श्रीकेशवानन्त मुकुन्द विष्णो मां त्राहि संसारभुजङ्गदष्टं' इति जपित्वा प्राणोत्क्रमणानन्तरं तत्पुत्रास्सर्वे स्नात्वा दक्षिणातिलदर्भान् गृहीत्वा ॥

समस्तसंपत्समवाप्तिहेतवः समुत्थितापत्कुलधूमकेतवः ।
अपारसंसारसमुद्रसेतवः पुनन्तु मां ब्राह्मणपादपांसवः ॥

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

अथ वपनम्

प्राचीनावीती अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य पैतृमेधिकविधिना और्ध्वदैहिकसंस्कारार्थं प्रेतत्वविमोचनार्थं अद्य प्रथमेहनि स्वगृह्योक्तविधानेन प्रेतसंस्कारयोग्यतासिध्यर्थं मम शरीरशुध्यर्थं च वपनं कारयितुं (योग्यतासिद्धिं) कर्तुं अधिकारसंपदस्त्विति भवन्तो ब्रुवन्तु ॥ अधिकार-संपदस्त्विति ब्राह्मणा वदेयुः ॥

सव्यं ओं ओं अद्यपूर्वोक्त एवंगुणविशेषणविशिष्टायां पुण्यतिथौ प्राचीनावीती पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेतत्वविमुक्त्यर्थं अद्य प्रथमेहनि स्वगृह्योक्तविधानेन और्ध्वदैहिकविधिना प्रेतसंस्कारयोग्यतासिध्यर्थं मम शरीरशुध्यर्थं च वपनं कारयिष्य इति संकल्प्य । वपनाधिकार-योग्यतासिध्यर्थं कृच्छ्रत्रयाण्याचरिष्ये । हिरण्यगर्भगर्भस्थं + प्रयच्छ मे इदं कृच्छ्रत्रयप्रत्याम्नायं यत्किञ्चित् हिरण्यं महाविष्णुप्रीतिं कामयमानस्तुभ्यमहं संप्रददे ॥ इति कृच्छ्राचरणं कृत्वा एकदर्भं गृहीत्वा शिरसि निधाय –

मेरुमन्दरतुल्यानि पापानि विविधानि च ।
केशानाश्रित्य तिष्ठन्ति तस्मात्केशान्वपाम्यहम् ॥

आत्मनश्शुद्धिकामो वा पितुर्मे मुक्तिहेतवे ।
वपनं कारयिष्यामि तीरे ब्राह्मणसन्निधौ ॥

इति मन्त्राभ्यां कनिष्ठपूर्वकं कण्ठादुपरि वापयेयुः ॥

अथ स्मृतिः

वपनं दहनात्पूर्वं कुर्युः पुत्रा मृतेहनि ।
अकृत्वा क्रियते यत्तु तत्सर्वं निष्फलं भवेत् ॥

दक्षिणातिलदर्भान् गृहीत्वा समस्तसंपदिति प्रदक्षिणीकृत्य अशेषे हे परिषत् मदीयां विज्ञापनामवधार्य मया समर्पितां इमां दक्षिणां स्वीकृत्य प्राचीनावीती मम पितुः गोत्रस्य शर्मणः

प्रेतस्य प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिने प्रथमेहनि अक्षय्यपुण्यलोकावाप्त्यर्थं और्ध्वदैहिकसंस्कारं कर्तुं योग्यतासिद्धिमनुगृहाण ॥

अथ ऊर्ध्वोच्छिष्टप्रायश्चित्तम्

पितुः गोत्रस्य शर्मणः प्रेतस्य मरणकाले ऊर्ध्वोच्छिष्ट अधोच्छिष्टांतरिक्षास्नानमरणपर्युषितमरणखट्वामरण इत्येतेषां षण्णां निमित्तानां पापानां अपनोदनार्थं प्रायश्चित्तं निश्चित्य मामनुगृह्णन्तु भवन्तः अनुगृहाण परिषत् । यजमानस्य विज्ञापनामाकर्ण्य दक्षिणां गृहीत्वा प्रतिनिमित्तं कृच्छ्रत्रयमाचर इति परिषदुक्तिः । सव्यं ओं ओं अद्यपूर्वोक्त एवङ्गुणविशेषणविशिष्टायां पुण्यतिथौ प्राचीनावीती अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य मरणकाले संभावितानां ऊर्ध्वोच्छिष्टादिषण्णां निमित्तानां अपनोदनार्थं षण्णिमित्तप्रायश्चित्तं करिष्य इति संकल्प्य,

हिरण्यगर्भगर्भस्थं हेम बीजं विभावसोः ।
अनन्तपुण्यफलदमतश्शान्तिं प्रयच्छ मे ॥

धन्यं करोषि दातारमिहलोके परत्र च ।
तस्मात्प्रमुच्यते धान्यमतश्शान्तिं प्रयच्छ मे ॥

कावेरी तुङ्गभद्रा च कृष्णवेण्या च गौतमी ।
भागीरथी च विख्याता पञ्च गङ्गाः प्रकीर्तिताः ॥

इदं स्वर्णधान्यदानप्रत्याम्नायं यथाशक्ति हिरण्यं श्रीकृष्णप्रीतिद्वारा अस्मत्पितुः षण्णिमित्तदोषनिवृत्तिं कामयमानस्तुभ्यमहं संप्रददे । षण्णिमित्तदोषनिवृत्तिरस्तु । मम शरीरशुद्धिरस्तु । और्ध्वदैहिकसंस्कारसिद्धिरस्त्विति भवन्तो ब्रुवन्तु ॥

तिथिवारदोषे शान्तिः

तिथौ भूमिप्रदानं स्यात्त्रिपादर्क्षे हिरण्यकम् ।
वारदोषे च वस्त्रं स्यात् दत्वा कर्म समाचरेत् ॥

एकाशीतिपलं कांस्यं धनिष्ठापञ्चके तथा ।
तत्तारादिवमुद्दिश्य दद्याद्दोषापनुत्तये ॥

प्रतिपत्पर्वषष्ठ्येकादश नन्दाः प्रकीर्तिताः ।
द्वितीया सप्तमी चाद्वादशी भद्राः प्रकीर्तिताः ॥

भानुभौमगुरुशुक्रशनिर्वासरदोषभाक् ।
द्विपात्त्रिपादनक्षत्रं धनिष्ठापञ्चकन्तथा ।
एतेषु च मृते दानन्दद्यात्तद्दोषशान्तये ॥

सव्यं कर्ता संकल्प्य ओं ओं पुण्यतिथौ प्राचीनावीती अस्य पितुः गोत्रस्य शर्मणः प्रेतस्य नन्दायां भद्रायां वा मरणजनितदोषप्रायश्चित्तार्थं इतरेषामायुष्याभिवृध्यर्थं तिथिदेवताविष्णुदेवतामुद्दिश्य विष्णुप्रीत्यर्थं भूदानं करिष्य इति संकल्प्य,

सर्वसस्याश्रया भूमिः वराहेण समुद्धृता ।
अनन्तसस्यफलदा अतश्शान्तिं प्रयच्छ मे ॥

इदं तिथिदोषनिवृत्तिं इतरेषामायुष्याभिवृद्धिं कामयमानस्तुभ्यमहं संप्रददे ॥

नक्षत्रदोषनिवृत्त्यर्थं हिरण्यदानं करिष्ये इति संकल्प्य,

हिरण्यगर्भगर्भस्थं हेम बीजं विभावसोः ।
अनन्तपुण्यफलदमतश्शान्तिं प्रयच्छ मे ॥

इदं हिरण्यं नक्षत्रदेवताप्रीतिं कामयमानस्तुभ्यमहं संप्रददे ॥

धनिष्ठापञ्चकमरणप्रायश्चित्तम्

धनिष्ठापञ्चकदोषनिवृत्त्यर्थं (इतरेषामायुष्याभिवृध्यर्थं) नक्षत्राधिदेवताप्रीत्यर्थं कांस्यपात्रदानं करिष्य इति संकल्प्य,

यानि पापान्यनेकानि कामोत्थानि कृतानि वै ।
कांस्यपात्रप्रदानेन तानि नश्यन्तु मे सदा ॥

एकाशीतिपलसंमितकांस्यपात्रं वा तत्प्रत्याम्नायं वा हिरण्यं वा तन्नक्षत्रदेवताप्रीतिमितरेषामायुष्याभिवृद्धिं कामयमानस्तुभ्यमहं संप्रददे ॥

वारदोषप्रायश्चित्तम्

शनैश्चरादि अप्रशस्तवारेषु मृतदोषपरिहारार्थं शनैश्चरमुद्दिश्य वस्त्रदानं करिष्य इति संकल्प्य,

शीतवातोष्णसंत्राणं लज्जायाः रक्षणं परम् ।
देहालङ्करणं वस्त्रमतश्शान्तिं प्रयच्छ मे ॥

शनैश्चरप्रीतिं कामयमानस्तुभ्यमहं संप्रददे ॥

ओं ओं अद्य पूर्वोक्तएवंगुणविशेषणविशिष्टायां पुण्यतिथौ प्राचीनावीती पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिने प्रथमेहनि दहनसंस्कारद्वारा अक्षय्य-पुण्यलोकावाप्त्यर्थं और्ध्वदैहिकसंस्कारार्थं प्रेताग्निसंधानं करिष्य इति संकल्प्य ॥

पाठान्तरम्:– सव्यं ओं ओं अद्य पूर्वोक्तएवंगुणविशेषणविशिष्टायां पुण्यतिथौ प्राचनावीती पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेतत्व (विमोकार्थं) विमोचनार्थं अद्य प्रथमेहनि दहनसंस्कारद्वारा अक्षय्यपुण्यलोकावाप्त्यर्थं दहनादिदशाहपर्यन्तं पैतृमेधिकाख्यं कर्म (कर्तुं मुख्यकाले भूत्वाधिकारसंपदस्त्विति भवन्तो ब्रुवन्तु । अधिकारसंपदस्तु ॥) करिष्य इति संकल्प्य कृच्छ्रत्रयं कृत्वा ॥ ओं + तिथौ प्रेताग्निसंधानकाले तिथिवारनक्षत्रयोगकरणैः यो दोषस्समजनि तद्दोषपरिहारार्थं प्राजापत्यकृच्छ्रत्रयप्रत्याम्नायं यत्किञ्चित् हिरण्यदानं करिष्य इति संकल्प्य हिरण्यगर्भ + प्रत्याम्नायं यत्किञ्चिद्धिरण्यं महाविष्णुप्रीतिं कामयमानस्तुभ्यमहं संप्रददे ॥

अथाग्निमुखम्

शुचौ देशे गोमयेनोपलिप्य स्थंडिलं कृत्वा सकृदुल्लिख्य —

एह्यग्ने रहुगणपुत्रो गौतमोग्निस्त्रिष्टुप् अग्न्याह्वाने विनियोगः । एह्यग्न इह होता निषीदादब्धः सुपुर एता भवा नः । अवतां त्वा रोदसी विश्वमिन्वे यजामहे सौमन-साये देवान् । आग्निमावाहयामि ॥

जुष्टोदमूना वसुश्रोग्निस्त्रिष्टुप् । अग्निनमस्कारे विनियोगः । जुष्टोदमूना अतिथिर्दुरोण इमन्नो यज्ञमुपयाहि विद्वान् ॥ विश्वा अग्ने अभियुजो विहत्या शत्रूयतामाभराभोजनानि ॥

भूर्भुवस्सुवरोमित्यग्निं प्रतिष्ठाप्य । प्रेतहस्ते एकां समिधं दत्वा तत्समिधमाधाय प्रेतसमीपे तत्पत्नीमुपवेश्य ॥

प्रत्यवरोह जातवेद इमं तं स्वर्गाय लोकाय नयतु प्रजानन् । प्रजां पुष्टिं रयिमस्मासु धेहि प्रेताहुतिं चास्य जुषस्व स्वाहा । इति समिधमग्नौ प्रक्षिप्य ॥

चत्वारि शृङ्गा वामदेवो जातवेदाग्निस्त्रिष्टुप् अग्निमूर्तिध्याने विनियोगः । चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्तहस्तासो अस्य । त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश ॥

सप्तहस्तश्चतुःशृङ्गः सप्तजिह्वो द्विशीर्षकः ।
त्रिपात्प्रसन्नवदनः सुखासीनः शुचिः स्मृतः ॥

स्वाहां तु दक्षिणे पार्श्वे देवीं वामे स्वधां तथा ।
बिभ्रद्दक्षिणहस्तैस्तु शक्तिमन्नं स्रुचं स्रुवम् ॥

तोमरं व्यजनं वामेर्घृतपात्रं तु धारयन् ।
मेषारूढं जटाबद्धं गौरवर्णं महौजसम् ॥

धूम्रध्वजं लोहिताक्षं सप्तार्चिःसर्वकामदम् ।
आत्माभिमुखमासीनं एवं ध्यायेद्धुताशनम् ॥

एष हि देवः प्रदिशोनु सर्वाः पूर्वो हि जातस्स उ गर्भे अन्तः । स विजायमानः स जनिष्यमाणः प्रत्यङ्मुखास्तिष्ठतु विश्वतोमुखः ॥ एह्यग्ने प्राङ्मुखो देव प्रेतसंमुखो भव ॥

अथान्वाधानम्

अत्र अयाश्चेति प्रधानदेवतामाज्यद्रव्येण एवं साङ्गेन कर्मणा सद्यो यक्ष्ये । अग्ने-रप्रदक्षिणं सकृत्परिसमूह्य । प्रागग्रं दक्षिणाग्रं परिस्तीर्य सकृत्पर्युक्ष्य । अग्नेर्दक्षिणतः प्रोक्षणीं स्रुचं आज्यस्थालीमेकैकश आसाद्य एकदर्भपवित्रेण प्रोक्षणीमुत्तानं कृत्वा तिलान्प्रक्षिप्याद्भिः पूरयित्वा उत्पूय पात्राण्युत्तानानि कृत्वा तेनोदकेन पात्राणि सकृत् प्रोक्ष्य तत्पवित्रमाज्यपात्रे निधाय आज्यमासिच्य दक्षिणतोङ्गारान्निरूह्य तूष्णीमाज्यसंस्कारं कृत्वा स्रुक्स्रुवौ संमृज्याग्निमलंकृत्य हस्ताभ्यां पालाशद्वयं गृहीत्वा द्वादशगृहीतेनाज्यं पूरयित्वा ॥

अयाश्चेत्यस्य मन्त्रस्य विमद ऋषिः अयाळग्निर्देवता पदपंक्तिश्छन्दः औपासनप्रधान-आज्यहोमे विनियोगः ॥

अयाश्चाग्नेस्यनभिशस्तीश्च सत्यमित्त्वमया असि । अयासावयसा कृतोयासन् हव्यमूहिषे-ऽयानो धेहि भेषजं स्वाहा । अग्नये अयस इदम् । सर्वप्रायश्चित्तार्थं व्याहृतिहोमं करिष्य इति संकल्प्य । भूः स्वाहा अग्नय इदम् । भुवः स्वाहा वायव इदम् । स्वः स्वाहा सूर्यायेदं ।

A. 2.

ओंभूर्भुवःस्वः स्वाहा प्रजापतय इदम्। ततो द्वादशगृहीतेनाज्येन स्रुचं पूरयित्वा तूष्णीं हुत्वा परिसमूह्य पर्युक्ष्य। ततः औपासनं कुर्यात्। कृष्णपक्षेऽहनि मरणे प्रातराहुतिमारभ्य रात्रौ मरणे सायमाहुतिमारभ्य पक्षहोमवत् कुर्यात्। मरणदिनादिदशदिनपर्यन्तं दिवससंख्यया औपासनाग्नौ पृथक् हुनेत्। पर्वणि मृतश्चेत् स्थालीपाकं जुहुयात्। स्थालीपाकस्थाने पूर्णाहुतिरिष्यते इति प्रेताग्निसन्धानम्।

यतिव्रत्योः कपालाग्निस्तुषाग्निर्बालकन्ययोः।
विधुरं विधवां चैव दहेदुत्तपनाग्निना॥

विधवां विधुरं चैव उत्तपनाग्निना दहेत्। ब्रह्मचारिणां यतीनां तु कपालाग्निना दाहः। अनुपनीतं कन्यां च तुषाग्निना दहेत्॥

अथ निशिमरणपर्युषितदहनप्रायश्चित्तम्

ओं अद्यपूर्वोक्त एवंगुणविशेषणविशिष्टायां पुण्यतिथौ प्राचीनावीती पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिने प्रथमेहनि मरणकाले दहनकाले च निशामरणेन पर्युषितत्वेन यो दोषस्समजनि तद्दोषपरिहारार्थं कृच्छ्रत्रयाण्याचरिष्ये अथवा प्राजापत्यकृच्छ्रप्रत्याम्नायं यथाशक्ति हिरण्यदानं करिष्ये॥

हिरण्यगर्भगर्भस्थं हेम बीजं विभावसोः।
अनन्तपुण्यफलदमतश्शान्तिं प्रयच्छ मे॥

इदं प्राजापत्यकृच्छ्रप्रत्याम्नायं यथाशक्ति हिरण्यं महाविष्णुप्रीतिं कामयमानस्तुभ्यमहं संप्रददे॥

अथ दक्षिणायनकृष्णपक्षमरणप्रायश्चित्तम्

पितुः गोत्रस्य शर्मणः प्रेतस्य दक्षिणायनकृष्णपक्षमरणेन यो दोषस्समजनि तद्दोषपरिहारार्थं (प्राजापत्यकृच्छ्रप्रत्याम्नायं यत्किंचिद्धिरण्यदानं करिष्ये) कृच्छ्रत्रयाण्याचरिष्ये हिरण्यगर्भगर्भस्थं + इदं प्राजापत्यकृच्छ्रप्रत्याम्नायं यथाशक्ति हिरण्यं महाविष्णुप्रीतिं कामयमानस्तुभ्यमहं संप्रददे॥

सव्यं ओं ओं अद्य पूर्वोक्त एवंगुणविशेषणविशिष्टायां पुण्यतिथौ प्राचीनावीती पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिने प्रथमेहनि गोत्रं शर्माणं प्रेतं

औपासनाग्निना पैतृमेधिकेन विधिना संस्करिष्ये अहतं वास आदाय पादमात्रं प्रेतस्य समुखं (मुख-समीपे) आच्छाद्य तस्यावच्छेदशेषं पुत्रा गृहीत्वा स्वरक्षार्थमयःखंडं बध्वा अद्य पूर्वोक्त एवंगुण० प्राचीनावीती पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिने प्रथमेहनि मुखसमीपे स्त्रियाः पादसमीपे वस्त्रच्छेदनं करिष्य इति संकल्प्य अग्नेर्वर्म परिगोभिर्व्ययस्वसंप्रोर्णुष्व-पीवसा मेदसा च। नेत्त्वा धृष्णुर्हरसा जर्हृषाणोदधृग्वि धक्ष्यन् पर्यंखयातें। संकल्प्य पितुः गोत्रस्य शर्मणः प्रेतस्य और्ध्वदैहिक (संस्कारार्थं) योग्यतासिध्यर्थं द्वादशाहपर्यन्तं वासोधारणं करिष्य इति संकल्प्य आधीषमाणा इति यमः पितरस्त्रिष्टुप् वासोधारणे विनियोगः —

आधीषमाणायाः पतिः शुचा याश्च शुचस्य च वासोवायोवीनामावासांसि मर्मृजत्। वासोधारणं कुर्यात्॥

तं तु देवि नमस्तुभ्यं आयसेन समन्वितम्।
आद्वादशाहपर्यन्तं सर्वारिष्टं निवारय॥

उत्तरवाससं करोति शुक्लसूत्रेण तन्तुभिः पाणी पादांगुष्ठौ च बध्वा॥

उरुणसावित्यस्य मन्त्रस्य यमः पितरो जगती शवांगुष्ठबन्धने विनियोगः उरूणसा वसुतृपा उदम्बलौ यमस्य दूतौ चरतौ जनां अनु तावस्मभ्यं दृशये सूर्याय पुनर्दाता वसुमद्येह भद्रम्॥ वाहकान्वरयेत्। पितरं गोत्रं शर्माणं प्रेतं वहस्व वहस्व। एवं वरयित्वा आसंद्यां प्रेतं निधाय। पादादिशिरःपर्यन्तं वाससाच्छाद्य प्रेतं ऊर्ध्वमुखं नयेत्॥ परेयिवांसं यमः पितरस्त्रिष्टुप् वस्त्राच्छादने विनियोगः परेयिवांसं प्रवतो महीरनु बहुभ्यः पन्थामनुपस्पशानम्। वैवस्वतं सङ्गमनं जनानां यमं राजानं हविषादुवस्य॥

प्रभूतं बर्हिराज्यं च चमसं च स्रुवं तिलान्।
कमण्डल्वजिनं प्रेतं पुरोभागे नयेत्सुतः।

प्रभूतं बर्हिराज्यं स्रुवं च चमसं च तिलान् कृष्णाजिनं कमण्डलुमाज्यस्थालीं हिरण्य-शकलानि शमीशाखां खनित्रं तण्डुलांश्चाग्रतो नयेयुः।

सव्यं ओं ओं अद्यपूर्वोक्त एवंगुणविशेषणविशिष्टायां पुण्यतिथौ प्राचीनावीती पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिने पितरं गोत्रं शर्माणं प्रेतं औपासनाग्निना पैतृमेधिकेन विधिना संस्करिष्यामि औदुम्बर्यामासंद्यां वाहकाः कृष्णाजिनमास्तीर्य तत्र प्रेतमुत्तानं

प्राक्शिरसं शाययित्वा वस्त्रच्छेदशेषेण पादं समुखं आच्छाद्य निवीतिनो भूत्वा ग्रामस्याग्नेय्यां नैर्ऋत्यां वा श्मशानं नयेयुः पाणिः कर्ता पुरतः औपासनं नयेत्॥ प्रेतस्य पश्चादमात्या मुक्तशिखा अधःकृतः उपरिवाससो ज्येष्ठप्रथमाः कनिष्ठजघन्या गच्छेयुः।

प्रेतस्य पार्श्वयोरग्रे न गच्छेयुः कदाचन।
यस्मादग्रे गन्तॄणां आयुः क्षीणं पदे पदे॥

अन्ये च बान्धवाः पृष्ठदेशे गच्छेयुरागताः।

मार्गमध्ये प्रेतं त्रिवारं संस्थाप्य मुखं प्रोक्ष्यालोक्य नयेयुः। मार्गमध्ये प्रेतं भूमौ निधाय तन्मुखं प्रोक्ष्य अथालोक्य यत्ते यमं वैवस्वतं मनो जगाम दूरकं तत्त आवर्तयामसीह क्षयाय जीवसे पितः गोत्र शर्मन्प्रेत प्रथमाध्वनि एतत्तिलोदकमुपतिष्ठतु। यत्ते दिवं यत्पृथिवीं मनो जगाम दूरकं तत्त आवर्तयामसीह क्षयाय जीवसे पितः गोत्र शर्मन्प्रेत द्वितीयाध्वनि एतत्तिलोदकमुपतिष्ठतु। यत्ते भूमिं चतुर्भृष्टिं मनो जगाम दूरकं। तत्त आवर्तयामसीह क्षयाय जीवसे। पितः गोत्र शर्मन्प्रेत पथि मध्ये तृतीयाध्वनि एतत्तिलोदकमुपतिष्ठतु। एवं त्रिवारं कृत्वा दहनदेशं गच्छेयुः॥

यदिन्यपायतन्त्रम्

अग्नि(तपने)पतने कृच्छ्रत्रयं अग्निनाशे कृच्छ्रत्रयं कृत्वा वाहकविपर्यासं कुर्यादिति केचित्। एवं दहनदेशं गत्वा —

(अथाश्वलायनस्मार्तप्रदीपिकायां उत्तरभागे)

अथ श्लोकः

आसन्द्यामपि भग्नायां कृशानौ पतितेपि वा।
तत्पात्रभङ्गे रज्जूनां दाहे छेदेपि वा पुनः।
शवे निपतिते वापि प्रायश्चित्तं कथं भवेत्॥

आसन्दीभङ्गप्रायश्चित्तम्

एकद्वित्रिचतुः पञ्च षडेतानीत्यनुक्रमात्।
प्राजापत्यानि कुर्वीत पुनस्तन्त्रं समाचरेत्॥

इत्युक्तम् एतदादि कर्ता षोडशश्राद्धान्तमुत्तरवाससा सह प्राचीनावीत्येव कर्म कुर्यात्। अथ भूमिभागं खनयेद्दक्षिणाप्रवणं प्राग्दक्षिणायतमुद्बाहुपुरुषायामं पञ्चारत्निमात्रं तिर्यक्चतुररत्निमात्रं वा वितस्त्यन्तगेतदायतनमपेतवीत यमः पितरो यमश्च त्रिष्टुबित्युदकेन शमीशाखया त्रिरप्रदक्षिण-मायतनं परिमृजन्मन्त्रावृत्या त्रिःप्रोक्ष्य शाखां दक्षिणतो निरस्याप उपस्पृशेत्। अत्र केचित् मृत्योः पदं संकुशुको मृत्युस्त्रिष्टुबिति तन्मध्ये गर्तत्रयं आग्नेयापवर्गं खात्वा यमाय दहनपतये पितृभ्यः स्वधा नमः कालाय दहनपतये पितृभ्यः स्वधा नमः मृत्यवे दहनपतये पितृभ्यः स्वधा नमः इति मध्यगर्त-पुरस्सरं दक्षिणापवर्गं तिलोदकं निनयति इति।) पुनः प्रेताग्निसंधानं तत्सर्वं शुचौ देशे निधाय। बाह्वायामं खातं प्राग्दक्षिणायान्तं पञ्चारत्निमितिं तिर्यगधस्ताद्द्वादशांगुलं खात्वा वायव्याग्नेयान्तं गर्तत्रयं कुर्यात्॥

पादौ प्रक्षाल्याचम्य ओं ओं अद्य पूर्वोक्त एवंगुणविशेषणविशिष्टायां पुण्यतिथौ प्राचीनावीती पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिने प्रथमेहनि पितुः अक्षय्यपुण्यलोकावाप्त्यर्थं पैतृमेधिकहोमं करिष्य इति अथवा अंत्येष्टिहोमं करिष्य इति संकल्प्य शमीशाखां औदुम्बरशाखां वा गृहीत्वा अपेत वीत यमः पितरस्तृष्टुप्॥ अथ मन्त्रः—

अपेत वीत वि च सर्पतातोऽस्मा एतं पितरो लोकमक्रन्॥
अहोभिरद्भिरक्तुभिर्व्यक्तं यमो ददात्यवसानमस्मै॥

इत्युदकेन दर्भैश्शमीशाखया त्रिरप्रदक्षिणं प्रोक्ष्य शाखां दक्षिणतो निरस्याप उपस्पृशेत्। मृत्योः पदं संकुशुकोमृत्युस्त्रिष्टुप् गर्तत्रयखनने विनियोगः॥ अथ मन्त्रः—

मृत्योः पदं योपयन्तो यदैतद्राघीय आयुः प्रतरं दधानाः॥
आप्यायमानाः प्रजया धनेन शुद्धाः पूता भवत यज्ञियासः॥

गर्तेषु हिरण्यशकलं निधाय यमाय दहनपतये पितृभ्यः स्वधा नमः इति मध्यगर्ते। मृत्यवे दहनपतये पितृभ्यः स्वधा नमः इत्युत्तरगर्ते कालाय दहनपतये पितृभ्यः स्वधा नमः इति दक्षिणगर्ते हिरण्योदकं दत्वा काष्ठान् गायत्र्या प्रोक्ष्य इध्मचितिं कारयित्वा तस्यां बर्हिरास्तीर्य तस्मिन् कृष्णाजिनमूर्ध्वलोमास्तीर्य अग्नेरुत्तरतः प्रेतं नीत्वा (आरोहतायुरिति दमनोग्निस्त्रिष्टुप्) अथवा आरोहतायुरित्यस्य मन्त्रस्य दमनऋषिः अग्निर्देवता तृष्टुप्छन्दः प्रेतचित्यारोहणे विनियोगः। अथ मन्त्रः—

आरोहतायुर्जरसं वृणाना अनुपूर्वं यतमाना यतिष्ट इह त्वष्टा सुजनिमा सजोषा दीर्घमायुः करति जीवसे वः॥

इति मन्त्रेण प्रेतं आग्नेयाशिरसं वायव्यपादं चित्यां आसंद्यां सह निधाय चितेर्वायव्य-भागे औपासनाग्निं निधाय चितेरुत्तरतः पत्नीं संवेश्य इमा नारीस्संकुशो मृत्युस्त्रिष्टुप् पत्नीसंवेशने विनियोगः ॥ अथ मन्त्रः —

इमा नारीरविधवास्सुपत्नीराञ्जनेन सर्पिषा संविशन्तु अनश्रवोऽनमीवास्सुरत्ना आरोहन्तु जनयो योनिमग्ने ॥

चितावुपरि प्रेतस्य पत्नीं संवेश्य तां देवरश्शिष्यो वा उदीर्ष्वनारीस्संकुशुको पितृमेधा-स्त्रिष्टुप् पत्न्यवरोहणे विनियोगः । अथ मन्त्रः —

उदीर्ष्व नार्यभि जीवलोकं गतासुमेतमुपशेष एहि ॥
हस्तग्राभस्य दिधिषोस्तवेदं पत्युर्जनित्वमभिसंबभूव ॥

अनेन पत्नीमवरोहयेत् । अथ प्रेतस्य नासिकानेत्रकर्णरन्ध्रेषु हिरण्यशकलं निधाय प्रेतकळेबरे घृताक्ततिलानवकीर्य रज्जुं छित्वाऽऽसंदीं भित्वा अङ्गुष्ठबन्धनं छित्वास्ये तिलमिश्र-तण्डुलान्निक्षिप्याङ्गुष्ठबन्धनच्छेदनमन्त्रः —

धनुर्हस्तादाददानो मृतस्यास्मे क्षत्राय वर्चसे बलाय ॥
अत्रैव त्वमिह वयं सुवीरा विश्वास्पृधो अभिमातीर्जयेम ॥

इत्यङ्गुष्ठबन्धनं छित्वा अग्नेरुत्तरतोपवेश्य सकृदुल्लिख्य एह्यग्ने जुष्टोदमूनां मुखो भव ॥

अथान्वाधानम्

समिधमादाय अग्नये चितिरिध्मं प्रेतो हविः अग्निः कामो लोकोनुमतिश्च प्रधानदेवताः पञ्चम्युरासि स्वर्गो लोको देवता आज्यद्रव्येण अस्मिन्प्रतिष्ठापितेग्नौ सद्यो यक्ष्ये अग्निपरिसमूहन-परिषेचनपरिस्तरणानि चित्या सहाप्रदक्षिणं कृत्वाग्नेर्दक्षिणतः एकैकशः प्रोक्षणपात्रं स्रुवं चाज्यस्थालीं उत्तरतः चमसमासाद्य प्रोक्षणीमुत्तानं कृत्वा एकदर्भपवित्रं निधाय तिलानोप्य अप आसिच्य तूष्णीं सकृदुत्पूय तेनोदकेन पात्राण्यवोक्ष्य पात्राण्युत्तानानि कृत्वा प्रोक्ष्य तत्पवित्रं चमसपात्रे निधाय उदकमासिच्य तिलान्निक्षिप्य इममग्ने चमसमित्यस्य मन्त्रस्य दमन ऋषिः अग्निर्देवता त्रिष्टुप्छन्दः चमसानुमन्त्रणे विनियोगः (अथवा इममग्ने संकुशुको मृत्युस्त्रिष्टुप् इति पाठभेदः)॥
अथ मन्त्रः —

इममग्ने चमसं माविजिह्वरः प्रियो देवानामुत सोम्यानाम् । एष यश्चमसो देवपानस्तस्मिन्देवा अमृता मादयन्ते ॥

अनेन मन्त्रेण चमसमभिमन्त्र्य तत्पवित्रमाज्यपात्रे निधाय आज्यमग्नावधिश्रित्य ज्वलता तृणेनावद्युत्य दर्भाग्रं निक्षिप्य तेनैव ज्वलताऽप्रदक्षिणं सकृत्पर्यग्निंकृत्वा तूष्णीमुत्पूय पवित्रमग्नौ दक्षिणाग्रं निक्षिप्य स्रुवं च संमृज्य (सव्यं अन्वाधानप्रभृत्येतत्क्षणपर्यन्तं सर्वप्रायश्चित्तं होष्यामि ओं भूर्भुवःस्वस्स्वाहा । प्रजापतय इदं प्राचीनावीती) सव्यं जान्वाच्य जुहुयात् अग्नये स्वाहा अग्नय इदं । कामाय स्वाहा कामायेदं । लोकाय स्वाहा लोकायेदं । अनुमतये स्वाहा अनुमतय इदम् । तत उत्थाय सदर्भमुल्मुकं प्रेतस्य उरसि पञ्चमीमाज्याहुतिं ॥ अथ मन्त्रः—

अस्माद्वैत्वमधिजायथाः अयं त्वदधिजायतां पित्रे गोत्राय शर्मणे स्वर्गाय लोकाय स्वाहा । इति हुत्वा स्वर्गाय लोकायेदम् । चित्तमाज्यमासीत्स्वाहा वाग्वेदिरासीत् आधीतं बर्हिरासीत् केतो अग्निरासीत् विज्ञातमग्निरासीत् प्राणो हविरासीत् सामाध्वर्युरासीत् वाचस्पतिर्होतासीत् मन उपवक्तासीत् इति नवद्वारेषु नवाज्याहुतीर्हुत्वा ॥

चक्षुश्च श्रोत्रं च मनश्च वाक् च प्राणापानौ देह इदं शरीरं द्वौ प्रत्यञ्चावनुलोमौ विसर्गावेतं तं मन्ये दशयन्त्रमुत्तमम् । उरश्च पृष्ठश्च करौ च बाहुजङ्घे चोरू उदरं शिरश्च रोमाणि मांसं रुधिरास्थिमज्जमेतच्छरीरं जलबुद्बुदोपमम् ॥ प्रेतशरीरे तिलानवकीर्य ॥

धनिष्ठापञ्चकमरणप्रायश्चित्तम्

धनिष्ठापञ्चकमरणे हिरण्यशकलमास्ये विन्यस्य

वह वपां जातवेदः पितृभ्यो यत्रैतान्वेत्थ निहितां पराके । मेदसः कुल्या उपतां क्षरन्तु सत्या एता आशिषस्सन्तु कामैस्स्वाहा ॥

मन्त्रावृत्या त्रिवारमास्ये जुहुयात् ॥ अथ प्रकारान्तरम्—

देशकालौ संकीर्त्य मृतेह्नि धनिष्ठापञ्चकमरणसूचितवंशारिष्टनिरासार्थं पञ्चकविधिं करिष्य इति संकल्प्य ॥

दर्भाणां प्रतिमाः कार्याः पञ्चोर्णासूत्रवेष्टिताः ।
यवपिष्टेनानुलिप्ताः ताभिस्सह शवं दहेत् ॥

गन्धमाल्याद्यैः प्रतिमा अलंकृत्य दाहसमये प्रेतोपरि न्यसेत् ॥ प्रथमं शिरसि द्वितीयं नेत्रयोः तृतीयं वामकुक्षौ । चतुर्थं नाभौ पञ्चमं पादयोः । तदुपरि ताभ्यो नाममन्त्रैर्घृताहुतीर्जुहुयात् ॥ उदकधारां दत्वा । पञ्चकं तु — प्रेतवाहाय स्वाहा प्रेतवाहायेदम् ॥ १ ॥ प्रेतसखाय स्वाहा प्रेतसखायेदम् ॥ २ ॥ प्रेतपाय स्वाहा प्रेतपायेदम् ॥ ३ ॥ प्रेतभूमिपाय स्वाहा प्रेतभूमिपायेदम् ॥ ४ ॥ प्रेतहर्त्रे स्वाहा प्रेतहर्त्रे इदम् ॥ ५ ॥

यमाय सोमं सनुत यमाय जुहुता हविः । यमं ह यज्ञो गच्छत्यग्निदूतो अरं कृतः त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् स्वाहा त्र्यम्बकायेदम् ॥ इति मन्त्राभ्यां प्रतिमासु प्रत्येकं द्वे द्वे आहुतीर्जुहुयात् ॥ वह वपां जातवेदः + कामैस्स्वाहा जातवेदस इदम् । याञ्जनाः प्रतिनन्दन्ति तां धेनुमिवायतीं संवत्सरस्य या पत्नी ता नो अस्तु सुमङ्गलीरियं वधूस्स्वाहा । याञ्जनायेदम् । ततो विधिना प्रेतं दहेत् ॥ तिथिवारनक्षत्रेषु पुनर्दहेत् ॥ पुनर्दहनमन्त्रः -- अस्माद्वैत्वमधिजायथाः अयं त्वदधिजायतामग्नये वैश्वानराय स्वर्गाय लोकाय स्वाहा इत्येकामाज्याहुतिं अग्नौ जुहुयात् ॥ एतत्पुनर्दहनं । स्वर्गाय लोकायेदम् ॥ यो अग्निः क्रव्यवाहन इत्यस्य मन्त्रस्य यम ऋषिः पितरो देवता त्रिष्टुप् छन्दः अग्निप्रदानार्थे अग्निग्रहणे विनियोगः । यो अग्निः क्रव्यवाहनः पितॄन् यक्षदृतावृधः । प्रेदुहव्यानिवोचति देवेभ्यश्च पितृभ्य आ । अनेन मन्त्रेणाग्निमादाय ॥

क्रव्यादमित्यस्य मन्त्रस्य दमन ऋषिः अग्निर्देवता त्रिष्टुप्छन्दः अग्निप्रदाने विनियोगः ॥ अग्निप्रदानमन्त्रः — क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्ञो गच्छतु रिप्रवाहः । इहैवायमितरो जातवेदादेवेभ्यो हव्यं वहतु प्रजानन् ॥

अनेन मन्त्रेण उल्मुकं शिरोभागे निधाय प्रेतस्य पश्चिमभागे कर्ता प्राङ्मुखः स्थित्वा सव्यं ओं ओं अद्य पूर्वोक्त एवंगुणविशेषणविशिष्टायां पुण्यतिथौ प्राचीनावीती पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेतानुमन्त्रितहविस्समुत्थितधूममार्गेण ऊर्ध्वलोकप्राप्त्यर्थं प्रेतानुमन्त्रणं करिष्य इति संकल्प्य ॥

प्रेहि प्रेहि इति चतसृणां मन्त्राणां यम ऋषिः आद्ययोर्यमो देवता अन्त्ययोः श्वानौ देवते त्रिष्टुप्छन्दः दह्यमानप्रेतानुमन्त्रणे विनियोगः ॥

प्रेहि प्रेहि पथिभिः पूर्व्येभिर्यत्रानः पूर्वे पितरः परेयुः ।
उभाराजानास्वधयामदन्ता यमं पश्यासि वरुणं च देवम् ॥

सङ्गच्छस्व पितृभिः संयमेनेष्टापूर्तेन परमे व्योमन् ।
हित्वायावद्यं पुनरस्तमेहि सङ्गच्छस्व तन्वा सुवीराः ॥

अतिद्रवसारमेयौ श्वानौ चतुरक्षौ शबलौ साधुना पथा ।
अथापितॄन्सुविदत्रां उपेहि यमेन ये सधमादं मदन्ति ॥

यौ ते श्वानौ यमरक्षितारौ चतुरक्षौ पथिरक्षी नृचक्षसौ ।
ताभ्यामेनं परिदेहि राजन्स्वस्ति चास्मा अनमीवं च धेहि ॥

मैनमग्ने षण्णां दमनोग्निस्त्रिष्टुप् । अनुमन्त्रणे विनियोगः ॥ मैनमग्ने विदहो माभिशोचो मास्य त्वचं चिक्षिपो मा शरीरं । यदाशृतं कृणवो जातवेदोथेमेनं प्रहिणुतात्पितृभ्यः शृतं यदा करसि जातवेदोथेमेनं परिदत्तात् पितृभ्यः यदा गच्छात्यसुनीतिमेतामथा देवानां वशनीर्भवाति सूर्यं चक्षुर्गच्छतु वातमात्मा द्यां च गच्छ पृथिवीं च धर्मणा अपो वा गच्छ यदि तत्र ते हितमोषधीषु प्रतितिष्ठाशरीरैः । अजो भागस्तपसा तं तपस्व तन्ते शोचिस्तपतु तं ते अर्चिः । यास्ते शिवास्तन्वो जातवेदस्ताभिर्वहैनं सुकृतामुलोकम् । अवसृज पुनरग्ने पितृभ्यो यस्त आहुतश्चरति स्वधाभिः ॥ आयुर्वसान उपवेतु शेषस्सङ्गच्छतां तन्वा जातवेदः । यत्ते कृष्णश्शकुन आतुतोद पिपीलस्सर्प उत वा श्वापदः ॥ अग्निष्टद्विश्वादगदं कृणोतु सोमश्च यो ब्राह्मणां आविवेश ॥ ६ ॥

पूषा त्वेतश्च्यावयत्विति चतसृणां मन्त्राणां यम ऋषिः पूषा देवता अनुष्टुप्छन्दः अनुमन्त्रणे विनियोगः । पूषा त्वेतश्च्यावयतु प्रविद्वाननष्टपशुर्भुवनस्य गोपाः । सत्वैतेभ्यः परिददत्पितृभ्योग्निर्देवेभ्यस्सुविदत्रियेभ्यः । आयुर्विश्वायुः परिपासति त्वा पूषा त्वा पातु प्रपथे पुरस्तात् । यत्रासते सुकृतो यत्र ते ययुस्तत्र त्वा देवः सविता दधातु ॥ पूषेमा आशा अनुवेदसर्वास्सो अस्मां अभयतमेननेषत् स्वस्तिदा आघृणिस्सर्ववीरोप्रयुच्छन् पुर एतु प्रजानन् । प्रपथे पथामजनिष्ट पूषा प्रपथे दिवः प्रपथे पृथिव्याः । उभे अभिप्रियतमे सधस्थे आच पराच चरति प्रजानन् ॥ ४ ॥

उपसर्प मातरमिति चतसृणां मन्त्राणां संकुसुको पितृमेधस्त्रिष्टुप् । द्वितीया प्रस्तारपंक्तिः तृतीया त्रिष्टुप् चतुर्थी जगती अनुमन्त्रणे विनियोगः ॥

उपसर्प मातरं भूमिमेतामुरुव्यचसं पृथिवीं सुशेवां ऊर्णम्रदा युवतिर्दक्षिणावत एषा त्वा पातु निर्ऋतेरुपस्थात् ॥ उच्छ्वं च स्वपृथिविमानिबाधथास्सूपायनास्मै भवसूपवञ्चना माता पुत्रं यथा सिचाभ्येनं भूम ऊर्णुहि । उच्छ्वं च माना पृथिवी सुतिष्ठतु सहस्रं मितउपहिश्रयन्तां ते

गृहासो घृतश्चुतो भवन्तु विश्वाहास्मै शरणास्संत्वत्र । उत्तेस्तभ्नामि पृथिवीं त्वत्परीमं लोगं निदधन्मो अहं रिषम् । एतां स्थूणां पितरो धारयन्तु तेत्रायमस्सादनाते मिनोतु ॥ ४ ॥

सोम एकेभ्य इति पञ्चानां यमो भाववृत्तोनुष्टुप् प्रेतानुमन्त्रणे विनियोगः ॥

सोम एकेभ्यः पवते घृतमेक उपासते । येभ्यो मधु प्रधावति तांश्चिदेवापिगच्छतात् ॥ तपसा ये अनाधृष्यास्तपसा ये स्वर्ययुः । तपो ये चक्रिरे महस्तांश्चिदेवापिगच्छतात् । ये युध्यन्ते प्रधनेषु शूरासो ये तनूत्यजः । ये वा सहस्रदक्षिणास्तांश्चिदेवापिगच्छतात् । ये चित्पूर्वऋतसाप ऋतावान ऋतावृधः । पितॄन् तपस्वतो यम तांश्चिदेवापिगच्छतात् ॥ सहस्रणीथाः कवयो ये गोपायन्ति सूर्यम् । ऋषींतपस्वतो यमतपोजाँअपिगच्छतात् ॥

उरुणसावित्यस्य मन्त्रस्य यम ऋषिः त्रिष्टुप्छन्दः यमदूतो देवता अनुमन्त्रणे विनियोगः ॥ वरूणसावसुतृपा उदुम्बलौ यमस्य दूतौ चरतो जनाँअनु । तावस्मभ्यं दृशये सूर्याय पुनर्दाता वसुमद्येह भद्रम् ॥

यमाय सोमं यमो यमोनुष्टुप् । अनुमन्त्रणे विनियोगः । यमाय सोमं संनुत यमाय जुहुता हविः । यमं ह यज्ञो गच्छत्यग्निदूतो अरं कृतः ॥ २४ ॥ सर्वऋगन्तं ओङ्कारं वदेत् । एवं दह्यमानः प्रेतः सहैव धूमेन स्वर्गलोकं गमिष्यतीति विज्ञायते ॥

सव्यं ओं ओं पुण्यातिथौ प्राचीनावीती पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेतत्वविमोचनार्थं कुम्भच्छिद्रधारासमन्वितअक्षय्यपुण्यलोकावाप्त्यर्थं कलशछिद्रधाराभिस्सह ज्ञातिजनैस्सहाप्रदक्षिणं करिष्ये इति संकल्प्य (संकल्पं कृताकृतं) पूर्णकुम्भं दक्षिणेंसे निधाय –

वातास्ते वान्तु पथि पुण्यगन्धा मनस्सुखा गात्रसुखानुलोमाः ॥
त्वचस्सुखा मांससुखास्थिसौख्यं वहन्तु त्वा मरुतः सुकृतां यत्र लोकाः ॥

इमा आपो मधुमत्यः अस्मिन्ते लोक उपदुह्यन्तां अक्षीयमाणा स्वधा नमः । एवं द्वितीयपर्याये वातास्ते + यत्र लोकाः । इमा आपो मधुमत्यः अन्तरिक्षे ते लोक उपदुह्यन्तां अक्षीयमाणा स्वधा नमः ॥ तृतीयपर्याये वातास्ते + यत्र लोकाः । इमा आपो मधुमत्यः स्वर्गे ते लोक उपदुह्यन्तां अक्षीयमाणा स्वधा नमः ॥ इति त्रिवारमप्रदक्षिणं कृत्वा प्रेतशिरःसमीपे दक्षिणाभिमुखं स्थित्वा उदकुम्भं पृष्ठतो विसृजेत् ॥

पित्रे गोत्राय शर्मणे प्रेताय प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिने प्रथमेऽहनि दहनजनितदाहोपशमनार्थं इदं ते कपालोदकमुपतिष्ठतु इति पृष्ठतो विभज्य कपालशेषोदकं हृदये विसृजेत् ॥ दर्भयुग्मच्छेदनं कृत्वा इमे जीवास्संकुसुको मृत्युस्त्रिष्टुप् आत्मसंरक्षणार्थे जपे विनियोगः ॥

इमे जीवा विमृतैराववृत्रन्नभूद्भद्रा देवहूतिर्नो अद्य प्राञ्चो अगाम नृतये हसाय द्राघीय आयुः प्रतरं दधानाः ॥

इमं जीवेभ्यस्सङ्कुसुकोमृत्युस्त्रिष्टुप् आत्मसंरक्षणार्थे जपे विनियोगः । इमं जीवेभ्यः परिधिं दधामि मैषान्नुगादपरो अर्थमेतम् । शतं जीवन्तु शरदः पुरूचीरन्तर्मृत्युं दधतां पर्वतेन ॥ सूर्यं चक्षुर्गच्छतु वातमात्मा द्यां च गच्छ पृथिवीं च धर्मणा । अपो वागच्छ यदि तत्र ते हितमोषधीषु प्रतितिष्ठा शरीरैः । इति मन्त्रेण सूर्यमवलोकयेत् ॥ अनवेक्षमाणा नद्यादि उदकसमीपं गच्छेयुः ॥ उदकसमीपं गत्वा वाहकागमनानन्तरं पुत्राः दक्षिणाभिमुखाः प्राचीनावीतिनो भूत्वा जलं गत्वा सकृदुपमज्य जलादुत्तीर्य दक्षिणाभिमुखा भूत्वा पितः गोत्र शर्मन्प्रेत प्रेततृप्तिरस्त्विति वस्त्रं निष्पीड्य वासांसि निष्पीडयेयुः । वाहकाः स्नात्वा ब्राह्मणान् प्रदक्षिणीकृत्य हे सदस्याः असपिण्डशववहनशवदहनालङ्कारादिभिर्यो दोषस्समजनि तद्दोषपरिहारार्थं प्रायश्चित्तं विधीयताम् ॥ गङ्गास्नानं शिवदर्शनं गोग्रासम् ॥

कर्ता ब्राह्मणान्प्रदक्षिणीकृत्य सव्यं अशेषे हे परिषत् भवत्पादमूले मया समर्पितां इमां सौवर्णीं दक्षिणां यत्किंचिद्दक्षिणां यथोक्तदक्षिणामिव स्वीकृत्य प्राचीनावीती पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणकाले दहनकाले च तिथिवारनक्षत्रलग्नयोगकरणैः होरादिभिः सूचितो यो दोषस्समजनि तद्दोषपरिहारद्वारा मया कृतं और्ध्वदैहिकं कर्म यथाशास्त्रानुष्ठितं भूत्वा अक्षय्यपुण्यलोकावाप्तिरस्त्विति अनुगृहाण ॥

प्रथमदिनकृत्यं समाप्तम् ॥

अथ नित्यतिलोदकविधिरुच्यते

शिलापात्रप्रतिष्ठापनम्

पिण्डं तिलैर्विमिश्रितं कुर्याद्वा मुष्टिसंमितम् ।
आर्द्रामलकमात्रं तु शुक्लामादाय वै शिलाम् ॥

समस्तसम्पदिति + पादपांसवः । नमो ब्रह्मण्य + नमो नमः । तिलान्दर्भान् भूमौ निक्षिप्य प्राचीनावीती ॥ पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिने प्रथमेऽहनि कर्तव्यदहनजनितदाहतापतृष्णापिपासाक्षुदुपशमनार्थं प्रेताप्यायनार्थं शिलास्नान मृदास्नान तिलोदकवासोदकपिण्डप्रदानार्थं शिलापात्रप्रतिष्ठापनं कर्तुं मुख्यकालो भूत्वा मम अधिकारसंपदस्त्विति भवन्तो ब्रुवन्तु । कालश्च मुख्यकालोऽस्त्विति भवन्तो ब्रुवन्तु ॥

सव्यं ओं ओं अद्य पूर्वोक्त एवंगुणविशेषणविशिष्टायां पुण्यतिथौ प्राचीनावीती पितुर्गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिने प्रथमेऽहनि कर्तव्य आगामिद्वितीयेऽहनि कर्तव्यतृतीयेऽहनि कर्तव्य-पञ्चमेऽहनि कर्तव्य-षष्ठेऽहनि कर्तव्य-सप्तमेऽहनि कर्तव्याष्टमेऽहनि कर्तव्य-नवमेऽहनि कर्तव्य-दशमेऽहनि कर्तव्यदहनजनितदाह-तापतृष्णापिपासाक्षुदुपशमनार्थं शिलास्नानमृदास्नान-तिलोदकवासोदकपिण्डप्रदानार्थं शिलापात्रप्रतिष्ठापनं करिष्ये इति संकल्प्य तत्काले कृच्छ्राचरणं करिष्य इति संकल्प्य हिरण्यगर्भ + इदं प्राजापत्यकृच्छ्रत्रयप्रत्याम्नायं यत्किंचिद्धिरण्यं महाविष्णुप्रीतिं कामयमानस्तुभ्यमहं संप्रददे । शिलाप्रतिष्ठापनकाले गोमूल्यदशदानानि करिष्य इति संकल्प्य गोमूल्यदानं कृत्वा । शिलां दर्भैस्संवेष्ट्य निधाय भूमौ स्थापनं कृत्वा ॥

अथावाहनम् । पितरं गोत्रं शर्माणं प्रेतं मरणदिनादिदशाहपर्यन्तं (आयाहि प्रेत सौम्य गम्भीरैः पथिभिः पूर्वैः । प्रजामस्मभ्यं दधद्रयिं च दीर्घायुत्वं च शतशारदं च) अस्यां शिलायामावाहनमुपतिष्ठतु शिलां स्पृष्ट्वा ॥

प्राणप्रतिष्ठामन्त्रः

असुनीत इति द्वयोः बृहदुक्थः प्राणापानौ त्रिष्टुप् । प्राणप्रवेशार्थे जपे विनियोगः । असुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगम् । ज्योक्पश्येम सूर्यमुच्चरन्तमनुमते मृळयानः स्वस्ति । पुनर्नो असुं पृथिवी ददातु पुनर्द्यौर्देवी पुनरन्तरिक्षम् । पुनर्नस्सोमस्तन्वं ददातु पुनः पूषा पथ्यां३या स्वस्तिः इत्यावाह्य ॥

सव्यं ओं ओं अद्य पूर्वोक्तएवंगुणविशेषणविशिष्टायां पुण्यतिथौ प्राचीनावीती पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थं उत्तमलोकप्राप्त्यर्थं मरणदिने प्रथमेऽहनि पूर्वस्थूलशरीरत्यागमारभ्य आगामिदिव्यदेहप्राप्तिपर्यन्तं स्वकर्मलिप्तयातनाशरीरे वर्तमानदहनजनितदाहतापतृष्णापिपासाक्षुदुप-शमनार्थं प्रेताप्यायनार्थं शिलास्नानमृदास्नानतिलोदकवासोदकपिण्डप्रदानानि करिष्य इति संकल्प्य

तत्काले कृच्छ्राचरणं करिष्य इति संकल्प्य आदौ शिलाया अभ्यञ्जनमुपतिष्ठतु आदौ शिलायाः दहनजनिततापोपशमनार्थं आमलकतिलमिश्रितोदकैः स्नानमुपतिष्ठतु । शुक्लपक्षमरणे केशवादि-दामोदरान्तं कृत्वा कृष्णपक्षमरणे संकर्षणादिश्रीकृष्णान्तं कृत्वा सव्यं पुण्यतिथौ प्राचीनावीती पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिने प्रथमेहनि कर्तव्यदहनजनित-तापोपशमनार्थं मृदास्नानमहं करिष्य इति संकल्प्य । मृदमादाय ॥

अथ मन्त्रः—उदुत्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् । अङ्गादङ्गा-ल्लोम्नो लोम्नो जातं पर्वणि पर्वणि । यक्ष्मं सर्वस्मादात्मनस्तमिदं विवृहामि ते इति मन्त्रेण कर्ता शरीरे मृदमालिप्य स्नात्वा पितः गोत्र शर्मन् प्रेत प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिने प्रथमेहनि कर्तव्यएतन्मृदास्नानमुपतिष्ठतु[1] ॥

सव्यं अद्यपूर्वोक्तएवंगुणविशिष्टायां पुण्यतिथौ प्राचीनावीती पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिने प्रथमेहनि तृष्णोपशमनार्थं पिपासोपशमनार्थं च तिलोदक-वासोदकप्रदानानि करिष्य इति संकल्प्य । तिलोदकमादाय पितः गोत्र शर्मन्प्रेत प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिने प्रथमेहनि कर्तव्यतृष्णोपशमनार्थमेतत्तिलोदकमुपतिष्ठतु । एवं प्रतिदिनं दशवा (एकत्रिपञ्चसप्तैव नवरुद्रत्रयोदश सप्तदशैकोनविंशतिश्च शताञ्जलिः वा) तिलोदकानि दद्यात् । पितः गोत्र शर्मन् प्रेत प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिने प्रथमेहनि कर्तव्यदहनजनित-तृष्णोपशमनार्थं एतत् तिलोदकमुपतिष्ठतु ॥

अथ वासोदकम्

अस्मत्पितः गोत्र शर्मन् प्रेत प्रेततृप्त्यर्थं मरणदिने प्रथमेहनि कर्तव्यपिपासोपशमनार्थं एतद्वासोदकमुपतिष्ठतु । वासस्त्रिगुणीकृत्य शिलायामुदकं दद्युः । प्रतिदिनं पञ्च सकृद्वा ॥

अथ पिण्डप्रदानम्

ओं ओं अद्य पूर्वोक्तएवंगुणविशेषणविशिष्टायां पुण्यतिथौ प्राचीनावीती पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिने प्रथमेहनि दहनजनितक्षुदुपशमनार्थं शिरोग्रीवादि अवयवनिष्पत्त्यर्थं पिण्डप्रदानं करिष्य इति संकल्प्य पिण्डस्थाने एतद्दर्भासनमुपतिष्ठतु

1. अधिकपाठः–शरीरान्तःकरणशुद्ध्यर्थं मृदास्नानं ब्राह्मणद्वारा कारयिष्ये मृदास्नानफलस्वी-करणार्थं इमां दक्षिणां तुभ्यमहं संप्रददे इति ब्राह्मणाय दक्षिणां दत्वा ।

तदुपरि एतत्तिलोदकमुपतिष्ठतु अस्मत्पित्रे गोत्राय शर्मणे प्रेताय प्रेततृप्त्यर्थं शिरोग्रीवादि अवयवनिष्पत्त्यर्थं एष पिण्डः उपतिष्ठतु । पिण्डस्योपरि तिलोदकमुपतिष्ठतु । दर्भाच्छादनमुपतिष्ठतु अञ्जनाभ्यञ्जने उपतिष्ठेताम् । भोगनिष्पत्त्यर्थं ताम्बूलमुपतिष्ठतु वीर्यनिष्पत्त्यर्थं दक्षिणाः उपतिष्ठन्तु ॥

सव्यं ओं ओं अद्य पूर्वोक्तएवंगुणविशेषणविशिष्टायां पुण्यतिथौ प्राचीनावीती अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिने प्रथमेहनि अस्मत्पितरं गोत्रं शर्माणं प्रेतमुद्दिश्य मया कृतैः मरणदिने प्रथमेहनि कर्तव्यदहनजनितदाहतापतृष्णापिपाशाक्षुदुपशमनार्थं शिलास्नानमृदास्नानतिलोदकवासोदकपिण्डप्रदानैश्च अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्तिद्वारा प्रेततृप्त्यर्थं (निवृत्यर्थं) उपतिष्ठतु । दहनजनितदाहोपशमनमस्तु तापोपशमनमस्तु तृष्णोपशमनमस्तु पिपासोपशमनमस्तु क्षुदुपशमनमस्तु प्रेताप्यायनमस्तु प्रेततृप्तिरस्तु अत्र स्नाहि अत्रोपभुंक्ष्व अत्र जलं पिब इति जलसेचनं कुर्यात् । सव्यम्,

नारायण नमस्तेऽस्तु शङ्खचक्रगदाधर ।
अक्षय्यं पिण्डदानेन प्रेततृप्तिकरो भव ॥

अथ भोगशरीरोत्पत्तिः

पिण्डप्रदानलोपः स्यात् प्रेतानां नैव सर्वदा ।
भोगदेहस्य संपत्तिः पिण्डेनैव परत्र हि ॥

प्रथमेऽहनि यत्पिण्डं तेन मूर्धा प्रजायते ।
चक्षुश्श्रोत्रे नासिके च द्वितीयेहनि जायते ॥

भुजवक्षस्तनग्रीवा तृतीयेहनि जायते ।
नाभिस्थानं गुदं लिङ्गं चतुर्थेहनि जायते ॥

ऊरू च पञ्चमे स्यातां षष्ठे चर्म च निर्दिशेत ।
सप्तमे च सिरास्सर्वा जायन्ते नात्र संशयः ॥

अष्टमेहि तु पिण्डेन सर्वलोमान्यनन्तरम् ।
नवमे वीर्यं संपत्तिः दशमे क्षुत्परिक्षयः ॥

प्राचीनावीती इमं पिण्डं गृध्रवायसजलचरमुखैः शिलारूपिन् प्रेत उपभुंक्ष्वेति पिण्डं वायसेभ्यो दद्यात् । स्नात्वा गृहं गच्छेत् । दशाहमध्ये कर्तृस्थलादिविपर्यासे पिण्डे काकैरस्पृष्टे च प्रायश्चित्तम् ॥

नित्यविधिस्समाप्तः ॥

नग्नप्रच्छादनविधिः

अथ द्रव्याणि

वस्त्रं प्रावरणार्थं च तण्डुलाः प्रस्थपञ्चकाः ।
उदकुम्भं प्रसिद्धं च लोहपात्रं सदीपकम् ॥

कांस्यपात्रं दशपलं काञ्चनं पादमात्रकम् ।
तण्डुलार्धं तदर्धं वा घृतमात्रप्रचोदितम् ।
लवणं तिलमुद्गांश्च संपाद्याः प्रेततृप्तिदाः ॥

कर्ता सदक्षिणतिलदर्भानादाय सव्यं । समस्तसम्पत्समवाप्तिहेतवः + गोविन्दाय नमो नमः । प्राचीनावीती पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिने (दिनादारभ्य) अद्य प्रथमेहनि नग्नप्रच्छादनएकोद्दिष्टश्राद्धं कर्तुं मुख्यकाले भूत्वाधिकारसंपदस्त्विति भवन्तो ब्रुवन्तु । अधिकारसंपदस्तु । सव्यं अद्य पूर्वोक्त एवंगुणविशेषणविशिष्टायां पुण्यतिथौ प्राचीनावीती पितुर्गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थं मरणदिने प्रथमेहनि दहनजनितनग्नत्व-निवारणार्थं नग्नप्रच्छादनएकोद्दिष्टआमश्राद्धं एकोद्दिष्टविधानेन प्रेतोद्देशेन आमादिद्रव्येण आमपिण्ड-प्रदानेनाद्य करिष्ये । तत्काले कृच्छ्राचरणं करिष्य इति संकल्प्य हिरण्यगर्भगर्भस्थं + प्रयच्छ मे एकोद्दिष्टआमश्राद्धारंभकाले तिथिवारनक्षत्रयोगकरणैः यो दोषस्समजनि तद्दोषपरिहारार्थं प्राजापत्य-कृच्छ्रप्रत्याम्नायं महाविष्णुप्रीतिं कामयमानस्तुभ्यमहं संप्रददे एकदर्भकूर्चं भूमौ निधाय तिल-दर्भानादाय अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य + प्रथमेहनि नग्नप्रच्छादनएकोद्दिष्टआमश्राद्धे प्रेतार्थे अयं ते क्षणः उपतिष्ठतु । पितः शर्मन्प्रेत प्रेततृप्त्यर्थमुत्तमलोकावाप्त्यर्थं मरणदिने प्रथमेहनि प्रेतार्थे पाद्यमुपतिष्ठतु ॥

सव्यं ओं ओमद्यपूर्वोक्त एवंगुणविशेषणविशिष्टायां पुण्यतिथौ प्राचीनावीती पितुः गोत्रस्य शर्मणः प्रेतस्य + नि नग्नप्रच्छादनएकोद्दिष्ट आमश्राद्धे प्रक्रान्तं श्राद्धकर्म करिष्ये अपहताः असुराः रक्षांसि पिशाचाः ये क्षयन्ति पृथिवीमनु । अन्यत्रेतो गच्छन्तु यत्रास्य गतं मनः । त्रिकोणमण्डलं कृत्वा तिलदर्भानादाय उदीर्तां अवर उत्पर उन्मध्यमः प्रेत सौम्य असुं य इयाय अवृकऋतज्ञ सनोवतु प्रेतो हवे । सव्यं आमं गायत्र्या प्रोक्ष्य तत्सवितुः + प्रचोदयात् ॥

अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा ।
यः स्मरेत्पुण्डरीकाक्षं सबाह्याभ्यन्तरश्शुचिः ॥

श्राद्धार्थं संपादिताः पदार्थाः श्राद्धयोग्या भवन्त्विति भवन्तो ब्रुवन्तु । प्राचीनावीती । पितुः गोत्रस्य शर्मणः प्रेतस्य+आमश्राद्धे प्रेतार्थे इदन्ते आसनमुपतिष्ठतु । अयं ते क्षणः उपतिष्ठतु । दक्षिणाग्रं एकदर्भं न्यस्य तस्योपरि अर्घ्यपात्रं निधाय । तस्मिन्नेकदर्भं निधाय उत्तानं कृत्वा अप आसिञ्च्य शन्नोदेवीरभिष्टय आपो भवन्तु पीतये । शंयोरभिस्रवन्तु नः । तिलोसि सोमदेवत्यः गोसवे देवनिर्मितः । प्रत्नवद्भिः प्रत्त एहि प्रेत इमान् लोकान्प्रीणयाहि नः । तिलान्विकीर्य । पितः गोत्र शर्मन्प्रेत प्रेततृप्त्यर्थं + आमश्राद्धे प्रेतार्थे अर्घ्यमुपतिष्ठतु कूर्चे जलं निनीय अर्घ्यपात्रं छित्वा पृष्ठतो विसृजेत् ॥

इहलोकं परित्यज्य गतोसि परमां गतिम् ।
मनसा वायुरूपेण कुशे त्वां योजयाम्यहम् ॥

अर्चनमुपतिष्ठतु गन्धाः उपतिष्ठन्तु तिलाः उपतिष्ठन्तु आच्छादनार्थे वस्त्रमुपतिष्ठतु । सर्वोपचारार्थे सतिलदर्भमुपतिष्ठतु ॥

सव्यं कृत्वा । आमं गायत्र्याप्रोक्ष्य । ओंभूर्भुवस्सुवः+प्रचोदयात् प्राचीनावीती अप्रदक्षिणं जलं परिषिच्य । हस्तोदकं दत्वा पृथिवी ते पात्रं + श्रीविष्णो आमं रक्ष पितः गोत्र शर्मन्प्रेत एतत्ते आमं सपरिकरं पित्रे गोत्राय शर्मणे प्रेताय नग्नप्रच्छादनएकोद्दिष्टआमश्राद्धे इममामं सव्यं-जनं सोपस्करं सदक्षिणाकं सतांबूलं सतिलापिधानउदकुम्भं (प्रेततृप्तिद्वारा) प्रेततृप्त्यर्थमुपतिष्ठतु ।

सव्यं ओं ओं अद्य पूर्वोक्तएवंगुणविशेषणविशिष्टायां पुण्यतिथौ प्राचीनावीती पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थं + आमश्राद्धे पितरं गोत्रं शर्माणं प्रेतमुद्दिश्य मया कृतेन नग्न-प्रच्छादनएकोद्दिष्टआमश्राद्धेन प्रेततृप्तिद्वारा प्रेततृप्त्यर्थमुपतिष्ठतु इति तिलोदकं भूमौ निनीय । सव्यम ॥ ओं ओं अद्य पूर्वोक्त + आमश्राद्धे तिलोदकपिण्डप्रदानं करिष्ये । इति संकल्प्य पिण्डं दत्वा । सव्यं अद्य पूर्वोक्त० प्राचीनावीती + श्राद्धे पितरं गोत्रं शर्माणं प्रेतमुद्दिश्य मया कृतैः मरणदिने नग्नप्रच्छादन आमश्राद्धतिलोदकपिण्डप्रदानैश्च अस्मत्पितुः गोत्रस्य + प्रेततृप्त्यर्थमुप-तिष्ठतु इति तिलोदकं विसृजेत् ॥

नारायण नमस्तेस्तु शङ्खचक्रगदाधर ।
अक्षय्यं पिण्डदानेन प्रेततृप्तिकरो भव ॥

जले पिण्डं विसृजेत् ॥ अथ स्मृतिः ॥

वासस्तण्डुलकुम्भं च प्रदीप्तं कांस्यभाजनम् ।
दद्यानानन्तरं दद्यान्नग्नत्वादिनिवृत्तये ॥

इति नग्नप्रच्छादनविधिः

अथ नवश्राद्धविधिरुच्यते

कर्ता सदक्षिणतिलदर्भानादाय समस्तसंपत् + गोविन्दाय नमो नमः। प्राचीनावीती। अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिनादारभ्य अद्य प्रथमेहनि नवामैकोद्दिष्ट आमश्राद्धं कर्तुं मुख्यकालो भूत्वा ममाधिकारसंपदस्त्विति भवन्तो ब्रुवन्तु। अधिकारसंपदस्तु। कालश्च मुख्यकालोस्त्विति भवन्तो ब्रुवन्तु। कालश्च मुख्यकालोस्तु सव्यं ओं ओं अद्य पूर्वोक्तएवंगुणविशेषणविशिष्टायां पुण्यतिथौ प्राचीनावीती अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं (मरणदिनादारभ्य) मरणदिने प्रथमेहनि नवामैकोद्दिष्टं आमश्राद्धं आमादिद्रव्येण आमपिण्डप्रदानेन प्रेतोद्देशेन एकोद्दिष्टविधानेनाद्य करिष्ये इति संकल्प्य, अस्मत् पितुः + प्रथमेहनि नवामैकोद्दिष्टआमश्राद्धे प्रेतार्थे अयं ते क्षण उपतिष्ठतु इति एकदर्भेण कूर्चं कृत्वा दक्षिणाग्रं दर्भं तिलदर्भं तदुपरि निधाय दापयेत्। गोमयेन त्रिकोणमण्डलं कृत्वा, पितः गोत्र शर्मन्प्रेत प्रेततृप्त्यर्थं+प्रथमेहनि प्रेतार्थे इदं ते पाद्यमुपतिष्ठतु। सव्यं ओं ओं अद्य पूर्वोक्तएवंगुणविशेषणविशिष्टायां + नवामैकोद्दिष्टआमश्राद्धे प्रक्रान्तं श्राद्धकर्म करिष्य इति संकल्प्य। अपहता असुरा रक्षःपिशाचः यः क्षयति पृथिवीमनु अन्यत्रेतो गच्छतु यत्रास्य गतं मनः। त्रिकोणमण्डलं कृत्वा तिलदर्भमादाय उदीतां अवर उत्पर उन्मध्यमः प्रेतस्सौम्य असुं य इयायावृक ऋतज्ञ स नोऽवतु प्रेतो हवे। सव्यं कृत्वा आमं गायत्र्या प्रोक्ष्य श्राद्धार्थं संपादिताः आमादिपदार्थाः श्राद्धयोग्या भवन्त्विति भवन्तो ब्रुवन्तु श्राद्धयोग्या भवन्तु॥

अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा।
यः स्मरेत्पुण्डरीकाक्षं सबाह्याभ्यन्तरश्शुचिः॥

प्राचीनावीती पितुः गोत्रस्य शर्मणः प्रेतस्य प्रथमेहनि नवामैकोद्दिष्टआमश्राद्धे प्रेतार्थे इदं ते आसनमुपतिष्ठतु अयं ते क्षणः उपतिष्ठतु। (ब्राह्मणस्य पुरतः) एकदर्भं न्यस्य तस्योपरि अर्घ्यपात्रं निधाय तस्मिन्नेकदर्भं निधाय उत्तानं कृत्वा अप आसिच्य। शन्नो देवीरभिष्टये आपो भवन्तु पीतये शम्योरभिस्रवन्तु नः। तिलोसि सोमदेवत्यः गोसवे देवनिर्मितः प्रत्नवद्भिः प्रत्त एहि। प्रेत इमान् लोकान्प्रीणयाहिनः। तिलान्विकीर्य पितः गोत्र शर्मन्प्रेत + नवामैकोद्दिष्टआमश्राद्धे प्रेतार्थे इदं ते अर्घ्यमुपतिष्ठतु प्रेताय पत्रपुटं छित्वा, (इति पत्रपुटं पृष्ठभागे विसृज्य इति शिरआरभ्य पादान्तमर्चयित्वा)

इहलोकं परित्यज्य गतोसि परमां गतिम्।
मनसा वायुरूपेण कूर्चे त्वां योजयाम्यहम्॥

कूर्चे अर्चनमुपतिष्ठतु गन्धाः उपतिष्ठन्तु । तिलाः उपतिष्ठन्तु । सर्वोपचारार्थे सतिलदर्भपत्रमुपतिष्ठतु । आमं गायत्र्या प्रोक्ष्य सव्यं भूर्भुवस्सुवः+प्रचोदयात् । प्राचीनावीती । अप्रदक्षिणेन जलं परिषिच्य हस्तोदकं दत्वा पृथिवी ते पात्रं + श्रीविष्णो आमं रक्ष पितः गोत्र शर्मन्प्रेत एतत्ते आमं सपरिकरं प्रेतो देवता इदमामं सोपस्करं सव्यञ्जनं सपरिकरं सदक्षिणाकं सताम्बूलं सतिलापिधानउदकुम्भं अस्मत्पित्रे गोत्राय शर्मणे प्रेताय प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिने प्रथमेहनि कर्तव्यनवामैकोद्दिष्ट आमश्राद्धे प्रेततृप्तिद्वारा प्रेततृप्त्यर्थमुपतिष्ठतु (इति तिलोदकं विसृज्य) सव्यं कृत्वा ओं ओं अद्य पूर्वोक्त एवंगुणविशेषणविशिष्टायां पुण्यतिथौ प्राचीनावीती अस्मत्पितुः + प्रथमेहनि अस्मत्पितरं गोत्रं शर्माणं प्रेतमुद्दिश्य मया कृतेन मरणदिने प्रथमेहनि नवामैकोद्दिष्टआमश्राद्धेन प्रेततृप्तिद्वारा प्रेततृप्त्यर्थमुपतिष्ठतु इति तिलोदकं विसृजेत् ॥

सव्यं ओं ओं अद्य पूर्वोक्त + प्रथमेहनि कर्तव्यनवामैकोद्दिष्टआमश्राद्धे प्रेतार्थे तिलोदकपिण्डप्रदानं करिष्ये पिण्डस्थाने दर्भासनमुपतिष्ठतु । तदुपरि एतत्तिलोदकमुपतिष्ठतु अस्मत्पित्रे गोत्राय शर्मणे प्रेताय प्रेततृप्त्यर्थमुत्तमलोकावाप्त्यर्थं मरणदिने प्रथमेहनि कर्तव्यनवामैकोद्दिष्टआमश्राद्धे प्रेतार्थे एष आमपिण्डः उपतिष्ठतु । तदुपरि एतत्तिलोदकमुपतिष्ठतु अञ्जनाभ्यंजने उपतिष्ठेताम् । भोगनिष्पत्त्यर्थं ताम्बूलमुपतिष्ठतु । वीर्यनिष्पत्त्यर्थं दक्षिणाः उपतिष्ठन्तु ॥ सव्यं ओं ओं अद्य पूर्वोक्तएवंगुणविशेषणविशिष्टायां पुण्यतिथौ प्राचीनावीती पितरं गोत्रं शर्माणं प्रेतमुद्दिश्य मया कृतैः (मरणदिने प्रथमेहनि) मरणदिनादारभ्य + अहनि कर्तव्यनवामैकोद्दिष्ट आमश्राद्धतिलोदकपिण्डप्रदानैश्च अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्तिद्वारा प्रेततृप्त्यर्थमुपतिष्ठतु । दत्तं श्राद्धमभिरमतां । सव्यं कृत्वा,

नारायण नमस्तेस्तु शंखचक्रगदाधर ।
अक्षय्यमामदाने प्रेततृप्तिकरो भव ॥

जले पिण्डं विसृजेत् ॥

नवश्राद्धं समाप्तम् ॥

प्रेतमुद्दिश्य शिक्यजलं क्षीरं च पात्रद्वये निक्षिप्याकाशे लम्बयेत् । तद्दिने अन्नं न पचेत् बन्धुदत्तान्नेन वर्तेरन् । अक्षारलवणाशिनोधश्शयाना भवेयुः । तद्देशे मृत्तिकां निक्षिप्य तत्र बीजानि वापयित्वा तन्तुलम्बनं कृत्वा प्रत्यहं तत्समीपे पिण्डं दत्वा मृण्मयपात्रे अप आसिच्य विष्णुमित्रात्र स्नाहीति शिक्ये स्थाप(यित्वा)येत् पात्रान्तरे अप आसिच्य अत्र पिबेति तदुपरि निदध्यात् । शिक्यान्तरे तदन्वहमित्येके दीपं चाखण्डमधोदधात्तस्यां रात्र्यां अन्नं पचेरन् । क्रीतोत्पन्ने

वा वर्तेरन् दहनादि दशाहपर्यन्तं प्रत्यहं पूर्वोक्तक्रमेण तिलोदकानि दद्युः । त्रीन् त्रीन् सपिण्डान् ज्ञातयः एकैकं समानोदकाः । मृदा स्नानानि पञ्च पञ्च वासोदकं पिण्डदानं च एकमेव दद्यात् ॥

दशाहमध्ये चायुग्मे नवश्राद्धदिनं भवेत् ।
नवश्राद्धानि पञ्चाहुराश्वलायनशाखिनः ॥

इति प्रथमतिथि(दिन)विधिः ॥

अथ शिलालक्षणम्

रक्तं श्वेतं च पाषाणं वर्णानामुत्तमोत्तमम् ।
बहुवर्णं नीलवर्णं पाषाणं तु परित्यजेत् ॥

अथ प्रमाणम्

आर्द्रामलकमात्रं तु श्लक्ष्णामादाय वै शिलाम् ।
न चाधिकं नैव हीनं प्रवदन्ति मनीषिणः ॥

शिलापात्रपिण्डानामुपघाते प्रायश्चित्तम् ।

श्वचाण्डालादिभिः स्पृष्टः पिण्डं यद्युपहन्यतः ।
कृच्छ्रत्रयं प्रकुर्वीत पुनः पिण्डं समाचरेत् ॥

काकैरसेवितः पिण्डः श्वादिभिर्दूषितो यदि ।
कृच्छ्रत्रयं प्रकुर्वीत पुनः पिण्डं समाचरेत् ॥

काकोच्छिष्टे प्रेतपिण्डे स्थाने पात्रप्रदूषिते ।
श्वादिभिः पिण्डविहिते कृच्छ्रमेकं समाचरेत् ॥

आसन्द्यामपि भग्नायां कुशानोः पतनेपि वा ।
तत्पात्रभङ्गे रज्जूनां क्षये च्छेदेपि वा पुनः ॥

शवे निपतिते वापि प्रायश्चित्तं कथं भवेत् ।
एकद्वित्रिचतुःपञ्चषडेतान्यनुक्रमात् ॥

प्राजापत्यानि कुर्वीत पुनस्तन्त्रं समाचरेत् ।
स्थानभेदे समुत्पन्ने पिण्डे चैव तिलोदके ॥

प्राजापत्यत्रयं कुर्यात् कुर्यात्पूर्वं कृतं पुनः ।
तिलाञ्जलीनां निक्षेपः पिण्डानां यः प्रजापते ।
तत्र क्षेपे द्वादशाहं भ्रंशे कृच्छ्रं समाचरेत् ॥

द्रव्यभेदे महाहानिः कर्तृभेदस्त्वनर्थदः ।
स्थानभेदे महादोषस्त्रिभेदं नैव कारयेत् ॥

उत्तरीयशिलापात्रकर्तृद्रव्यविपर्यये ।
पूर्वदत्तांजलीन् पिण्डान् पुनरित्याह गौतमः ॥

देवादीनां नवश्राद्धं अतीतं प्रथमेहनि ।
तृतीयेहनि कर्तव्यं अन्येषामप्ययं विधिः ॥

अथ सञ्चयनविधिरुच्यते ॥

प्रथमेह्नि द्वितीयेह्नि तृतीये नवसप्तमे ।
अस्थिसञ्चयनं कुर्याद्दिने तद्गोत्रजैस्सह ॥

अथ वर्जनीयकालः ॥

भौमार्कमन्दवारेषु तिथियुग्मेषु वर्जयेत् ।
प्रदातुर्जन्मनक्षत्रं त्रिपदर्क्षं विशेषतः ॥

नन्दायां भार्गवदिने चतुर्दश्यां त्रिजन्मनि ।
नास्थिसञ्चयनं कार्यं कुलक्षयकरम्भवेत् ॥

बृहस्पतौ तथा सार्पे पुष्यहस्ते तथैव च ।
भृग्वङ्गारकयोश्चैव वर्जयेदस्थिसंचयम् ॥

कर्तुश्चन्द्राष्टमे वापि न कार्यं फल्गुनीद्वयम् ।
प्रोष्ठपदाद्वयाषाढाद्वयान्यनक्षत्रेषु च ॥

सञ्चयनगृह्यपरिशिष्टेपि षष्ठाष्टमदशाहवर्जमनेकनक्षत्र इति ॥

अथ सञ्चयनप्रयोग उच्यते

अपरेद्युः तृतीयस्यां पञ्चम्यां सप्तम्यां वा नवम्यां वा कर्ता ज्ञातिमित्रबान्धवैस्सह पञ्चगव्यं क्षीरं शमीशाखाम् लक्षणकुम्भं पिधानकलशं शूर्पं खनित्रं बल्यर्थोशादिलाजान् गन्धाक्षत पुष्पाण्युदकुम्भं तिलान् तैलं दर्भांश्च गृहीत्वा दहनदेशं गत्वा तत्सर्वं शुचौ देशे निधाय स्नात्वाचम्य। समस्तसंपत् + गोविन्दाय नमो नमः। प्राचीनावीती पर्षदं प्रणम्य दक्षिणां गृहीत्वा अस्मत्-पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिनादारभ्य अद्य द्वितीयेहनि अस्थिसञ्चयनं कर्तुं योग्यतासिद्धिमनुगृहाण। योग्यतासिद्धिरस्त्विति ब्राह्मणाः प्रतिब्रूयुः। अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य + द्वितीयेहनि अस्थिसञ्चयनं कर्तुं मुख्यकालो भूत्वा मम अधिकार-सम्पदस्त्विति भवन्तो ब्रुवन्तु। अधिकारसंपदस्तु। कालश्च मुख्यकालोस्त्विति भवन्तो ब्रुवन्तु कालश्च मुख्यकालोस्तु सव्यं ओं ओं अद्य पूर्वोक्तएवंगुणविशेषणविशिष्टायां पुण्यतिथौ प्राचीनावीती (अस्मत्) पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिनादारभ्य अद्य द्वितीयेहनि (अस्मत्) पितुः अक्षय्यपुण्यलोकावाप्त्यर्थं अस्थिसंचयनं करिष्ये इति सङ्कल्प्य। तत्काले कृच्छ्राचरणं करिष्य इति संकल्प्य। हिरण्यगर्भ + प्रयच्छ मे अस्थिसञ्चयनकाले तिथिवारनक्षत्रयोगकरणैः यो दोषस्समजनि तद्दोषपरिहारार्थं प्राजापत्यकृच्छ्रप्रत्याम्नायं यथाशक्ति हिरण्यं महाविष्णुप्रीतिं कामयमानस्तुभ्यमहं संप्रददे॥

सव्यं ओं ओं अद्य पूर्वोक्तएवंगुणविशिष्टायां पुण्यतिथौ प्राचीनावीती अस्मत्पितुः + अहनि शवानलचण्डालपतितकाकगृध्रश्वादिस्पर्शदोषपरिहारार्थं पञ्चगव्यमेळनं प्रोक्षणं च करिष्य इति सङ्कल्प्य। गायत्र्या गोमूत्रं। आप्यायस्वेति क्षीरं। दधिक्राव्ण इति दधि। शुक्रमसि ज्योतिरसीत्याज्यं। देवस्य त्वेति कूर्चेन शुद्धोदकं ओमिति प्रणवेनालोड्य तत्तन्मन्त्रेण प्रोक्ष्य शीतके शीतिकावतु ह्लादिके ह्लादुकावतु। मण्डूक्या ं सुसंगमय। इमं स्वा अग्निर्हर्षय पादादिशिरःपर्यन्तः प्रोक्ष्य अयुग्मकुम्भै-रुदकैः अग्निं शमयित्वा। अङ्गुष्ठयोः ऊर्णासूत्रेण बृहतीफले बध्वा। दक्षिणाभिमुखो भूत्वा वामहस्तेन कुम्भं स्पृष्ट्वा (शिरःप्रदेशास्थिमादाय निश्शब्दं कुम्भे निक्षिप्य) पादपूर्वकं शिरोन्तमन्वीक्षमाणा निश्शब्दं कुम्भे निदधाति। अङ्गुष्ठोपकनिष्ठिकाभ्यां इदं त एकं पर ऊत एकं। तृतीयेन ज्योतिषा संविशस्व। संवेशने तन्वे १ श्चारुरेधि प्रियो देवानां परमजनित्रे इति मन्त्रेण गृहीत्वा निश्शब्दं कुम्भे दद्युः। स्त्रीणां वामलक्षणे कुम्भे भस्म संशोध्य सूक्ष्मास्थीनि कुम्भे निधाय-तत्सव्यदेशे गर्तं खनित्वा गायत्र्या प्रोक्ष्य तिलान्विकीर्य॥

उपसर्प मातरमिति चतसृणां संकुशिकः पितृमेधस्त्रिष्टुप् द्वितीया प्रस्तारा पंक्तिः तृतीया त्रिष्टुप् चतुर्थी जगती अस्थिकुम्भस्योपरि (मृत्तिकानिक्षेपणे) मृत्प्रक्षेपणे विनियोगः। उपसर्प

मातरं + सादनाते मिनोतु । यावदस्थि न हीयते तद्दहनदेशे मृदा पुरुषाकृतिं कृत्वा आग्नेय-शिरोभागान्तं कृत्वा । अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिनादारभ्य अद्य द्वितीयेहनि (श्मशानवेदिकापूजां करिष्ये इति संकल्प्य) अस्थिसञ्चयनांगवेदिकाराधनबलिप्रदानपिण्डप्रदानानि करिष्ये इति संकल्प्य तच्छिरोभागे प्राङ्मुखं आग्नेयापवर्गं निधाय दक्षिणामुखमुपविश्य मध्ये प्रेतराजाय अभ्यञ्जनमुपतिष्ठतु । उत्तरतः प्रेतसखिरुद्राय अभ्यञ्जनमुपतिष्ठतु । दक्षिणतः प्रेतसखियमाय अभ्यञ्जनमुपतिष्ठतु । मध्ये प्रेतराजाय उत्तरतो रुद्राय दक्षिणतो यमाय स्नानमुपतिष्ठतु । अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिनादारभ्य अद्य द्वितीयेहनि संचयनाङ्गवेदिकाराधनश्राद्धे मध्ये प्रेतराजाय अयं ते क्षणः उपतिष्ठतु । उत्तरतो रुद्राय अयं ते क्षणः उपतिष्ठतु । दक्षिणतो यमायायं ते क्षणः उपतिष्ठतु । अस्मत्पितः गोत्र शर्मन् प्रेत + श्राद्धे प्रेतराजाय पाद्यमुपतिष्ठतु । उत्तरतो रुद्राय पाद्यमुपतिष्ठतु । दक्षिणतो यमाय पाद्यमुपतिष्ठतु ॥

सव्यं ओं ओं अद्य पूर्वोक्तएवंगुणविशिष्टायां पुण्यतिथौ प्राचीनावीती अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य + अस्थिसञ्चयनाङ्गवेदिकाराधनश्राद्धे भवदनुज्ञया प्रक्रान्तं श्राद्धकर्म करिष्ये इति संकल्प्य अपहता + गतं मनः इति मन्त्रेण तिलान्विकीर्य त्रिकोणमण्डलं कृत्वा ॥

उदीतामवर उत्पर उन्मध्यमः प्रेत सौम्य ।
असुं य इयायावृकाऋतज्ञ स नोवतु प्रेतो हवे ॥

सव्यं आमं गायत्र्या प्रोक्ष्य । प्राचीनावीती अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य + श्राद्धे मध्ये प्रेतराजाय इदं ते आसनमुपतिष्ठतु अयं ते क्षण उपतिष्ठतु । उत्तरतो रुद्राय आसनमुपतिष्ठतु । अयं ते क्षणः उपतिष्ठतु । दक्षिणतो यमाय आसनमुपतिष्ठतु अयं ते क्षणः उपतिष्ठतु । एकदर्भं भूमौ निधाय तदुपरि पत्रपुटं अधोबिलं निक्षिप्य प्रोक्ष्य उत्तानं कृत्वा प्रोक्ष्य तिलाः उपतिष्ठन्तु उदकं पूरयित्वा शं नो देवीरभिष्टय आपो भवन्तु पीतये शम्योरभिस्रवन्तु नः । तिलोसि सोमदेवत्यः गोसवे देवनिर्मितः । प्रत्नवद्भिः प्रत्त एहि । अस्मत्पितः गोत्र शर्मन् प्रेत + वेदिकाराधनश्राद्धे मध्ये प्रेतराजायार्घ्यमुपतिष्ठतु । उत्तरतो रुद्रायार्घ्यमुपतिष्ठतु । दक्षिणतो यमायार्घ्यमुपतिष्ठतु इत्यर्घ्यं शिलासु दत्वा पत्रपुटं छित्वा पृष्ठतो विसृजेत् । मध्ये प्रेतराजाय कंटकोच्छिष्टनिवारणार्थं अपूपपादुके उपतिष्ठेतां मध्ये प्रेतराजाय लज्जानिवारणार्थं वस्त्रमुपतिष्ठतु उत्तरतो रुद्राय + उपतिष्ठतु दक्षिणतो यमाय लज्जानिवारणार्थं वस्त्रमुपतिष्ठतु मध्ये प्रेतराजाय महावायुनिर्हरणार्थं ध्वजपताके उपतिष्ठेतां उत्तरतो रुद्राय दक्षिणतो यमाय महावायुनिर्हरणार्थं

ध्वजपताके उपतिष्ठेताम् । मध्ये प्रेतराजाय सर्वोपचारार्थे सतिलदर्भपत्रमुपतिष्ठतु । उत्तरतो रुद्राय + उपतिष्ठतु । दक्षिणतो यमाय + उपतिष्ठतु ॥

ओं अद्य पूर्वोक्त + श्राद्धे अस्मत्पितरं गोत्रं शर्माणं प्रेतमुद्दिश्य मया कृतेन मरणदिनादारभ्य द्वितीयेहनि वेदिकाराधनश्राद्धेन अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्तिद्वारा प्रेततृप्त्यर्थमुपतिष्ठतु इति तिलोदकं भूमौ विसृजेत् । सव्यं ओं ओं अद्यपूर्वोक्त + द्वितीयेहनि वेदिकाराधनश्राद्धे तिलोदकपिंडप्रदानं करिष्ये इति संकल्प्य पिंडस्थाने दर्भासनमुपतिष्ठतु । तदुपरि एतानि तिलोदकान्युपतिष्ठन्तु । अस्मत्पित्रे गोत्राय शर्मणे प्रेताय प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिनादारभ्य अद्य द्वितीयेहनि अस्थिसंचयनाङ्गवेदिकाराधनश्राद्धे मध्ये प्रेतराजाय एष पिंडः उपतिष्ठतु उत्तरतो रुद्राय एष पिंड उपतिष्ठतु । दक्षिणतो यमाय एष पिंड उपतिष्ठतु । पिंडानामुपरि एतानि तिलोदकान्युपतिष्ठन्तु । अञ्जनाभ्यञ्जने उपतिष्ठेतां । भोगनिष्पत्त्यर्थं ताम्बूलमुपतिष्ठतु । वीर्यनिष्पत्त्यर्थं दक्षिणाः उपतिष्ठंतु ॥

सव्यं ओं ओं अद्य पूर्वोक्तएवंगुणविशेषणविशिष्टायां पुण्यतिथौ प्राचीनावीती अस्मत्पितुः + द्वितीयेहनि वेदिकाराधनश्राद्धे अस्मत्पितरं गोत्रं शर्माणं प्रेतमुद्दिश्य मया कृतैः मरणदिनादारभ्य द्वितीयेहनि वेदिकाराधनश्राद्धातिलोदकपिंडप्रदानैश्च गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्तिद्वारा प्रेततृप्त्यर्थमुपतिष्ठतु सव्यं वंशाभिवृध्यर्थं लाजाः उपतिष्ठंतु (सर्वतो लाजान्प्रकीर्य) बलिं गायत्र्या प्रोक्ष्य ओं भूर्भुवस्सुवः प्राचीनावीती अप्रदक्षिणं परिषिच्य हस्तोदकं शिलासु दत्वा । पृथिवी ते पात्रं श्रीविष्णो बलिं रक्ष पितः गोत्र शर्मन्प्रेत एतत्ते बलिं सपरिकरं प्रेतो देवता इमं बलिं सोपस्करं सव्यञ्जनं सपरिकरं सदक्षिणाकं सतांबूलं सशिलापिधानउदकुम्भनालिकेरसलिलसहितं अस्मत्पित्रे गोत्राय शर्मणे प्रेताय प्रेततृप्त्यर्थमुत्तमलोकावाप्त्यर्थं मरणदिनादारभ्य द्वितीयेहनि इमं बलिं प्रेततृप्तिद्वारा प्रेततृप्त्यर्थमुपतिष्ठत्विति सतिलदर्भं गृहीत्वा जलं निक्षिप्य भूमौ विसृजेत । सव्यं कृत्वा ॥

नारायण नमस्तेस्तु शङ्खचक्रगदाधर ।
अक्षय्यं बलिदानेन प्रेततृप्तिकरो भव ॥

इति प्रार्थयेत् । नालिकेरसलिलं शिलासु दत्वा दहनजनिततापोपशमनार्थं नालिकेरसलिलमुपतिष्ठत्विति वदेत् । जले पिंडान् निक्षिपेत् ॥

अस्थिकुम्भमादाय नदीतीरं गत्वा भूमौ संस्थाप्य समस्तसम्पदिति (प्रणम्य) नमस्कृत्य । प्राचीनावीती अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य + अद्य द्वितीयेहनि अस्मत्पितुः अक्षय्य-

पुण्यलोकावाप्त्यर्थं कावेर्यंभसि अस्थिनिक्षेपणं कर्तुं योग्यतासिद्धिमनुगृहाण योग्यतासिद्धिरस्त्विति ब्राह्मणाः प्रतिब्रूयुः मुख्यकालो भूत्वा मम अधिकारसंपदस्त्विति भवन्तो ब्रुवन्तु । अधिकारसंपदस्त्विति ब्राह्मणाः प्रतिब्रूयुः । कालश्च मुख्यकालोऽस्त्विति भवन्तो ब्रुवन्तु कालश्च मुख्यकालोऽस्त्विति ब्राह्मणा ब्रूयुः । ओं ओं अद्य पूर्वोक्तएवंगुणविशिष्टायां पुण्यतिथौ प्राचीनावीती अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य+द्वितीयेऽहनि अस्मत्पितुः अक्षय्यपुण्यलोकावाप्त्यर्थं कावेर्यंभसि अस्थिनिक्षेपणं करिष्य इति संकल्प्य । तत्काले कृच्छ्राचरणं करिष्य इति संकल्प्य हिरण्य+प्रयच्छ मे अस्थिनिक्षेपणकाले तिथिवारनक्षत्रलग्नयोगकरणैः यो दोषस्समजनि तद्दोषपरिहारार्थं प्राजापत्यकृच्छ्रप्रत्याम्नायं यथाशक्ति हिरण्यं महाविष्णुप्रीतिं कामयमानस्तुभ्यमहं संप्रददे इति ब्राह्मणाय दद्यात् । अस्थिनिक्षेपणकाले गोमूल्यदानं करिष्य इति संकल्प्य —

गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ।
तस्मादस्याः प्रदानेनातश्शान्ति प्रयच्छ मे ॥

इदं गोमूल्यं सदक्षिणाकं सताम्बूलं अस्थिनिक्षेपणकाले महाविष्णुप्रीतिं कामयमानस्तुभ्यमहं संप्रददे ः अस्थिनिक्षेपणकाले दशदानानि करिष्य इति संकल्प्य ॥

गोभूतिलहिरण्याज्यवासोधान्यगुळानि च ।
रौप्यं लवणमित्याहुर्दशदानान्यनुक्रमात् ॥

इति दशदानप्रत्याम्नायं यथाशक्ति हिरण्यं महाविष्णुप्रीतिं कामयमानस्तुभ्यमहं संप्रददे इति ब्राह्मणाय दद्यात् । अस्थीनि केशवादिनामभिः द्वादशवारं मज्जयित्वा अस्थिदेवताभ्यः आसनं समर्पयामि स्नानकाले पुरुषसूक्तेनाभिषिच्य विधिवन्मिळितेन पञ्चगव्येन (क्षीरं निवेदनं कृत्वा) मृदा शरावं (मृत्पिण्डं) कृत्वा तत्र दक्षिणाग्रान्दर्भानास्तीर्य तिलानवकीर्यास्थि निधाय हिरण्यरूपस्सहिरण्यसंदृगपन्नपात् सेदुहिरण्यवर्णः । हिरण्ययात्परियोनेर्निषद्याहिरण्यदा ददत्यन्नमस्मै इति हिरण्यशकलन्निधाय मधु वाता ऋतायते । मधु क्षरन्ति सिंधवः । माध्वीर्नस्सन्त्वोषधीः मधुनक्तमुतोषसो मधुमत्पार्थिवं रजः मधु द्यौरस्तु नः पिता । मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः । मधुस्नानम् । घृतं मिमिक्षिरे घृतमस्य योनिर्घृतैः श्रुतो घृतमवस्य धाम । अनुष्वधमावह मादयस्व स्वाहाकृतं वृषभवक्षि हव्यं घृतेन स्नात्वा । स्वादुः पवस्व दिव्याय जन्मने स्वादुरिन्द्राय सुहवीतु नाम्ने । स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधुमाँ अदाभ्यः । आप्यायस्व समेतु ते विश्वतस्सोमवृष्ण्यं भवावाजस्य संगथे क्षीरेण स्नाप्य देवस्य त्वा सवितुः प्रसवे । अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां इति कुशोदकं तिलोऽसीति तिलान्निक्षिप्य शरावान्तरेणास्थीन्यपिधाय अस्थीनि गृहीत्वा नाभिप्रमाणजलं प्रविश्य ॥

'नमोस्तु धर्मराजाय स मे प्रीतो भवेदिह' इत्युक्त्वा —

यावदस्थि मनुष्याणां गङ्गातोयेषु तिष्ठति ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥

इति मन्त्रेणानवलोकय पृष्ठतो विसृजेत् । पृथिवीं गच्छान्तरिक्षं गच्छ दिवं गच्छ दिशो गच्छ सुवर्गच्छ सुवर्गच्छ दिशो गच्छ दिवं गच्छान्तरिक्षं गच्छापो वा गच्छ यदि तत्र ते हितमोषधीषु प्रतितिष्ठा शरीरैः । एवं त्रिवारं कृत्वा क्षीरेण करौ पादौ प्रक्षाल्य स्नात्वाचम्य मिलतिलोदकं पिण्डप्रदानानि दद्यात् । नवश्राद्धवत् सञ्चयनाङ्गामश्राद्धं कुर्यात् । तृतीयपञ्चमसप्तमनवमदिनेषु नवश्राद्धं कुर्यात् ॥

[1](इमा जीवास्संकुशिको मृत्युस्त्रिष्टुप् आत्मसंरक्षार्थे जपे विनियोगः । इमे जीवाः+प्रतरं दधानाः ॥ इमं जीवेभ्यस्संकुशिको मृत्युस्त्रिष्टुप् । आत्मसंरक्षार्थे जपे विनियोगः । इमं जीवेभ्यः परिधिं दधामि मैषान्नुगादपरो अर्थमेतं शतं जीवन्तु शरदः पुरूचीरन्तर्मृत्युं दधतां पर्वतेन ॥ (सव्यं) सूर्यं चक्षुर्गच्छतु वातमात्मा द्यां च गच्छ पृथिवीं च धर्मणा । अपो वा गच्छ यदि तत्र ते हितमोषधीषु प्रतितिष्ठा शरीरैः इति मन्त्रेण सूर्यमवलोकय स्नात्वा पर्षदं प्रणम्य अशेषे स्वीकृत्य (प्राचीनावीती) अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिनादारभ्य द्वितीयेहनि अस्थिसंचयनकाले अस्थिनिक्षेपणकाले तिथिवारनक्षत्रलग्नयोगकरणैर्यो दोषस्समजनि तद्दोषपरिहारद्वारा मम पितुः अक्षय्यपुण्यलोकावाप्तिरस्त्विति भवन्तः महान्तः अनुगृह्णन्तु । यजमानस्य पितुः अक्षय्यपुण्यलोकावाप्तिरस्त्विति प्रतिब्रूयुः) ॥

इति अस्थिसञ्चयनविधिः ॥

अथ दशाहविधिः

दशमेहनि शिक्यदीपजलकुम्भादीन् मृतदेशादुद्वास्य तद्देशमुल्लिख्य गृहं संशोध्य बीजांकुराणि गृहपकान्नगन्धाक्षतपुष्पताम्बूलामलकतण्डुलजीर्णवस्त्रहरिद्राचूर्णतिलदर्भानादाय जलाशयमेत्य ज्ञातीनां वपनं कारयित्वा पिण्डार्थं तण्डुलं श्रपयित्वा नित्यविधिं कृत्वा ओं ओं अद्य पूर्वोक्तएवंगुणविशिष्टायां पुण्यतिथौ प्राचीनावीती + दशमेहनि कर्तव्यदहनजनितदाहतापतृष्णापिपासाक्षुदुपशमनार्थं प्रेताप्यायनार्थं प्रेततृप्त्यर्थं शिलास्नानमृदास्नानवासोदकतिलोदकपिण्डप्रदानानि करिष्य इति संकल्प्य । तिलान् गृहीत्वा आयाहि प्रेत इत्यावाह्य शिलास्नानमृदास्नानवासोदक-

---

1. अधिकः पाठः।

तिलोदकपिण्डदानानि कृत्वा अनन्तरं अशेषे स्वीकृत्य पितुः गोत्रस्य शर्मणः प्रेतस्य + दशमेहनि मम पितुः अक्षय्यपुण्यलोकावाप्त्यर्थं शरीरशुध्यर्थं दशाहांगवपनं कारयिष्ये इति संकल्प्य वपनाधिकार-योग्यतासिध्यर्थं प्राजापत्यकृच्छ्रप्रत्याम्नायं यत्किंचित् हिरण्यदानं करिष्ये इति संकल्प्य हिरण्यगर्भ + प्रयच्छ मे इदं प्राजापत्यकृच्छ्रप्रत्याम्नायं यथाशक्ति हिरण्यं महाविष्णुप्रीतिं कामयमानस्तुभ्यमहं संप्रददे इति ब्राह्मणाय दत्वा एकं दर्भं गृहीत्वा शिरसि निधाय॥

मेरुमन्दरतुल्यानि पापानि विविधानि च ।
केशानाश्रित्य तिष्ठन्ति तस्मात्केशान्वपाम्यहम् ॥

आत्मनः शुद्धिकामो वा मत्पितुः मुक्तिहेतवे ।
वपनं कारयिष्यामि तीरे ब्राह्मणसन्निधौ ॥

अथ ज्ञातयः तिलोदकानि दद्युः दीक्षावस्त्रं विसृज्य अन्यवस्त्रं धृत्वा दक्षिणाभिमुखमुपविश्य सर्वाङ्गं वपनं कृत्वा स्नात्वा दीक्षावस्त्रं धृत्वा अशेषे + स्वीकृत्य प्राचीनावीती अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिनादारभ्य अद्य दशमेहनि दशाहाङ्गमहदशुचिनिवारणार्थं प्रभूतबलिवेदिकाराधनबलिप्रदानपिंडप्रदानानि कर्तुं योग्यतासिद्धिमनुगृहाण योग्यतासिद्धिरस्त्विति ब्राह्मणाः प्रतिब्रूयुः। संचयनवत्सर्वं कुर्यात् । अनन्तरं प्रेतपत्नीमांगल्यविसर्जनं अनन्तरं लौकिकं कुर्यात् ॥

अथ शिलाविसर्जनम्

अशेषे + स्वीकृत्य दक्षिणां दत्वा प्राचीनावीती अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य + दशमेहनि मम पितुः अक्षय्यपुण्यलोकावाप्त्यर्थं कावेर्यंभसि शिलापात्रोद्वासनं कर्तुं योग्यतासिद्धि-मनुगृहाण । योग्यतासिद्धिरस्त्विति ब्राह्मणाः प्रतिब्रूयुः । ओं ओं अद्यपूर्वोक्त + कावेर्यंभसि शिलापात्रोद्वासनं कर्तुं मुख्यकालो भूत्वा मम अधिकारसंपदस्त्विति भवन्तो ब्रुवन्तु अधिकार-संपदस्त्विति ब्राह्मणाः सव्यं कृत्वा ओं ओं अद्य पूर्वोक्तएवंगुणविशिष्टायां पुण्यतिथौ प्राचीनावीती अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य + दशमेहनि मम पितुः अक्षय्यपुण्यलोकावाप्त्यर्थं कावेर्यंभसि शिलापात्रोद्वासनं करिष्ये इति संकल्प्य तत्काले कृच्छ्राचरणं करिष्ये हिरण्यगर्भगर्भस्थ + प्रयच्छ मे इदं प्राजापत्यकृच्छ्रप्रत्याम्नायं शिलापात्रोद्वासनकाले तिथिवारनक्षत्रयोगकरणैः यो दोषस्समजनि तद्दोषपरिहारार्थं महाविष्णुप्रीतिं कामयमानस्तुभ्यमहं संप्रददे । शिलापात्रोद्वासनकाले गोमूल्यदानं करिष्ये इति संकल्प्य गोमूल्यदानं कृत्वा दशदानानि कृत्वा सव्यं अशेषे स्वीकृत्य प्राचीनावीती अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थं + दशमेहनि शिलापात्रोद्वासनकाले तिथिवारनक्षत्र-

योगकरणेयो दोषस्समभजनि तद्दोषपरिहारद्वारा मम पितुः अक्षय्यपुण्यलोकावाप्तिरस्त्विति भवन्तो महान्त अनुगृह्णन्तु । मध्यशिलामुद्धृत्य ज्ञातिभिस्सह जलाशयं गत्वा तत्तीरे दर्भोपरि शिलां निधाय ज्ञातयः धर्मोदकं दद्युः । अनन्तरं पुत्राः प्राचीनावीती अस्मत्पित्रे गोत्राय शर्मणे प्रेताय प्रेततृप्त्यर्थं दशमेहनि ऋणविमोचनार्थं इदं ते धर्मोदकं उपतिष्ठतु एवं त्रिः इति धर्मोदकं कृत्वा शिलपात्रमादाय ॥

यावच्छिला मनुष्याणां गङ्गातोयेषु तिष्ठति ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥

पृथिवीं गच्छान्तरिक्षं गच्छ दिवं गच्छ दिशो गच्छ सुवर्गच्छ सुवर्गच्छ दिवं गच्छ दिशो गच्छान्तरिक्षं गच्छ पृथिवीं गच्छापो गच्छ यदि तत्र ते हितमोषधीषु प्रतितिष्ठा शरीरैः अनेन मन्त्रेण शिलां जले पृष्ठतः विसृजेत् । पिण्डपात्रं वस्त्रं च विसृज्य अन्यवस्त्रं धृत्वा आमलककल्केन शिरसि उद्धृत्य स्नायात् ब्राह्मणेभ्यो दक्षिणां दद्यात् जलपूर्णकलशं तण्डुलोपरि निधाय कलशे वरुणं संपूज्य पुण्याहं वाचयित्वा निवर्तध्वसूक्तपारायणं ब्राह्मणद्वारा कारयिष्ये इति संकल्प्य निवर्तध्वसूक्तजपकर्माणि सर्वेभ्यो ब्राह्मणेभ्यो नमः । अथ ब्राह्मणाः निवर्तध्वसूक्तजपं कुर्युः ॥

निवर्तध्वं मानुगातस्मान्सिषक्तरेवतीः ।
अग्नीषोमा पुनर्वसू अस्मे धारयतं रयिं ॥

पुनरेना निवर्तय पुनरेनान्याकुरु ।
इन्द्र एणान्नि यच्छ त्वमिरेना उपाजतु ॥

पुनरेता निवर्ततामस्मिन् पुष्यन्तु गोपतौ ।
इहैवाग्ने निधारयेह तिष्ठतु यारयिः ॥

यन्नियानं न्ययनं संज्ञानं यत्परायणम् ।
आवर्तनं निवर्तनं यो गोपा अपि तं हुवे ॥

य उदानड्व्ययनं य उदानट्परायणम् । आवर्तनं निवर्तनमपि गोपा निवर्तताम् । आनिवर्त निवर्तय पुनर्न इन्द्र गा देहि । जीवाभिर्भुनजावहै । परिवो विश्वतो दध ऊर्जा घृतेन पयसा ये देवाः केच यज्ञियास्ते रय्या संसृजन्तु नः ॥

आनिवर्तनिवर्तय निनिवर्तनिवर्तय । भूम्याश्चतस्रः प्रदिशस्ताभ्यः एना निवर्तय । भद्रं नो अपि वातय मनः । ओं शान्तिश्शान्तिश्शान्तिः इति त्रिः । वरुणं यथास्थानं कृत्वा पुण्याह-

जलं पीत्वा कलशं यजमानपत्नीहस्ते आदाय स्त्रीपूर्वा गृहं प्रविश्य दीपं कांस्यपात्रमवलोक्य बन्धुज्ञातिभिस्सह भुञ्जीयात् । पत्नी रजस्वला चेत् स्नात्वा कण्ठसूत्रं विसृजेत् ॥

इति दशाहविधिः ॥

अथैकादशदिनप्रयोगः

अथैकादशविधिः

एकादशेह्नि संप्राप्ते स्नात्वा पुण्याहवाचनम् ।
वृषोत्सर्गं श्राद्धमाद्यं कुर्यात् षोडशश्राद्धकम् ॥

इष्टदेवताभ्यो नमः + ब्राह्मणेभ्यो नमः । तदेव लग्नं + स्मरामि । करिष्यमाणस्य कर्मणः अविघ्नेन परिसमाप्त्यर्थं आदौ विघ्नेश्वरपूजां करिष्य इति संकल्प्य विघ्नेश्वरं संपूज्य वरुणपूजां कृत्वा अनया पूजया वरुणः प्रीयताम् ॥

सर्वेषु कालेषु + सर्वेभ्यो ब्राह्मणेभ्यो नमः । पुण्याहे विशेषः संकल्प्य पुण्यतिथौ प्राचीनावीती अस्मत्पितुः + एकादशेहनि नवामैकोद्दिष्ट आमश्राद्धाख्यं कर्म करिष्यमाणः प्रेतस्य प्रेतत्वपैशाचिकबाधानिवृत्तिद्वारा शाश्वतरुद्रलोकावाप्त्यर्थं रुद्रप्रीत्यर्थं वृषोत्सर्जनाख्यं कर्म करिष्यमाणः द्रव्याभावाद्ब्राह्मणाभावादग्नौ महैकोद्दिष्ट आद्यश्राद्धाख्यं कर्म करिष्यमाणः वृषोत्सर्जनाङ्ग आमश्राद्धाख्यं कर्म करिष्यमाणः तदादौ शुध्यर्थं वृध्यर्थं शान्त्यर्थं अभ्युदयार्थं च एभिर्महाजनैस्सह स्वस्तिपुण्याहवाचनाख्यं कर्म करिष्ये इति संकल्प्य पुण्याहं वाचयित्वा वृषोत्सर्जनं कुर्यात् ॥

अथ वृषभलक्षणम्

लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डरः ।
श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते ॥

गोष्ठे चतुष्पथे गृहे वा गोमयेनोपलिप्य अशेषे स्वीकृत्य प्राचीनावीती अस्मत्पितुः + एकादशेहनि प्रेतत्वपैशाचिकबाधानिवृत्तिद्वारा शाश्वतरुद्रलोकावाप्त्यर्थं रुद्रप्रीत्यर्थं वृषोत्सर्जनं कर्तुं योग्यतासिद्धिमनुगृहाण योग्यतासिद्धिरस्त्विति ब्राह्मणाः । कर्तुं मुख्यकालो भूत्वा अधिकारसंपदस्त्विति भवन्तो ब्रुवन्तु । कालश्च मुख्यकालोऽस्त्विति भवन्तो ब्रुवन्तु ॥

ओं ओं श्रीगोविन्द + प्राचीनावीती अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य + एकादशेहनि प्रेतत्वपैशाचिकबाधानिवृत्तिद्वारा शाश्वतरुद्रलोकावाप्त्यर्थं रुद्रप्रीत्यर्थं वृषोत्सर्जनाख्यं कर्म करिष्य-

शुचि ... । तत्काले कृच्छ्राचरणं करिष्य इति संकल्प्य हिरण्यगर्भगर्भस्थं + वृषोत्सर्जनारंभकाले तिथिवारलग्नयोगकरणैः यो दोषस्समजनि तद्दोष ... प्राजापत्यकृच्छ्रप्रत्याम्नायं यत्किंचिद्धिरण्यं महाविष्णुप्रीतिं कामयमानस्तुभ्यमहं संप्रददे इति दत्वा वत्सतरीसमेतं ऋषभं स्नापयित्वा ... पुष्पादिभिरलंकृत्य प्राङ्मुख उपविश्य स्थण्डिलोल्लेखनाद्यग्निं प्रतिष्ठाप्य ॥

एह्यग्ने रहुगणपुत्रगौतमोऽग्निस्त्रिष्टुप् अग्न्याह्वाने विनियोगः । एह्यग्न इह होता निषीदादब्धः सुपुर एता भवानः । अवतां त्वा रोदसी विश्वमिन्वे यजामहे सौमनसाय देवान् । अग्निमावाहयामि ॥

जुष्टो दमूना वसुश्रुतोऽग्निस्त्रिष्टुप् अग्निर्नमस्कारे विनियोगः ॥

जुष्टो दमूना तिथिर्दुरोण इमन्नो यज्ञमुपयाहि विद्वान् ।
विश्वा अग्ने अभियुजो विहत्याशत्रूयतामाभरभोजनानि ॥

चत्वारि शृङ्गा वामदेवो जातवेदाग्निस्त्रिष्टुप् अग्निमूर्तिध्याने विनियोगः । अग्न्याहरणपात्रयोरक्षतैस्सह अप आसिच्य अग्निं प्रज्वाल्य चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य । त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश । एष हि देवः प्रदिशोनु सर्वाः पूर्वो हि जातः स उ गर्भे अन्तः स विजायमानस्स जनिष्यमाणः प्रत्यङ्मुखास्तिष्ठति विश्वतो मुख । एह्यग्ने प्राङ्मुखो देव मम अग्ने अभिमुखो भव सुप्रसन्नो भव वरदो भव । भूर्भुवस्सुवः प्रजापतिस्त्रिष्टुप् अग्निप्रतिष्ठापने विनियोगः रेखास्वग्निमभ्यात्मं प्रतिष्ठाप्य ॥

अथान्वाधानम् । अद्यपूर्वोक्तएवंगुणविशेषणविशिष्टायां शुभतिथौ वृषोत्सर्जनाङ्गमन्वाधानं करिष्य इति संकल्प्य अस्मिन्नन्वाहितेग्नावग्निं जातवेदसमिध्मेन प्रजापतिं प्रजापतिं च आधारदेवते आज्येन अग्नीषोमौ चक्षुषी आज्येन अत्र प्रधानं रुद्रं सोमं इन्द्रं च प्रधानदेवताः चरुपायसयावकद्रव्यैः शेषैः स्विष्टकृतमिध्मसन्नहनेन रुद्रं विश्वान् देवान्संस्रावेणायसमग्निं देवान् विष्णुमग्निं वायुं सूर्यं प्रजापतिं च प्रायश्चित्तदेवताः आज्येन ज्ञाताज्ञातदोषनिर्हरणार्थं अनाज्ञातत्रयेणाग्निमाज्येन एवं साङ्गेन कर्मणा सद्यो यक्ष्ये भूर्भुवस्सुवः प्रजापतिः प्रजापतिर्बृहती अन्वाधानसमिद्धोमे विनियोगः भूर्भुवस्स्वास्वाहेति सकृदुक्ते एकैकशोग्नावादध्यात् । प्रजापतय इदम् ॥

अथ रज्जुलक्षणम्

प्रादेशमात्रैष्षट्त्रिंशद्दर्भैः त्रिसन्धिं त्रिवृतां सव्योत्तराभ्यां पाणिभ्यां पूर्वमावर्तयेत् । दक्षिणोत्तराभ्यां पश्चादन्ते प्रदक्षिणावृतेन ग्रन्थिं कृत्वा । उदगग्रमास्तीर्य प्रादेशमात्रदर्भमुष्टिं

छित्वा तस्यां निधाय द्विरावेष्ट्य रज्जुमूलं सकृदावेष्ट्य प्रथमवेष्टनस्याधस्तादुन्नयेत् । एवमेव रज्जुं कृत्वारत्न्यायामं पञ्चदशपलाशमयमिध्मं खादिरमश्वत्थन्यग्रोधवृक्षजं वा तया सकृदावेष्ट्य रज्जुमूलं च तावुपरि निदध्यात् । सोदकेन पाणिना प्रदक्षिणमग्निं त्रिः परिसमूह्य उदगग्रैः प्रागग्रैश्च प्रादेशमात्रैः बाहुमात्रैर्वा दर्भैर्दक्षिणत उपरितनैरुत्तरतोऽधरैरग्निं परिस्तृणीयात् । अग्नेरुत्तरतः पात्रासादनाय दक्षिणतो ब्रह्मासनार्थं च दर्भानास्तीर्य त्रिरग्निं पर्युक्ष्य दर्भेषु द्वन्द्वन्यञ्चि पाणिभ्यामुदगपवर्गं प्राक्संस्थं प्रयुनक्ति चरुस्थाली प्रोक्षणी दर्वीस्रुवौ चमसमाज्यपात्रं इध्माबर्हिषी चेति शूर्पं कृष्णाजिनोलूखलमुसलानि च सादयेत् । प्रोक्षणपात्रमुद्धृत्यानन्तर्गर्भौ प्रादेशमात्रावनखच्छिन्नौ समौ साग्रौ दर्भौ पवित्रार्थं गृहीत्वा तस्मिन्नन्तर्धायाप आसिच्य पवित्राभ्यां तूष्णीं त्रिरुत्पूय पात्राण्युत्तानानि कृत्वा इध्मं बर्हिश्च विस्रस्य ताभिरद्भिस्त्रिः प्रोक्षयेत् । अथ चमसं प्रत्यगग्नेर्निधाय पवित्रे अन्तर्धाय उत्पूताप आसिच्य गन्धादिकं प्रक्षिप्य ब्रह्माणं वृणुयात् । अस्मिन्वृषोत्सर्जनहोमकर्मणि ब्रह्माणं त्वां वृणीमहे स वृतोऽस्मि करिष्यामि । अग्नेः प्रागवस्थाय प्राङ्मुखो यज्ञोपवीत्याचम्य समस्तपाण्यंगुष्ठाग्रेणाग्निं सव्यपादपुरस्सरं परीत्य निरस्तः परावसुरिति ब्रह्मसदनात्तृणं नैर्ऋत्यां निरस्याप उपस्पृश्य इदमहमर्वाग्वसोस्सदने सीदामि इत्युदङ्मुख उपविश्य बृहस्पतिर्ब्रह्मा ब्रह्मसदन आशिष्यते बृहस्पते यज्ञं गोपाय स यज्ञं पाहि स यज्ञपतिं पाहि स मां पाहीति वदेत् । कर्ता सपवित्रकराभ्यां चमसमुद्धृत्य ब्रह्मन्नपः! प्रणेष्यामीति वदेत् ब्रह्मा ओं भूर्भुवस्सुवः बृहस्पतिप्रसूतः ओं प्रणय कर्ता चमसं नासिकाग्रं नीत्वा उत्तरतोऽग्नेर्दर्भेषु निधाय दर्भैः प्रच्छादयेत् ॥

अथ प्रत्यगग्नेश्शूर्पं पवित्रे निधाय रुद्राय त्वा जुष्टं निर्वपामि ४ सोमाय त्वा जुष्टं निर्वपामि ४ इंद्राय त्वा जुष्टं निर्वपामि चतुरो व्रीहिमुष्टीन्मंत्रावृत्या निरूप्य रुद्राय त्वा जुष्टं प्रोक्षामि सोमाय त्वा जुष्टं प्रोक्षामि इंद्राय त्वा जुष्टं प्रोक्षामि निर्वापसंख्यया प्रोक्षयेत् । निर्वापप्रोक्षणादि पृथक् चेत् अग्नेरुत्तरतः प्राग्ग्रीवं ऊर्ध्वलोमं कृष्णाजिनमास्तीर्य तत्रोलूखलं निधाय व्रीहीनोप्य पत्नी स्वयं वा मुसलेनावहन्यात् । तण्डुलान् त्रिष्फलीकृतान् त्रिः प्रक्षाळ्य श्रपयेत् । आज्यपात्रे पवित्रे निधाय आज्यमासिच्य अग्नेरुत्तरतः सभस्माङ्गारान् प्रयोगपारिजातरीत्या परिस्तरणाद्बहिर्निरूह्य तेष्वाज्यमधिश्रित्य ज्वलता दर्भाजिनावज्वल्य अंगुष्ठपर्वमात्रके द्वे दर्भाग्रे प्रच्छिद्य प्रक्षाळ्य आज्ये प्रास्य तेनैव ज्वलता चरुणा सह त्रिपर्यग्निकरणं कृत्वा तदुल्मुकमपास्यापः स्पृष्ट्वा उदगुद्वास्य अंगारान्प्रत्यूह्य उत्तानाभ्यां पाणिभ्यां असंहते पवित्रे गृहीत्वा सवितुष्ट्वा हिरण्यस्तूपस्सविता पुर उष्णिक् आज्यस्योत्पवने विनियोगः सवितुष्ट्वा प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण वसोस्सूर्यस्य रश्मिभिः इति प्रागुत्पुनाति सकृन्मन्त्रेण द्विस्तूष्णीं पवित्रे प्रोक्ष्य अग्नौ प्रास्य । अग्नेः पश्चादुदगग्रान्बर्हिस्सन्नहनीमास्तीर्य तत्र आज्यं निधाय दक्षिणेन हस्तेन गृहीत्वा स्रुक्स्रुवौ सहैवाग्नौ प्रताप्य स्रुचं निधाय स्रुवं सव्येन धारयन् । दर्भाग्रैर्बिलं त्रिः प्रदक्षिणं परिमृज्य बिलपृष्ठमग्रत

आरभ्य अभ्यात्मं त्रिस्संमृज्य बिलपृष्ठादारभ्य यावदुपरि बिलं दण्डम् दर्भमूलैस्त्रिस्संमृज्य स्रुवं प्रोक्ष्य प्रताप्य आज्यादुदग्बर्हिष्यासाद्य तैरेवोदकस्पृष्टैर्दर्भैरेव दर्वीञ्च संमृज्य स्रुवस्योत्तरतो निधाय दर्भान् प्रोक्ष्याग्नौ प्रहृत्य श्रृतं चरुमभिघार्य अग्न्याज्ययोर्मध्ये नीत्वाज्योद्दक्षिणतो बर्हिष्यासाद्य प्रत्यभिघार्य हविरुद्धारणाय चर्वाज्ययोर्मध्ये पात्रान्तरं निधाय पात्रत्रयमभिघार्य अग्निमलंकृत्य स्वयमलंकुर्यात्। विश्वानिन इत्यनयावसुश्रुतोग्निस्त्रिष्टुप् अग्न्यलङ्करणे विनियोगः॥

विश्वानि नो दुर्गहा जातवेदः। सिन्धुन्नावा दुरितातिपर्षि।
अग्ने अत्रिवन्नमसा गृणानः। अस्माकं बोद्ध्य विता तनूनाम्॥

यस्त्वा हृदा कीरिणा मन्यमानः। अमर्त्यं मर्त्यो जोहवीमि।
जातवेदो यशो अस्मासु धेहि। प्रजाभिरग्ने अमृतत्वमश्याम्॥

यस्मै त्वं सुकृते जातवेदः। उलोकमग्ने कृणवस्योनम्।
अश्विनं सपुत्रिणं वीरवन्तं गोमन्तं रयिन्नशते स्वस्ति॥

इध्मरज्जुं चमसे निधाय। इध्मं द्विरभिघार्य इध्ममलंकृत्य ब्रह्माणं अलंकृत्य स्वयमलंकुर्यात्। अयं त इध्मो वामदेवो जातवेदाग्निस्त्रिष्टुप् वृषोत्सर्जनाङ्ग इध्माधाने विनियोगः। अयं त इध्म आत्मजातवेदस्तेनेध्यस्व वर्धस्व चेद्धवर्धय चास्मान् प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहा। जातवेदसे अग्नय इदं न मम॥ आघारावाज्यभागान्तं मनसा। प्र स्वाहाकारः। प्रजापतय इदं। चक्षुष्यन्तं हुत्वा दर्व्यामुपस्तीर्य मध्यात्पूर्वार्धात् अवदाय पात्रस्थमभिघार्य दर्वीस्थमभिघारयेत्। तामसन्वैर्होमः। कद्रुद्राय कण्वो रुद्रो गायत्री वृषोत्सर्जनप्रधानरुद्रप्रीत्यर्थे चरुहोमे विनियोगः॥

कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे। वोचेम शन्तमं हृदे स्वाहा॥ रुद्रायेदम्॥

सोमो धेनु गौतमस्सोमस्त्रिष्टुप् वृषोत्सर्जनसोमप्रीत्यर्थे पायसहोमे विनियोगः॥ सोमो धेनुं सोमो अर्वन्तमाशुम्। सोमो वीरं कर्मण्यं ददाति। सादन्यं विदथ्यं सभेयम्। पितृश्रवणं यो ददाश तस्मै स्वाहा। सोमायेदं। इन्द्रं वो मधुच्छन्दो इन्द्रो गायत्री वृषोत्सर्जनप्रधान् इन्द्रप्रीत्यर्थे यावकहोमे विनियोगः॥

इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः। अस्माकमस्तु केवलः स्वाहा। इन्द्रायेदम्। स्विष्टकृतमाकाय यदस्य कर्मण्यत्यरीरिचमग्निस्स्विष्टकृदतिधृतिः अग्निस्स्विष्टकृद्धोमे विनियोगः॥

यदस्य कर्मणोत्यरीरिचं यद्वा न्यूनमिहाकरम्।
अग्निः स्विष्टकृद्विद्वान् सर्वं स्विष्टं सुहुतं करोतु ॥

अग्नये स्विष्टकृते सुहुतहुते सर्वप्रायश्चिताहुतीनां कामानां समर्धयित्रे सर्वान्नः कामान्समर्धय स्वाहा । अग्नये स्विष्टकृत इदम् । इध्मवन्धनरज्जुं विस्रस्य प्रोक्ष्य (घृतप्लुतं कृत्वा) पशुपतये रुद्राय स्वाहा पशुपतये रुद्रायेदम् । विश्वेभ्यो देवेभ्यः संस्रावभागेभ्यः स्वाहा । विश्वेभ्यो देवेभ्यः संस्रावभागेभ्य इदम् । अयाश्चाविमदो अयाळग्निः पंक्तिः प्रायश्चित्तार्थमाज्यहोमे विनियोगः ॥

अयाश्चाग्नेस्यनभिशस्तीश्च सत्यमित्वमया असि ।
अयासा वयसा कृतोयासन् हव्यमूहिषे अयानो धेहि भेषजं स्वाहा ॥

अग्नये अयस इदम् ।

अतो देवा मेधातिथिर्गायत्रीर्विष्णुप्रायश्चित्तार्थं आज्यहोमे विनियोगः ॥

अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे । पृथिव्यास्सप्तधामभिः स्वाहा देवेभ्य इदम् ॥

इदं विष्णुर्मेधातिथिर्विष्णुर्गायत्री प्रायश्चित्तार्थमाज्यहोमे विनियोगः ॥

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूळमस्य पांसुरे स्वाहा ॥ विष्णव इदम् ।

भूरादीनां व्याहृतीनां व्यस्तसमस्तानां विश्वामित्रगौतमात्रेयभरद्वाज ऋषयः अग्निवायुसूर्यप्रजापतयो देवताः गायत्र्युष्णिगनुष्टुप् बृहत्यश्छन्दांसि प्रायश्चित्तार्थमाज्यहोमे विनियोगः । ओं भूः स्वाहा अग्नय इदं न मम । ओंभुवः स्वाहा वायव इदम् ओं सुवः स्वाहा सूर्यायेदं ओं भूर्भुवस्सुवः स्वाहा प्रजापतय इदं (ब्रह्मणस्सप्ताहुतीर्होष्ये छन्दोऋषिवर्जं पूर्ववत्) ब्रह्मा कर्तारं परीत्य । अग्नेः प्रागुदगवस्थाय अयाश्चेत्यादिभिस्सप्ताज्याहुतीर्हुत्वा । उद्देशत्यागान् कर्ता वदेत् ॥

अनाज्ञातमिति द्वयोर्हिरण्यगर्भोनुष्टुप ज्ञाताज्ञातदोषनिर्हरणार्थमाज्यहोमे विनियोगः । अथ मन्त्रौ — अनाज्ञातं यदाज्ञातं यज्ञस्य क्रियते मिथु । अग्ने तदस्य कल्पय । त्वंहि वेत्थ यथातथं स्वाहा । अग्नय इदम् । पुरुषसंमितो यज्ञः यज्ञः पुरुषसंमितः अग्ने तदस्य कल्पय त्वं हि वेत्थ यथातथं स्वाहा अग्नय इदम् यत्पाकत्रात्रितोग्निस्त्रिष्टुप् सर्वाघौघनिर्हरणार्थमाज्य होमे विनियोगः । यत्पाकत्रा मनसा दीनदक्षान । यज्ञस्य मन्वते मर्तासः अग्निष्टुद्धोता क्रतुविद्विजानन् । यजिष्ठो देवां ऋतुशो यजाति स्वाहा । अग्नय इदम् । ओंभूस्वाहा अग्नय इदम् । ओंभुव स्वाहा वायव इदम् । ओं सुवस्स्वाहा सूर्यायेदं ओंभूर्भुवस्सुवस्स्वाहा प्रजापतय इदम् ॥

अस्मिन्वृषोत्सर्जनहोमकर्मणि नानाप्रकारेण मध्ये सम्भावित मन्त्रलोपतन्त्रलोपकालविपर्यास-कर्मविपर्यासस्वर अक्षरवर्णपदवृत्तलोपप्रायश्चित्तार्थं यद्वो देवा इत्येकामाहुतिं होष्ये। अथ मन्त्रः। यद्वो देवातिपातयानिवाचाचप्रयुती देवहेळनम्। अरावायोनो अभिदुच्छुनायतेन्यत्रास्मिन्मरुतस्तान्निधेतन स्वाहा अग्निमरुद्भ्यो देवेभ्य इदम्। सम्भावितसमस्तदोषप्रायश्चित्तार्थं सर्वप्रायश्चित्तहोमं होष्यामि। ओं भूर्भुवः स्वः स्वाहा प्रजापतय इदं न मम। श्रीविष्णवे स्वाहा विष्णवे परमात्मन इदं न मम। नमो रुद्राय पशुपतये स्वाहा। रुद्राय पशुपतय इदं न मम। अप उपस्पृश्य। चर्वाज्यपात्र-मुत्तरतो निधाय बर्हिषि पूर्णपात्रं निनयेत्। पाणिना संस्पृश्य। पूर्णमसि पूर्णं मे भूयाः सुपूर्णमसि सुपूर्णं मे भूयाः सदसि सन्मे भूयाः सर्वमसि सर्वं मे भूयाः अक्षितिरसि मामेक्षेष्ठाः प्राच्यां दिशि देवा ऋत्विजो मार्जयन्ताम्। दक्षिणस्यां दिशि मासाः पितरो मार्जयन्ताम्। प्रतीच्यां दिशि गृहाः पशवो मार्जयन्ताम्। उदीच्यां दिश्याप ओषधयो वनस्पतयो मार्जयन्ताम्। ऊर्ध्वायां दिशि यज्ञः संवत्सरः प्रजापतिर्मार्जयताम्। आपो अस्मान्मातरश्शुन्धयन्तु घृतेनेनो घृतप्वः पुनन्तु। विश्वं हिरिप्रं प्रवहंतिदेवीरुदिदाभ्यः शुचिरापूत एमि। इदमापः प्रवहत यत्किंच दुरितं मयि। यद्वाहमभिदुद्रोह। यद्वाशेप उतानृतम्। सुमित्र्यान आप ओषधयस्सन्तु दुर्मित्र्यास्तस्मै सन्तु योस्मान्द्वेष्टि यं च वयं द्विष्मः। इति निर्ऋतिदेशेष्वपस्सिंचेत्। माहं प्रजां परासिचम्। यानस्सयावरीस्तन। समुद्रे वो निनयानि स्वं पाथो अपीथ इति मन्त्रेण गोमिथुनं पूर्णपात्रजलेन अभिषिच्य, ओं च मे हिरण्यगर्भस्सारस्वताग्नि-स्त्रिष्टुप् अग्निप्रार्थने विनियोगः॥

ओं चं मे स्वरश्च मे यज्ञोपचते नमश्च

यत्ते न्यूनं तस्मै ते उपयत्ते अतिरिक्तं तस्मै ते नमः अग्नये नमः।

स्वस्ति श्रद्धां मेधां यशः प्रज्ञां विद्यां बुद्धिं श्रियं बलमायुष्यं तेज आरोग्यं देहि मे हव्य-वाहन श्रियं देहि मे हव्यवाहन ओंनम इति। चतुस्सागरपर्यन्तं गोब्राह्मणेभ्यः शुभं भवतु+ अभिवादये॥

अथ कर्ता परिस्तरणं (विसृज्य प्रागादिपरिस्तरणान्युत्तरे विसृजेत्) परिसमूहनपर्युक्षणं तूष्णीमलंकृत्य वत्सतरीसमेतं वृषं अग्नेः प्रदक्षिणं कारयित्वा॥

पूर्वस्यां दिशि

एतं युवानं परिवो ददामि तेन क्रीळन्तः चरत प्रियेण। मानश्शास्तजनुषा सुभागा रायस्पोषेण समिषामदेम। शांता पृथिवी शिवमन्तरिक्षं द्यौर्नो देव्यभयन्नो अस्तु शिवा दिशः

प्रदिशः प्रदिशो तं आपो निश्वतः परिपांतु सर्वतः शान्तिश्शान्तिश्शान्तिः । आज्येन गन्धेन हरिद्रया वृषभस्य दक्षिणोरौ लिङ्गमुद्रां शूलमुद्रां वा लिखित्वा प्राङ्मुखं संस्थाप्य स्वयं प्राङ्मुखो भूत्वा ऋषभं मा समानानां सपत्नानां विषासहिम् । हन्तारं शत्रूणां कृधि विराजं गोपतिं गवाम् । अहमस्मि सपत्नहेन्द्र इवारिष्टो अक्षतः । अधस्सपत्नामे पदोरिमे सर्वे अभिष्ठिताः । अत्रैव वोपिनह्याम्युभे आर्त्नी इव ज्यया । वाचस्पते निषेधेमान्यथामदधरंवदान् । अभिभूरहमागमं विश्वकर्मेण धाम्ना आवश्चित्तमावोव्रतमावोहं समितिं ददे । योगक्षेमं व आदायाहं भूयासमुत्तम आवो मूर्धानमक्रमीं अधस्पदान्म उद्वदत मण्डूका इवोदकान्मण्डूका उदकादिवा । ऋषभराजस्वरूपिणे ऋषभवत्सतरीं कन्यां तुभ्यमहं संप्रददे इति सहिरण्याक्षतजलं निषिच्य । कद्रुद्राय कण्वो रुद्रो गायत्री प्राच्यां दिश्युपस्थाने विनियोगः कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे । वोचेम शन्तमं हृदे । यथा नो अदितिः करत्पश्वे नृभ्यो यथा गवे । यथा तोकाय रुद्रियम् । यथा नो मित्रो वरुणो यथा रुद्रश्चिकेतति । यथा विश्वे सजोषसः । गाथपतिं मेधपतिं रुद्रं जलाषभेषजम् । तच्छंयोस्सुम्नमीमहे यश्शुक्र इव सूर्यो हिरण्यमिव रोचते । श्रेष्ठो देवानां वसुः । शन्नः करत्यर्वते सुगं मेषाय मेष्ये । नृभ्यो नारिभ्यो गवे । अस्मे सोमश्रियमधिनिधेहि शतस्यनृणां महिश्रवस्तुविनृम्णं । मानस्सोम परिबाधो मारातयो जुहुरन्त । आनइन्दोवाजेभज । यास्ते प्रजा अमृतस्य परस्मिन्धामन्नृतस्य । मूर्धानाभासोमवेन आभूषन्तीस्सोमवेदः । हे वृषराज पूर्वदेशं गत्वा पूर्वपर्वतेषु तृणानि भक्षयित्वा पूर्वसमुद्रोदकं पीत्वा तत्रस्थगवामधिपतिर्भूत्वा देवब्राह्मणक्षेत्राणि वर्जयित्वा हे वृषराज यथेच्छं विहर ॥

प्राचीनावीती साक्षतजलमादाय अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेतत्वनिवृत्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिनादारभ्य अद्य एकादशेहनि तस्य प्रेतत्वपैशाचिकबाधानिवृत्तिद्वारा शाश्वतरुद्रलोकावाप्त्यर्थं रुद्रप्रीत्यर्थं अनया वत्सतर्या सह एष वृषः मया उत्सृष्टः । इति साक्षतोदकं प्राच्यां दिशि भूमौ विसृजेत् ॥

दक्षिणस्यां दिशि

(सव्यं) एतं युवानं० मृदेम । ऋषभं मा समानानां० मण्डूका उदकादिव । शान्ता पृथिवी +शान्तिः । इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः यथाशमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् । मृळानो रुद्रोतनो मयस्कृधि क्षयद्वीराय नमसा विधेम ते । यच्छं च योश्च मनुरायजे पिता तदश्याम तव रुद्र प्रणीतिषु । अश्याम ते सुमतिं देवयज्यया क्षयद्वीरस्य तव रुद्रमीढ्वः । सुम्नायन्निद्विशो अस्माकमाचरारिष्टवीराजुहवामते हविः । त्वेषं वयं रुद्रं यज्ञसाधं वंकुं कविमवसे निह्वयामहे । आरे अस्मद्दैव्यं हेळो अस्यतु महेसुमतिमिद्वयमस्यावृणीमहे । दिवो वराहमरुषं कपर्दिनं त्वेषं रूपं नमसा निह्वयामहे । हस्ते बिभ्रद्भेषजा वार्याणि शर्म वर्मच्छर्दि-

रस्मभ्यं यंसत्॥ इदं पित्रे मरुतामुच्यते वचः स्वादोः स्वादीयो रुद्राय वर्धनम्। रास्वाचनो अमृत मर्तभोजनं त्मने तोकाय तनयाय मृळ। मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम्। मा नोवधीः पितरं मोत मातरं मानः प्रियाः तन्वो रुद्ररीरिषः। मानस्तोके तनये मा न आयौ मानो गोषु मानो अश्वेषु रीरिषः। वीरान्मानो रुद्रभामितोवधीर्हविष्मन्तस्सदमित्वा हवामहे॥ उप ते स्तोमान्पशुपा इवाकरं रास्वापितर्मरुतां सुम्नमस्मे। भद्रा हि ते सुमतिर्मृळयत्तमाथावयमव इत्ते वृणीमहे। आरे ते गोघ्नमुत पूरुषघ्नं क्षयद्वीर सुम्नमस्मते अस्तु। मृळाचनो अधि च ब्रूहि देवाधाचनश्शर्म यच्छ द्विबर्हाः॥

हे वृषभराज दक्षिणदेशं गत्वा दक्षिणपर्वतेषु तृणानि भक्षयित्वा दक्षिणसमुद्रोदकं पीत्वा तत्रस्थगात्रासाधिपतिर्भूत्वा दैवब्राह्मणक्षेत्राणि वर्जयित्वा हे वृषभराज यथेच्छं विहर। प्राचीनावीती अस्मत्पितुः + रुद्रप्रीत्यर्थं अनया वत्सतर्या सह एष वृषः मया उत्सृष्टः। इति दक्षिणस्यां दिशि साक्षतोदकं भूमौ विसृजेत्॥

पश्चिमस्यां दिशि

एतं युवानं परिवो ददामि + समिषा मदेम। ऋषभं मासमानानां + योगक्षेमंव आदा + उदकादिव शान्ता पृथिवी + शान्तिः। आते पितर्मरुतां सुम्नमेतु मानस्सूर्यस्य सन्दृशो युयोथाः। अभिनो वीरो अर्वति क्षमेत प्रजायेमहि रुद्रप्रजाभिः। त्वादत्ते भीरुद्र शन्तमेभिश्शतं हिमा अशीय भेषजेभिः॥ १॥ व्य१ अस्मद्द्वेषो वितरं व्यंहो व्यमीवाश्चातयस्वा विषूचीः॥ २॥ श्रेष्ठो जातस्य रुद्र श्रियासितवस्तमस्तवसां वज्रबाहो। वर्षिणः पारमंहसः स्वस्ति विश्वा अभीतीरपसो युयोधि॥ ३॥ मात्वा रुद्र चुक्रुधा मान मोभिर्मादुष्टुती वृषभ मासहूती। उन्नो वीरां अर्पय भेषजेभिर्भिषक्तमं त्वाभिषजां शृणोमि॥ ४॥ हवीमभिर्हवते यो हविर्भिरवस्तोमेभीरुद्रं दिषीय ऋदूदरस्सुहवो मानो अस्यै बभ्रुस्सुशिप्रोरीरिधन्मनायै॥ ५॥ उन्मा ममन्दवृषभो मरुत्वान् त्वक्षीयसा वयसा नाधमानम्। घृणीवच्छाया मरपा अशीयाविवासेयं रुद्रस्य सुम्नम्॥ ६॥ क्व१स्यते रुद्र मृळया कुर्हस्तो यो अस्ति भेषजो जलाषः अपभर्तारपसो देव्यस्याभीनु मा वृषभ चक्षमीथाः॥ ७॥ प्रबभ्रवे वृषभाय श्वितीचे महो महीं सुष्टुतिमीरयामि। नमस्याकल्मलीकिनं नमोभिर्गृणीमसि त्वेषं रुद्रस्य नाम॥ ८॥ स्थिरेभिरङ्गैः पुरुरूप उग्रो बभ्रुश्शुक्रेभिः पिपिशे हिरण्यैः। ईशानादस्य भुवनस्य भूरेर्नवा उ योषद्रुद्रादसुर्यम्॥ ९॥ अर्हन् बिभर्षि सायकानि धन्वार्हन्निष्कं यजतं विश्वरूपम्। अर्हन्निदं दयसे विश्वमभ्वं नवा ओजीयो रुद्र त्वदस्ति॥ १०॥ स्तुहि श्रुतं गर्तसदं युवानं मृगन्न भीममुपहत्नुमुग्रम्। मृळाजरित्रे रुद्र स्तवानोन्यं ते अस्मन्निवपन्तु सेनाः॥ ११॥ कुमारश्चित्पितरं वन्दमानं प्रतिनानामरुद्रोपयन्तम्। भूरेर्दातारं सत्पतिं गृणीषे स्तुतस्त्वं भेषजा

रास्यस्मे ॥ १२ ॥ यावो भेषजा मरुतश्शुचीनियाशन्तमा वृषणो या मयोभु । यानि मनुरवृणीतापितानस्ता शञ्च योश्च रुद्रस्य वश्मि । परिणोहेती रुद्रस्य वृज्याः परित्वेषस्य दुर्मतिर्महीगात् अवास्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृळ ॥ १३ ॥ एवाबभ्रोवृषभचेकितानयथादेवनहृणीषेनहांसि । हवनश्रुन्नोरुद्रेहबोधिबृहद्वदेमविदथेसुवीराः । हे वृषभराज पश्चिमदेशं गत्वा + विहर । प्राचीनावीती । अस्मत्पितुः + अनया वत्सतर्या सह एष वृषः मया उत्सृष्टः । इति पश्चिमदिशि प्रार्थनां कृत्वा पश्चिमस्यां दिशि साक्षतोदकं भूमौ विसृजेत् ॥

उत्तरस्यां दिशि

एतं युवानं + मदेम । ऋषभं मासमानां + उदकादिव । शान्ता पृथिवी शिवमन्तरिक्षं + शान्तिः । इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवाय स्वधाम्ने । अषाह्लाय सहमानाय वेधसे तिग्मायुधाय भरता शृणोतु नः ॥ १ ॥ सहिक्षयेण क्षम्यस्य जन्मनः साम्राज्येन दिव्यस्य चेतति । अवन्नवन्तीरुप नो दुरश्चरानमीवो रुद्रजासुनोभव ॥ २ ॥ या ते दिद्युदवसृष्टा दिवस्परि क्ष्मया चरति परिसा वृणक्तु नः । सहस्रं ते स्वपिवात भेषजा मानस्तोकेषु तनयेषु रीरिषः ॥ ३ ॥ मानोवधी रुद्रमापरादा माते भूम प्रसीतौ हीळितस्य आनो भज बर्हिषि जीवशंसे यूयं पात स्वस्तिभिस्सदा नः ॥ ४ ॥ हे वृषभराज उत्तरदेशं गत्वा + यथेच्छं विहर ॥

प्राचीनावीती अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेतत्वविमुक्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिनादारभ्य एकादशेहनि प्रेतत्वपैशाचिकबाधानिवृत्तिद्वारा शाश्वतरुद्रलोकावाप्त्यर्थं रुद्रप्रीत्यर्थं अनया वत्सतर्या सह एष वृषः मया उत्सृष्टः । इत्यक्षतसहितजलं अग्नेः उत्तरस्यां दिशि निक्षिपेत् । अथ तिलोदकं ऋषभपुच्छेन सह गृहीत्वा अस्मत्पित्रे गोत्राय शर्मणे प्रेताय प्रेतत्वविमुक्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिनादारभ्य एकादशेहनि प्रेतत्वपैशाचिकबाधानिवृत्तिद्वारा शाश्वतरुद्रलोकावाप्त्यर्थं रुद्रप्रीत्यर्थं ऋषभपुच्छोदकमुपतिष्ठतु । तत्पत्नीपुच्छोदकमुपतिष्ठतु इति तिलोदकं भूमौ विसृज्य सव्यं कृत्वा हे वृषभराज यथेच्छं विहरेति वृषस्य लांछनं कृत्वा ऋषभं विसृज्य ऋषभस्य लांछनकाले रोमरुधिरत्वङ्मांसदाहेन यो दोषस्समजनि तद्दोषपरिहारार्थं तिलवस्त्रउदकुम्भसुवर्णदानानि करिष्ये । इति संकल्प्य यथासंख्यं तिलवस्त्रउदकुम्भहिरण्यदानं कृत्वा कर्मसाद्गुण्यं गोमूल्यदानं कृत्वा प्रागादिपरिस्तरणान्युत्तरे विसृजेत् ब्रह्मन्वरं ते ददामि ब्रह्मणे नमः सकलाराधनैस्स्वर्चितम् । पुनः परिषिच्य अग्निमलंकृत्योद्वास्य — होमान्ते श्रीयज्ञपुरुषं ध्यायामि गन्धादिसर्वोपचारान् समर्पयामि होमशेषं आज्यं च निवेदनं कृत्वा यस्य स्मृत्या च नामोक्त्या + यज्ञेश्वरः प्रीणातु न्यूनातिरिक्तं सुगुणमस्तु ॥

प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै ।
यानि तेषामशेषाणां श्रीकृष्णानुस्मरणं परम् ॥

कृष्ण कृष्ण कृष्ण इत्युक्त्वा पवित्रं विसृज्य स्नायात् ।

एकादशाह्नि संप्राप्ते यस्य नोत्सृजते वृषः ।
पिशाचत्वं स्थिरं तस्य दत्तश्राद्धशतैरपि ॥

पतिपुत्रवती नारी मृता चेदग्रतस्तयोः ।
वृषं नैवोत्सृजेत्पुत्रो यावत्पितरि जीवति ॥

इति वृषोत्सर्जनविधिः ॥

अथाग्नावेकोद्दिष्टप्रयोगः

माध्याह्निकं कृत्वा पुरुषाहारतण्डुलान् समुद्रव्यञ्जनान् श्रपयित्वा समस्तसम्पदिति नमस्कृत्य तिलदर्भं भूमौ निक्षिप्य प्राचीनावीती अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेतत्वविमुक्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिनादारभ्य एकादशेऽहनि द्रव्याभावाद्ब्राह्मणाभावाच्च अग्नौ महैकोद्दिष्ट आद्यश्राद्धं कर्तुं योग्यतासिद्धिमनुगृहाण (योग्यतासिद्धिरस्त्विति ब्राह्मणाः) मुख्यकालो भूत्वा ममाधिकारसम्पदस्त्विति भवन्तो ब्रुवन्तु (अधिकारसम्पदस्त्विति ब्राह्मणाः) (सव्यं) ओं ओं श्रीगोविन्द + पुण्यतिथौ प्राचीनावीती पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेतत्वविमुक्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिनादारभ्य एकादशेऽहनि द्रव्याभावाद्ब्राह्मणाभावाच्चाग्नौ महैकोद्दिष्टं आद्यश्राद्धं एकोद्दिष्टविधानेन अन्नादिद्रव्येण प्रेतोद्देशेनाद्य करिष्ये इति सङ्कल्प्य तत्काले कृच्छ्राचरणं करिष्ये इति सङ्कल्प्य कृच्छ्रं कृत्वा गर्तं खात्वा दर्भेण संमृज्य अपेत वीत विच सर्पतातोऽस्मा एतं पितरो लोकमक्रन् । अहोभिरद्भिरक्तुभिर्व्यक्तं यमो ददात्ववसानमस्मै प्रोक्ष्य बर्हिः निक्षिप्य । तिलदर्भमादाय आयाहि प्रेतसौम्य गम्भीरैः पथिभिः पूर्वैः प्रजामस्मभ्यं ददद्रयिं च दीर्घायुत्वं च शतशारदं च अस्मिन्नग्नौ अस्मत्पितरं गोत्रं शर्माणं प्रेतमावाहनमुपतिष्ठतु इत्यावाह्य । त्रिकोणमण्डलं कृत्वा अस्मत्पितुः + आद्यश्राद्धे प्रेतार्थे अयं ते क्षणः उपतिष्ठतु । गोत्र शर्मन्प्रेत + आद्यश्राद्धे प्रेतार्थे पाद्यमुपतिष्ठतु । सव्यं ओं अद्यपूर्वोक्तएवंगुणविशिष्टायां पुण्यतिथौ प्राचीनावीती अस्मत्पितुः गोत्रस्य शर्मणः + आद्यश्राद्धे प्रक्रान्तं श्राद्धकर्म करिष्ये इति सङ्कल्प्य तिलानवकीर्य वदीतां अवरउन्मध्यमः प्रेत सौम्य असुं य ईयाय अवृकं ऋतज्ञ स नोऽवतु प्रेतोहवे । (सव्यं) अन्नं गायत्र्या प्रोक्ष्य ॥

अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेत्पुण्डरीकाक्षं सबाह्याभ्यन्तरः शुचिः ॥

(प्राचीनावीती) अस्मत्पितुः गोत्रस्य शर्मणः + एकादशेऽहनि अग्नौ महैकोद्दिष्ट आद्यश्राद्धे प्रेतार्थे आसनमुपतिष्ठतु । अयं ते क्षणः उपतिष्ठतु । एकदर्भं निधाय तदुपरि पत्रपुटं निधाय तदुपरि दर्भं निधाय प्रोक्ष्य उद्धृत्य उत्तानं प्रोक्ष्य तिलाः उपतिष्ठन्तु । उदकं पूरयित्वा । शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शंयोरभिस्रवन्तु नः इति मन्त्रेणाभिमन्त्र्य ॥

तिलोऽसि सोमदेवत्यः गोसवे देवनिर्मितः ।
प्रत्नवद्भिः प्रत्नस्वधयेहि अस्मत्पितरं गोत्रं शर्माणं प्रेतं इमाल्लोकान् प्रीणयाहि ॥

अर्घ्यं पात्रं अर्चत प्रार्चत गन्धाः उपतिष्ठन्तु तिलाः उपतिष्ठन्तु उपतिष्ठतामर्घ्यः । अस्मत्पितः गोत्र शर्मन् प्रेत + एकादशेऽहनि अग्नौ महैकोद्दिष्ट आद्यश्राद्धे प्रेतार्थे अर्घ्यमुपतिष्ठतु । पत्रपुटं छित्वा ॥

इहलोकं परित्यज्य गतोऽसि परमां गतिम् ।
मनसा वायुरूपेण अग्नौ त्वां योजयाम्यहम् ॥

अर्चनमुपतिष्ठतु गन्धाः उपतिष्ठन्तु । तिलाः उपतिष्ठन्तु । सर्वोपचारार्थे सतिलदर्भपत्रमुपतिष्ठतु ॥

सव्यं ओं ओं अद्यपूर्वोक्त एवंगुणविशेषणविशिष्टायां पुण्यतिथौ प्राचीनावीती । अस्मत्पितुः + एकादशेऽहनि अग्नौ महैकोद्दिष्ट आद्यश्राद्धे प्रेताहुतिं होष्ये आज्यप्लुतमन्नं किंचिदादाय अस्मत्पित्रे गोत्राय शर्मणे प्रेताय प्रेतत्वविमुक्तयर्थं उत्तमलोकावाप्त्यर्थं मरणादिनादारभ्य एकादशेऽहनि अग्नौ महैकोद्दिष्ट आद्यश्राद्धे प्रेताय अमुष्मै यमाय च स्वाहा इत्यग्नौ प्रक्षिपेत् यमायेदन्नमम ॥

अन्नं परिवेषयेयुः अन्नं चतुर्धा विभज्य आज्यगुडक्षीरदधिताम्बूलदक्षिणाः निक्षिप्य हस्तोदकं दत्वा पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य त्वा मुखे अमृतं जुहोमि इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांसुरे अस्मत् पितः गोत्र शर्मन्प्रेत एतत्ते अन्नं सपरिकरं प्रेतो देवता इदमन्नं सोपस्करं सव्यञ्जनं सपरिकरं सदक्षिणाकं सताम्बूलं सतिलापिधानं उदकुम्भं अस्मत्पित्रे गोत्राय शर्मणे प्रेताय प्रेतत्वविमुक्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिनादारभ्य एकादशेऽहनि द्रव्याभावाद्ब्राह्मणाभावाच्च अग्नौ महैकोद्दिष्ट आद्यश्राद्धे प्रेततृप्तिद्वारा प्रेतत्वविमुक्त्यर्थमुपतिष्ठस्वेति तिलोदकं विसृज्य । सव्यं ओं ओं अद्य पूर्वोक्तएवंगुणविशेषणविशिष्टायां पुण्यतिथौ प्राचीनावीती अस्मत्पितुः + आद्यश्राद्धे अस्मत्पितरं गोत्रं शर्माणं प्रेतमुद्दिश्य मया कृतेन अग्नौ महैकोद्दिष्ट-

आद्यश्राद्धेन अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्तिद्वारा प्रेतत्वविमुक्त्यर्थमुपतिष्ठतु इति दर्भतिलोदकानि भूमौ निक्षिपेत् ॥

सव्यं कृत्वा सत्यं त्वर्तेन परिषिंचामि अमृतोपस्तरणमसीत्यापोशनं दत्वा आज्यभागान्नमादाय प्राणाय स्वाहा प्राणायेदन्न मम । अपानाय स्वाहापानायेदं व्यानाय स्वाहा व्यानायेदम् । उदानाय स्वाहा उदानायेदं समानाय स्वाहा समानायेदं । ब्रह्मणे स्वाहा ब्रह्मण इदं इति पञ्चभिर्हुत्वा । ओं ओं अद्यपूर्वोक्त + प्राचीनावीती अस्मत्पितुः + अग्नौ महैकोद्दिष्ट-आद्यश्राद्धे द्वात्रिंशत्कबळहोमं करिष्ये इति सङ्कल्प्य आज्यमिश्रितमन्नमादाय यत्ते कृष्णश्शकुन आतुतोद पिपीलस्सर्प उत वा श्वापदः । अग्निष्टद्विश्वादगदं कृणोतु । सोमश्च यो ब्राह्मणमाविवेश स्वाहा (अग्नय इदं) अग्नीषोमाभ्यामिदं इति कुक्कुटाण्डप्रमाणेन अन्नं द्वात्रिंशत्कबलेन हुत्वा । तद्यथा आज्यान्नकबळमष्टौ शर्करान्नकबळमष्टौ क्षीरान्नकबळमष्टौ दध्यन्नकबळमष्टौ एवं द्वात्रिंशत्कबळम् ॥

किञ्चिदन्नमादाय अस्मत्पितः गोत्र शर्मन्प्रेत प्रेतत्व+आद्यश्राद्धे प्रेत तृप्तोसि अमृतापिधानमसीत्युत्तरापोशनान्ते सव्यं ओं ओं अद्यपूर्वोक्त + प्राचीनावीती अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य + अग्नौ महैकोद्दिष्ट आद्यश्राद्धे प्रेतार्थे तिलोदकपिण्डप्रदानं करिष्ये इति सङ्कल्प्य होमशिष्टान्नं वर्जयित्वा अन्यपात्रस्थान्नेन पिण्डं कृत्वा पिण्डस्याधः पिण्डस्थाने इति वा दर्भासनमुपतिष्ठतु तदुपरि एतत्तिलोदकमुपतिष्ठतु पिण्डमादाय पित्रे गोत्राय शर्मणे प्रेताय प्रेतत्वविमुक्त्यर्थमुत्तमलोकावाप्त्यर्थं मरणदिनादारभ्याद्य एकादशेहनि द्रव्याभावाद्ब्राह्मणाभावाद्वाग्नौ महैकोद्दिष्ट आद्यश्राद्धे प्रेतार्थे एष पिण्डः उपतिष्ठतु तदुपरि एतत्तिलोदकमुपतिष्ठतु अञ्जनाभ्यञ्जने उपतिष्ठेतां भोगनिष्पत्त्यर्थं ताम्बूलमुपतिष्ठतु , वीर्यनिष्पत्त्यर्थं दक्षिणाः उपतिष्ठन्तु । सव्यं ओं ओं अद्य पूर्वोक्तएवंगुणविशेषणविशिष्टायां पुण्यतिथौ प्राचीनावीती अस्मत्पितरं गोत्रं शर्माणं प्रेतमुद्दिश्य मया कृतैः अग्नौ महैकोद्दिष्टं आद्यश्राद्धतिलोदकपिण्डप्रदानैश्चास्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्तिद्वारा प्रेततृप्त्यर्थं प्रेतत्वविमुक्त्यर्थमुपतिष्ठतु इति तिलोदकं भूमौ विसृज्य सव्यं कृत्वा —

नारायण नमस्तेस्तु शंखचक्रगदाधर ।
अक्षय्यं पिण्डदानेन प्रेततृप्तिकरो भव ॥

द्वात्रिंशत्कबळहोमपक्षान्तरं उदीरतामवर इत्यष्टभिर्मन्त्रैः चतुरावृत्त्या कार्यं यत्ते कृष्ण इति वा अस्मिन्देशे उदीरतामित्यष्टभिरेव कुर्वन्ति । मन्त्रास्तु

यत्ते कृष्णश्शकुन आतुतोद पिपीलस्सर्प उत वा श्वापदः । अग्निष्टद्विश्वादगदं कृणोतु

सोमश्च यो ब्राह्मणमाविवेश स्वाहा । अग्नीषोमाभ्यामिदम् । उदीरतामवर उत्परास उन्मध्यमाः स्सोम्यासः । असुं य ईयुरवृकास्तेनोवन्तु पितरो हवेषु स्वाहा । अग्नीषोमाभ्यामिदम् । इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वास य उपरास ईयुः । ये पार्थिवे रजस्यानिषत्ता ये वा नूनं सुवृजनासुविक्षुस्वाहा ॥ अग्नीषोमाभ्यामिदम् । आहं पितॄन्सुविदत्रां अवित्सि न पातं च विक्रमणं च विष्णोः । बर्हिषदो ये स्वधया सुतस्य भजन्तपित्वस्त इहागमिष्ठाः स्वाहा ॥ अग्नीषोमाभ्यामिदम् । उपहूताः पितरस्सोम्यासो बर्हिष्येषु निधिषु प्रियेषु । त आगमन्तु त इह श्रुवन्त्वधिब्रुवन्तु ते अवन्त्वस्मान् स्वाहा । अग्नीषोमाभ्यामिदम् ॥ आच्या जानुदक्षिणतो निषद्येमं यज्ञमभिगृणीत विश्वे । माहिंसिष्ट पितरः केनचिन्नो यद्व आगः पुरुषताकरामस्वाहा । अग्नीषोमाभ्यामिदम् ॥ आसीनासो अरुणीनामुपस्थे रयिं धत्त दाशुषे मर्त्यासः । पुत्रेभ्यस्तस्य वस्वः प्रयच्छत त इहोर्जं दधात स्वाहा । अग्नीषोमाभ्यामिदम् ॥ ये नः पूर्वे पितरस्सोम्यासो नुहिरे सोमपीथं वसिष्ठाः । तेभिर्यमस्संरराणो हवींष्युशन्नुशद्भिः प्रतिकाममत्तु स्वाहा । अग्नीषोमाभ्यामिदम् ॥ स्नात्वा गृहं गत्वा षोडशश्राद्धं कुर्यात् ॥

षोडशश्राद्धविधिः

एकदर्भपवित्रं धृत्वा सदक्षिणातिलदर्भानादाय समस्तसंपदिति प्रणम्य । अशेषे स्वीकृत्य ब्राह्मणेभ्यः दक्षिणां दत्वा प्राचीनावीती अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेतत्वविमुक्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिनादारभ्य द्वादशेहनि आवर्ताद्यादिषोडशएकोद्दिष्टआमश्राद्धानि कर्तुं योग्यतासिद्धिमनुगृहाण ब्राह्मणाः योग्यतासिद्धिरस्त्विति ब्रूयुः । अस्मत्पितुः गोत्रस्य शर्मणः + द्वादशेहनि आवर्ताद्यादिषोडशएकोद्दिष्टआमश्राद्धानि कर्तुं मुख्यकालो भूत्वा मम अधिकारसंपदस्त्विति भवन्तो ब्रुवन्तु । सव्यं ओं ओमद्यपूर्वोक्त एवंगुणविशेषणविशिष्टायां पुण्यतिथौ प्राचीनावीती अस्मत्पितुः गोत्रस्य शर्मणः + द्वादशेहनि आवर्ताद्यमासिकएकोद्दिष्टआमश्राद्धकर्म करिष्यमाणः देहधर्मदेशकालवैपरीत्यशंकया वत्सरे पूर्णे सपिण्डीकरणं कर्तुं अशक्यत्वादायुषः अनित्यत्वाच्च गौणवृत्या अद्य सपिण्डीकरणं कर्तुकामः तत्पूर्वभावीनि आगामि ऊनमासिक द्वितीयमासिक त्रैपक्षिकमासिक तृतीयमासिक तुरीयमासिक पञ्चममासिक षाण्मासिक ऊनषाण्मासिक सप्तममासिक अष्टममासिक नवममासिक दशममासिक एकादशमासिक द्वादशमासिक ऊनाब्दिकमासिकाख्यानि स्वे स्वे काले कर्तव्यानि तानि सर्वाणि अपकृष्य ऋषभोत्सर्जनाङ्गवसुगणाख्यरुद्रगणाख्य अवशिष्टगणाख्यएकोद्दिष्ट आमश्राद्धानि च आवर्ताद्यमासिकेन सह समानतन्त्रेण प्रेतोद्देशेनाद्य करिष्ये इति संकल्प्य तत्काले कृच्छ्राचरणं करिष्य इति संकल्प्य । हिरण्यगर्भगर्भस्थं+प्रयच्छ मे आवर्ताद्यमासिकएकोद्दिष्ट आमश्राद्ध आरम्भकाले तिथिवारनक्षत्रयोगकरणैः यो दोषस्समजनि तद्दोषपरिहारार्थं प्राजापत्यकृच्छ्रप्रत्याम्नायं यथाशक्ति हिरण्यं महाविष्णुप्रीतिं कामयमानस्तुभ्यमहं संप्रददे ॥ एकदर्भेण

एकोनविंशतिकूर्चाणि दर्भोपरि निधाय हस्तोदकं दत्वा आवर्ताद्यमासिकएकोद्दिष्ट आमश्राद्धे प्रेतार्थे अयं ते क्षण उपतिष्ठतु एवं हस्तोदकं क्षणादि दत्वा प्रक्रान्तं श्राद्धकर्म करिष्य इति संकल्पं कृत्वा तिलान्विकीर्य त्रिकोणमण्डलं कृत्वा उदीर्तामवर उत्पर उन्मध्यमः प्रेतस्सौम्य असुं य इयाय अवृक ऋतज्ञ स नोवतु प्रेतो हवे । सव्यं आमं गायत्र्या प्रोक्ष्य ॥

अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा ।
यः स्मरेत्पुण्डरीकाक्षं सबाह्याभ्यन्तरश्शुचिः ॥

प्राचीनावीती अस्मत्पितुः गोत्रस्य + आवर्ताद्यमासिकएकोद्दिष्टआमश्राद्धे प्रेतार्थे इदं ते आसनमुपतिष्ठतु अयं ते क्षणः उपतिष्ठतु ऊनमासिकप्रभृति ऊनाब्दिकपर्यन्तश्राद्ध वसुगणाख्यरुद्र-गणाख्यअवशिष्टगणाख्यश्राद्धेषु आसनमुपतिष्ठतु अयं ते क्षणः उपतिष्ठतु इति कृत्वा पत्रपुटमेकदर्भोपरि निधाय प्रोक्ष्य उद्धृत्य उत्तानं प्रोक्ष्य तिलाः उपतिष्ठन्तु उदकं पूरयित्वा शन्नो देवीरभिष्टय आपो भवन्तु पीतये शंयोरभिस्रवन्तु नः तिलोसि सोमदेवत्यः गोसवे देवनिर्मितः । प्रत्नवद्भिः प्रत्तस्वधेहि ॥ अर्घ्यपात्रमर्चत प्रार्चत गन्धाः उपतिष्ठन्तु तिलाः उपतिष्ठन्तु उपतिष्ठतामर्घ्यः आवाहनं नास्ति पितः गोत्र शर्मन्प्रेत+आवर्ताद्यमासिकएकोद्दिष्ट आमश्राद्धे प्रेतार्थे अर्घ्यमुपतिष्ठतु इत्यादि ऊनाब्दिक-वसुगणाख्य रुद्रगणाख्य अवशिष्टगणाख्य आमश्राद्धेषु अर्घ्यं दत्वा पत्रपुटं छित्वा पृष्ठतो विसृजेत् ॥

इहलोकं परित्यज्य गतोसि परमां गतिम् ।
मनसा वायुरूपेण कुशैस्त्वां योजयाम्यहम् ॥

अर्चनमुपतिष्ठतु गन्धाः उपतिष्ठन्तु । तिलाः उपतिष्ठन्तु सर्वोपचारार्थे सतिलदर्भपत्रमुप-तिष्ठतु ॥ पर्णानि प्रसार्य सव्यं ओं अद्य पूर्वोक्तएवंगुणविशेषणविशिष्टायां पुण्यतिथौ प्राचीनावीती+ अस्मत्पितुः अद्य द्वादशेहनि आवर्ताद्यादिषोडशएकोद्दिष्ट आमश्राद्धेषु प्रेताहुतिं होष्ये । भूमौ दर्भान्निधाय । अस्मत्पित्रे गोत्राय शर्मणे प्रेताय प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं + द्वादशेहनि आवर्ताद्यमासिकएकोद्दिष्ट आमश्राद्धे प्रेताय अमुष्मै यमाय च स्वाहा यमायेदन्न मम । एवमवशिष्ट-श्राद्धे प्रेताय अमुष्मै यमाय च स्वाहा । यमायेदं न मम । इत्यन्तं कृत्वा सव्यं आमं गायत्र्या प्रोक्ष्य प्राचीनावीती । अप्रदक्षिणं परिषिच्य हस्तोदकं दत्वा पृथिवी ते पात्रं श्रीविष्णो आमं रक्ष पितः गोत्र शर्मन् प्रेत एतत्ते इदमामं सोपस्करं सव्यञ्जनं सपरिकरं सदक्षिणाकं सताम्बूलं अस्मत्पित्रे गोत्राय शर्मणे प्रेताय प्रेतत्वविमुक्त्यर्थं + द्वादशेहनि आवर्ताद्यमासिकएकोद्दिष्ट आमश्राद्धे प्रेततृप्ति-द्वारा प्रेतत्वविमुक्त्यर्थमुपतिष्ठतु । इति तिलोदकं भूमौ विसृजेत् । एवं सर्वेषां दत्वा । सव्यं ओं ओं अद्यपूर्वोक्त + अवशिष्ट एकोद्दिष्ट आमश्राद्धेषु अस्मत्पितरं + आवर्ताद्यादि एकोद्दिष्ट आमश्राद्धैः

गोत्रस्य शर्मणः + प्रेतत्वविमुक्त्यर्थमुपतिष्ठतु। विप्रभोजनपक्षे (सर्वेषां आपोशनं दत्वा) सर्वत्र भुञ्जताम् (भुक्तशेषान्नमादाय + पितः गोत्र शर्मन्प्रेत प्रेततृप्तिरस्तु) (अस्तु तृप्तिः सर्वेषामुत्तरापोशनं दत्वा)॥

संकल्प्य ओं ओं अद्यपूर्वोक्त + द्वादशेहनि आवर्तांद्यादिषोडशएकोद्दिष्ट आमश्राद्धेषु प्रेतार्थे तिलोदकपिण्डप्रदानं करिष्ये (दक्षिणाग्रेषु दर्भेषु) पिण्डस्थाने दर्भासनान्युपतिष्ठन्तु तदुपरि एतानि तिलोदकान्युपतिष्ठन्तु अस्मत्पित्रे गोत्राय शर्मणे प्रेताय प्रेततृप्त्यर्थं + आवर्ताद्यमासिके एकोद्दिष्टआमश्राद्धे प्रेतार्थे एष आमपिण्डः उपतिष्ठतु एवं सर्वत्र अवशिष्टएकोद्दिष्टआमश्राद्धे प्रेतार्थे एष आमपिण्डः उपतिष्ठतु पिण्डानामुपरि एतानि तिलोदकान्युपतिष्ठन्तु। अञ्जनाभ्यञ्जने उपतिष्ठेताम्। भोगनिष्पत्त्यर्थं ताम्बूलमुपतिष्ठतु वीर्यनिष्पत्त्यर्थं दक्षिणाः उपतिष्ठन्तु सव्यं ओं ओं अद्य पूर्वोक्तएवंगुणविशिष्टायां पुण्यतिथौ प्राचीनावीती अस्मत्पितुः + द्वादशेहनि अस्मत्पितरं गोत्रं शर्माणं प्रेतमुद्दिश्य मया कृतैः मरणदिनादारभ्य अद्य द्वादशेहनि आवर्ताद्यादिषोडशएकोद्दिष्ट आमश्राद्धतिलोदकपिण्डप्रदानैश्च अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्तिद्वारा प्रेतत्वविमुक्त्यर्थमुपतिष्ठतु इति तिलोदकं विसृज्य दत्तानि श्राद्धान्यभिरम्यन्तां सव्यम्॥

नारायण नमस्तेस्तु शंखचक्रगदाधर।
अक्षय्यं पिण्डदानेन प्रेततृप्तिकरो भव॥

अथ स्मृतिः

नवश्राद्धं च पिण्डं च प्रेतश्राद्धानि षोडश।
ज्येष्ठेनैव तु कार्याणि सविभक्तजनेष्वपि॥

प्रेतश्राद्धं देवहीनमेकार्घ्यं सपवित्रकम्।
आवाहनाग्नौकरणरहितं ह्यपसव्यवत्॥
एकोद्दिष्टं पिण्डमेकं विकिरं तु न कारयेत्।
न पूर्वपचनं कुर्यान्न धूपं न च दीपकम्॥
न चाभिश्रवणं कुर्यान्नाग्नौ होमं विधीयते।
यस्यैतानि न दत्तानि प्रेतश्राद्धानि षोडश॥
पिशाचत्वं स्थिरं तस्य दत्तश्राद्धशतैरपि।
कृते च षोडशश्राद्धे सपिण्डकरणं नचेत्।
संवत्सरं व्यतीते तु पुनस्संस्कारमर्हति॥

इतिषोडशश्राद्धविधिः

अथ पालाशप्रतिकृतिदहनविधिः

तत्र देशांतरमरणे पराकद्वयमष्टौ कृच्छ्रान्वा कृत्वास्थीनि दहेत् । अथ यस्यास्थीनि न लभ्यन्ते तस्य पर्णशरावहनः ॥ स चैवं । शुचिभूमौ कृष्णमृगचर्मास्तीर्य तदुपर्येकं दक्षिणोत्तरायतं निवेश्य तदुपरि पालाशवृन्तौ विन्यसेत ॥ शिरसि चत्वारिंशत् । ग्रीवायां दश । बाह्वोः प्रत्येकं पञ्चाशत् कराङ्गुळीषु सर्वासु दश । उरसि विंशतिः । जठरे त्रिंशत् । शिश्ने चत्वारि । अण्डयोस्त्रयस्त्रयः । ऊर्वोः प्रत्येकं पञ्चाशत् । जंघान्तं पादतलान्तं यावत्पादयोः प्रत्येकं पञ्चदश । सर्वासु पादाङ्गुळीषु दश । एवं षष्ट्यधिकशतत्रयमितैः पर्णशरैः शरीरं निर्माय ऊर्णासूत्रेण सह बध्वा ॥

वक्ष्यमाणस्यापि कार्याणि मूर्धस्थाने कदळीफलं । शिरस्थाने नारिकेळफलं वर्तुलतुण्डं च । ललाटे कदळीफलं। दन्तेषु दाडिमीबीजानि । कर्णे कङ्कणं । नेत्रयोः कपर्दका । नासिकायां तिलपुष्पं। नाभौ ताम्रम् । स्तनयोः जम्बीरफलद्वयम् । वाते मनश्शिला । पित्ते हरिताळम् । कफे समुद्रफेनम् । रुधिरे मधु । पुरुषे गोमयं। मूत्रे गोमूत्रम् । रेतसि पारदम् । वृषणे वृन्ताकद्वयम् । शिश्ने गृञ्जनम् । केशेषु वनसूकरसटः । लोमसु ऊर्णमांसस्थाने कूश्माण्डजबिसाः । यवपिष्टेन जिह्वां कुर्यात् । ततः पञ्चगव्येन प्रोक्षयेत् । पञ्चामृतमन्त्रैश्च पञ्चामृतेन । पुनर्नो असुमिति ब्रह्मदक्ष्यः प्राणस्त्रिष्टुप् । अथ मन्त्रः ॥

पुनर्नो असुं पृथिवी ददातु पुनर्द्यौः पुनर्देवी पुनरन्तरिक्षम् ।
पुनर्नस्सोमस्तन्वं ददातु पुनः पूषा पथ्या३ स्वस्तिः ॥

इति प्राणप्रवेशं भावयेत् । यत्ते यमं वैवस्वतमिति सूक्तेन प्राणभावनामिति सूक्तेन प्राणानां निनीय शुक्रमसीति मन्त्रेण पारदं क्षिप्त्वा अक्षीभ्यां ते नासिकाभ्यां इति सूक्तेन जपित्वा ॥

अङ्गादङ्गाल्लोम्नो लोम्नो जातं पर्वणि पर्वणि ।
यक्ष्मं सर्वास्मादात्मनस्तमिदं विवृहामि ते ॥

इति षळर्चेन शरीरं स्पृष्ट्वा जपेत् । तच्छरीरं स्नापयित्वा ... भाजनेनाच्छाद्य पूर्वोक्तविधानेन शववद्दहेत् ॥ पलाशवृन्ताभावे कुशैः प्रतिकृतिं कुर्यात् । आहिताग्नेः प्रतिकृतिदाहे अस्थिदाहे वा दशाहमेवाधिकाशौचम् ॥ अनाहिताग्नेस्तु त्र्यहं । पर्णशरीरदाहे पुत्रपत्न्योरगृहीताशौचे दशाहादि-पूर्णमेवाशौचम् । गृहीताशौचे तु तयोः त्र्यहाशौचम् । पत्नीपुनस्संस्कारे पत्युश्चैवमेवाशौचम् । अनाहिताग्निविदेशस्थे मृते यावद्विधिना संस्कारः तावत्पुत्रादीनां नाशौचम्, न संध्यादिकर्मलोपः । अथ पुनस्संस्कारकालशुद्धिः । आशौचमध्ये पुनस्संस्कारे यथासंभवं दिनं शोध्यम् । कालान्तरेतु शोध्यमेव । संवत्सरादूर्ध्वं प्रेतकार्येषु उत्तरायणम् श्रेयान् तत्रापि कृष्णपक्षः नन्दायात्रयोदशिदिनर्क्षञ्च

वर्जयेत्। शुक्रशनिवासरौ वर्ज्यौ। नक्षत्रेषु भरणिकृत्तिकार्द्रामघाधनिष्ठापञ्चकं त्रिपुष्कराणि च। अतिदुष्टानि सर्वथा वर्जनीयानि व्यतीपातपरिघवैधृतौ च योगे वृष्टिकरणे चतुर्थाष्टमद्वादशस्थे चन्द्रे चातिदोषः। रोहिणीमृगशीर्ष पुनर्वसू पूर्वोत्तरा चित्राविशाखानूराधा पूर्वाषाढोत्तराषाढादीनि द्विपुष्कराणि दुष्टानि संभवे वर्ज्यानि। शिष्टान्यदुष्टानि सर्वथा दिनशुध्यसंभवे अनतिदुष्टं ग्राह्यनक्षत्रं ग्राह्यम्। न पुनस्संस्कारे अन्तरं ग्राह्यम्। नन्दायां शुक्लचतुर्दश्यां त्रिजन्मनक्षत्रेषु एकोद्दिष्टमतिनिषिद्धम्। तत्र तिथ्यादि नैव शोध्यम्। युगादिमन्वादिसंक्रांत्यमासु प्रेतकार्ये पुनस्संस्कारे किञ्चिदपि नैव शोध्यम्॥

इति पालाशविधिस्समाप्तः

अथ ऊनमासिकानि

सप्तविंशतिदिनादूर्ध्वं त्रियाहस्यूनमासिकम्।
चत्वारिंशद्दिनादूर्ध्वं पञ्चाहस्सु त्रिपक्षिकम्॥

तथा दशसु षण्मासं सप्तत्यतिशतात्परम्।
ऊर्ध्वं पञ्चदशाहस्सु चत्वारिंशच्छतत्रयात्॥

ऊनाब्दिकं प्रकुर्वीत मृतेहनि पुनराब्दिकम्।
पक्षत्रिपञ्चकं कृत्वा आदिमध्यान्तपञ्चके॥

त्रिपक्षिकोनषाण्मासि एकोनाब्दिकमाचरेत्।
अन्त्यमध्यादिषु क्रमादित्यपरः पाठः॥

अथ सपिण्डीकरणम्

अथ पवित्रधारणमन्त्रः

पवित्रं ते नकुलो ब्रह्मा त्रिष्टुप्। आभ्यां पवित्रधारणे विनियोगः॥

पवित्रन्ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः।
अतप्ततनूर्नतदामो अश्नुते श्रितास इद्वहन्तस्तत्समासत॥

पवित्रवन्तः परिवाचमासते पितैषां प्रत्नो अभिरक्षति व्रतम्।
महस्समुद्रं वरुणस्तिरोदधे धीरा इच्छेकुर्धरुणेष्वारभम्॥

इति मन्त्रेण पवित्रं धृत्वा। प्रणवस्य परब्रह्मऋषिः परमात्मा देवता देवीगायत्रीच्छन्दः प्राणायामे विनियोगः ओं भू + परमेश्वरप्रीत्यर्थं श्रीगोविन्द गोविन्द + पुण्यतिथौ प्राचीनावीती अस्मत्पितुः गोत्रस्य + द्वादशेऽहनि सपिण्डीकरणाख्य पार्वण एकोद्दिष्ट अन्नश्राद्धे कर्तृगृहभूभाण्डपदार्थानां आत्मद्रव्यस्थलशुध्यर्थं तात्कालिकवैश्वदेवसूक्तमन्त्रपठनं करिष्य इति संकल्प्य। कलशस्याधोभागे वर्तुलमण्डलं कृत्वा मण्डलोपरि दर्भतिलाक्षतान्निक्षिप्य इमं मे गङ्गे यमुने सरस्वति शुतुद्रिः स्तोमं सचतापरुष्णिया। असिक्रिया मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया। शराशः कुशरासः दर्भासस्सैर्याउत। मौंजा अदृष्टा वैरिणास्सर्वे साकन्नयलिप्सत। इति कूर्चम्। सव्यं गन्धद्वारामिति गन्धान्निक्षिप्य। यवोसीति यवम्। प्राचीनावीती तिलोसीति तिलान्निक्षिप्य॥

ममाग्न इति नवर्चस्य सूक्तस्य विहव्यो विश्वेदेवास्त्रिष्टप्। अंत्या जगती। वैश्वदेवसूक्तमन्त्रपठने विनियोगः॥

ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेन्धानास्तन्वं पुषेम। मह्यं नमन्तां प्रदिशश्चतस्रस्त्वयाध्यक्षेण पृतना जयेम॥ मम देवा विहवे सन्तु सर्व इन्द्रवन्तो मरुतो विष्णुरग्निः। ममान्तरिक्षमुरुलोकमस्तु मह्यं वातः पवतां कामे अस्मिन्॥ मयि देवा द्रविणमायजन्तां मय्याशीरस्तु मयि देवहूतिः। दैव्या होतारोवनुषन्त पूर्वेरिष्टास्यातन्वा सुवीराः। मह्यं यजन्तु मम यानि हव्याकूतिरस्तत्या मनसो मे अस्तु। एनो मानिगमां कतमच्चनाहं विश्वे देवासो अधिवोचतानः। देवीष्षळुर्वीरुरुणः कृणोत विश्वेदेवास इह वीरयध्वम्॥ माहास्म हि प्रजया मातनूभिर्मारधाम द्विपते सोमराजन्। अग्ने मन्युं प्रतिनुदन् परेषामदब्धो गोपाः परिपाहि नस्त्वम्। प्रत्यञ्चो यन्तु निगुतः पुनस्ते३मैषां चित्तं प्रबुधां विनेशत्। धाता धातॄणां भुवनस्य यस्पतिर्देवं त्रातारमभिमातिषाहम्। इमं यज्ञमश्विनोभा बृहस्पतिर्देवा यजमानं न्यर्थात्॥ ऊरुव्यचानोमहिषश्शर्म यंसदस्मिन् हवे पुरुहूतः पुरुक्षुः। सनः प्रजायै हर्यश्व मृळयेन्द्र मानोरीरिषो मापरदाः। येनस्सत्पत्ना अपते भवंत्विद्राग्निभ्यामववाधामहे तान्। वसवो रुद्रा आदित्या उपरिस्पृशं मोग्रं चेत्तारमधिराजमक्रन्। अर्वाचमिन्द्रममुतो हवामहे यो गोजिद्धनजिदश्वजिद्यः। इमन्नो यज्ञं विहवे जुषस्वास्य कुर्मो हरिवो मेदिनं त्वा॥

शारीरषट्कस्यात्मा ऋषिः सत्यो देवता प्रकृतिपुरुषं छन्दः मम शरीरशुध्यर्थे जपे विनियोगः॥

शारीरमन्तःकरणोपघातं वाचश्च विष्णुर्भगवानशेषः।
शमन्नयं त्वस्तु ममेह शर्म पापादनं ते हृदि सन्निविष्टे॥

अंतश्शुद्धिं बहिश्शुद्धिं शुद्धो धर्ममयोच्युतः।
स करोत्वमले तस्मिन् शुचिरेवास्मि सर्वदा॥

बाह्योपघातानघः बोद्धश्च भगवानजः ।
शमं नयन्त्वनन्तात्मा विष्णुश्चेतसि संस्थितः ।
शारीरं मे हृषीकेश पुण्डरीकाक्ष मानसम् ॥

पापं प्रशमयाद्य त्वं वाक्कृतं मम माधव ।
यद्यप्युपहतैः पापैर्यदि वात्यन्तदुष्कृतैः ॥

तथापि संस्मरेद्विष्णु सर्वपापैः प्रमुच्यते ।
एतोन्विन्द्रं स्तवाम शुद्धं शुद्धेन साम्ना ।
शुद्धैरुक्थैर्वा वृध्वांसं शुद्ध आशीर्वान्ममतु ॥

इन्द्र शुद्धो न आगहि शुद्धश्शुद्धाभिहातिभिः ।
शुद्धो रयिन्निधारय शुद्धो म मद्धिसोम्यः ॥

इन्द्र शुद्धो हि नो रयिं शुद्धो रत्नानि दाशुषे ।
शुद्धो वृत्राणि जिघ्नसे शुद्धो वाजं सिषाससि ॥

अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा ।
यः स्मरेत्पुंडरीकाक्षं सबाह्याभ्यन्तरश्शुचिः ॥

सर्वाणि स्थलानि शुचीनि भवन्तु । इति आत्मानं ब्राह्मणांश्च प्रोक्ष्य । सकुशतिल-हिरण्यमादाय समस्तसम्पदिति ब्राह्मणान् त्रिः प्रदक्षिणीकृत्य

समस्तसम्पत्समवाप्तिहेतवः समुत्थितापत्कुलधूमकेतवः ।
अपारसंसारसमुद्रसेतवः पुनन्तु मां ब्राह्मणपादपांसवः ॥

आपद्घनध्वान्तसहस्रभानवः समीहितार्थार्पणकामधेनवः ।
समस्ततीर्थांबुपवित्रमूर्तयः रक्षन्तु मां ब्राह्मणपादपांसवः ॥

आधिव्याधिहरं नृणां मृत्युदारिद्र्यनाशनम् ।
श्रीपुष्टिकीर्तिदं वन्दे विप्रश्रीपादपंकजम् ॥

विप्रौघदर्शनात्सद्यः क्षीयन्ते पापराशयः ।
वन्दनान्मङ्गळावाप्तिः अर्चनादच्युतं पदम् ॥

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।

जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

यावतीर्वै देवतास्तास्सर्वा वेदविदि ब्राह्मणे वसन्ति तस्माद्ब्राह्मणेभ्यो वेदविद्भ्यो दिवे दिवे नमस्कुर्यात् नाश्लीलं कीर्तयेदेता एव देवताः प्रीणाति । प्रणम्य दक्षिणां दत्वा । (नमो देवेभ्यः । प्राचीनावीती स्वधा तत्पितृपितामहप्रपितामहेभ्यः) अस्मत्पितुः + द्वादशेहनि सपिण्डीकरणाख्य पार्वणएकोद्दिष्टान्नश्राद्धं कर्तुं मुख्यकाले भूत्वा ममाधिकारसंपदस्त्विति भवन्तो ब्रुवन्तु । अधिकार-संपदस्त्विति ब्राह्मणाः प्रतिब्रूयुः । सव्यं ओं ओं संकल्प्य पुण्यतिथौ कावेर्याः दक्षिणतटे रङ्गमण्डलभास्करक्षेत्र सालग्रामहरिविश्वेश्वरदेवब्राह्मणसन्निधौ स्वगृहे (धर्मगृहे) प्राचीनावीती अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेतत्वविमुक्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणादिनादारभ्य अद्य द्वादशेहनि अस्मत्पितामहप्रपितामहवृद्धप्रपितामहैः गोत्रैश्शर्मभिः वसुरुद्रादित्यस्वरूपैस्सह समानोदकत्वसापिण्ड्यसिद्धिद्वारा वस्वादिपितृलोकावाप्त्यर्थं पितुः गोत्रस्य शर्मणः प्रेतस्य एकोद्दिष्ट-विधानेन तत्पितृपितामहप्रपितामहानां पार्वणविधानेन एवं पार्वणएकोद्दिष्टोभयात्मकं सव्यं कालकामुकसंज्ञकाविश्वेदेवपूर्वकं विष्ण्वन्तं च प्राचीनावीती । (पितुः सपिण्डीकरणाख्यान्नश्राद्धं) पृथक्पाकेनाद्य करिष्य इति संकल्प्य । स्वयं हस्तोदकं गृहीत्वा सव्यं विश्वेदेव ब्राह्मणहस्ते हस्तोदकं निमित्तब्राह्मणहस्ते पितृब्राह्मणहस्ते हस्तोदकं दत्वा कालकामुकसंज्ञकविश्वेषां देवानां स्थाने आह्वनीयार्थे क्षणं दत्वा भवद्भिः क्षणः प्रसादः करणीयः । ओं तथा प्राप्नुवन्तु भवन्तः प्राप्नवाम ब्राह्मणः । प्राचीनावीती अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थं उत्तमलोका-वाप्त्यर्थं मरणादिनादारभ्य अद्य द्वादशेहनि सपिण्डीकरणाख्यपार्वण एकोद्दिष्टान्नश्राद्धे प्रेतार्थे अयं ते क्षणः उपतिष्ठतु पितामहप्रपितामहवृद्धप्रपितामहानां गोत्राणां शर्मणां वसुरुद्रादित्यस्वरूपाणां स्थाने आह्वनीयार्थे क्षणं दत्वा भवद्भिः क्षणः प्रसादः करणीयः ओं तथा प्राप्नुवन्तु भवन्तः प्राप्नवाम ब्राह्मणः सव्यं स्वागतं सुस्वागतमिति ब्राह्मणाः देवानां च प्राचीनावीती प्रेतपूर्वकपितामहप्रपितामह-वृद्धप्रपितामहानां च स्वागतम् ॥

अक्रोधनैश्शौचपरैः सततं ब्रह्मवादिभिः ।
भवितव्यं भवद्भिश्च मया च श्राद्धकर्मणि ॥

अथ मण्डलपूजा

अथ मण्डलविधिः

उत्तरे चतुरश्रं मध्ये त्रिकोणं दक्षिणे वर्तुलप्रादेशमात्रं देवानां मण्डलं चतुरश्रं वितस्तिमात्रं

पित्रर्थं प्रेतार्थं तयोर्मण्डलं षडङ्गुलिः ॥ देवपाद्यस्थाने इदमासनं पाद्यस्थाने अर्चेत प्रार्चेत इमे गन्धाः इमे अक्षताः इमे कुशाः अष्टार्ध्यैस्संपूर्णार्चनं अस्तु ॥

प्राचीनावीती मध्यमण्डले तिलदर्भगन्धाः उपतिष्ठन्तु पितामहपाद्यस्थाने इदमासनं पाद्यस्थाने अर्चेत प्रार्चेत इमे गन्धाः इमे तिलाः इमे कुशाः अष्टार्ध्यैः संपूर्णार्चनं अस्तु । सव्य कालकामुकसंज्ञकविश्वेदेवाः स्वागतमिति दर्भेण पादौ स्पृश्य उत्तरे विसृजेत् स्वागतमिदं वः पाद्यं सुपाद्यं इति ब्राह्मणः ॥ शन्नोदेवीरभिष्टय आपो भवन्तु पीतये शंयोरभिस्रवन्तु नः इति उक्त्वा । नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च । जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥ प्राचीनावीती पितः गोत्र शर्मन् प्रेत सपिण्डीकरणाख्यपार्वणएकोद्दिष्ट अन्नश्राद्धे प्रेतार्थे पाद्यमुपतिष्ठतु इति तिलमिश्रजलं दत्वा सव्यं पितामहप्रपितामहवृद्धप्रपितामहाः स्वागतमिति दर्भेण पादौ स्पृश्य दक्षिणतो विसृजेत् प्राचीनावीती पादप्रक्षाळनार्थं तिलमिश्रजलं स्वागतमिति पादप्रक्षाळनं कारयित्वा सव्यं कृत्वा देवपाद्यस्थाने स्थितजलाम्बु शिरसि प्रोक्षयेत् ॥

अथ स्मृतिः

स्वागते स्वस्तिवचने गोत्रे शेषप्रदक्षिणे ।
अर्घ्ये च दक्षिणादाने षट्सु सव्यं विधीयते ॥

यदीप्ससि महाराजन्सर्वतीर्थावगाहनम् ।
विप्रपादविनिर्मुक्तं तोयं शिरसि धारय ॥

इत्युक्त्वा धारयेत् । कर्ता पवित्रं विसृज्य ईशान्यभागे पादौ प्रक्षाल्याचम्य ॥

इति पादप्रक्षाळनविधिः ॥

अथाचमनविधिः

मण्डलात्पुरतो देवाः पितरश्चोत्तरे तथा ।
कर्ता कुर्वीत ईशान्ये श्राद्धेष्वाचमनं विधिः ॥

अथासनविधिः

प्राङ्मुखौ च देवतानि निमित्तः पश्चिमो मुखः ।
पितामह उदङ्मुख विष्णुस्सर्वतोमुखश्च ॥

विष्णुं यथासुखमुपवेश्य कालकामुकसंज्ञकविश्वेदेवाः साध्वं सुखमास्सिहि अत्र उपविशन्तु भवन्तः अत्र उपविशामः इति ब्राह्मणः ॥ अयं वो विष्टरः इति पाठान्तरम्। प्राचीनावीती अस्मत्पितः गोत्र शर्मन्प्रेत विष्टर उपतिष्ठतु। पितामहप्रपितामहवृद्धप्रपितामहाः स्वधास्तामयं वो विष्टरः अत्र उपविशन्तु भवन्तः अत्र उपविशामः ॥

सव्यं ओं ओं अद्य पूर्वोक्त + प्राचीनावीती अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य + सपिण्डीकरणाख्यपार्वणएकोद्दिष्टअन्नश्राद्धे भवदनुज्ञया प्रक्रान्तं श्राद्धकर्म करिष्य इति संकल्प्य निमित्तस्थाने अपहतः असुरः रक्षः पिशाचः यः क्षयन्ति पृथिवीमनु अन्यत्रेतो गच्छतु यत्रास्य गतः मनः ॥ इति त्रिकोणमण्डलं कृत्वा तदुपरि तिलाद्भिरवोक्ष्य सव्यं ओं ओं अद्यपूर्वोक्त-एवंगुणविशेषणविशिष्टायां पुण्यतिथौ प्राचीनावीती अस्मत्पितुः सपिण्डीकरणश्राद्धे भवदनुज्ञया प्रक्रान्तं श्राद्धकर्म करिष्य इति संकल्प्य तिलान् गृहीत्वा पितामहस्थाने अपहता असुरा रक्षांसि पिशाचाः ये क्षयन्ति पृथिवीमनु। अन्यत्रेतो गच्छन्तु यत्रैषां गतं मनः। निमित्तस्थाने भूशुद्धिं कृत्वा तिलान्विकीर्य उदीरतामवर उत्पर उन्मध्यमः प्रेतस्सोस्य असुं य इयाय अवृक ऋतज्ञ स नोवतु प्रेतो हवे इति तिलाद्भिरवोक्ष्य। सव्यं विश्वेदेवस्थाने भूशुद्धिं कृत्वा गायत्र्या यवोदकैः प्रोक्ष्य। विष्णोर्विश्वेदेववत् दर्भाक्षतान्निक्षिप्य अन्नं गायत्र्या प्रोक्ष्य—

अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा।
यः स्मरेत्पुण्डरीकाक्षं सबाह्याभ्यन्तरश्शुचिः ॥

श्राद्धार्थं सम्पादिताः पदार्थाः पक्काः देशतः कालतश्च मुख्यकालो भूत्वा श्राद्धयोग्या भवंत्विति भवन्तो ब्रुवंतु श्राद्धयोग्या भवंत्विति ब्राह्मणाः प्रतिब्रूयुः।

श्राद्धकाले गयां ध्यात्वा ध्यात्वा देवं जनार्दनम्।
वस्वादींश्च पितॄन् ध्यात्वा ततश्श्राद्धं प्रवर्तये ॥

प्रवर्तय इति ब्राह्मणाः प्रतिब्रूयुः ॥ देवसान्निधौ उदङ्मुख उपविश्य कालकामुक-संज्ञकानां विश्वेषां देवानां इदमिदमासनं दाक्षिणतः प्रदायापो दद्यात्। आस्यतां धर्मोसि आपः विश्वेदेवार्थे क्षणः क्रियतां ओं तथा प्राप्नुवन्तु भवन्तः अभ्युक्षितायां भुवि प्रागग्रेषु दर्भेषु पात्रद्वयमेकं वा न्यग्बिलमासाद्योत्तानयित्वा प्रोक्ष्य प्रागग्रदर्भानन्तर्धायाप आसिच्य शन्नो देवीरभिष्टय आपो भवन्तु पीतये शंयोरभिस्रवन्तु नः युगपदभिमन्त्र्य।

यवोसि धान्यराजो वा वारुणो मधुसंयुतः ।
निर्णोदस्सर्वपापानां पवित्रमृषिभिः स्मृतम् ॥

इति मन्त्रावृत्या प्रतिपात्रं यवानोप्य । अर्घ्यपात्रयोरर्चत प्रार्चत इमे गन्धाः इमानि श्री तुलसीदर्भतृणानि च एतानि निक्षिप्य देवपात्रे सम्पन्ने सुसम्पन्नं इत्युक्ते स्वाहार्घ्यौ इति कूर्चेण कलशोदकं पत्रपुटयोर्निक्षिप्य कालकामुकविश्वान्देवान् भवत्स्वावाहयिष्ये साक्षतदर्भौ गृहीत्वा निरङ्गुष्ठं हस्तं गृहीत्वा विश्वेदेवास आगतश्रृणताम इमं हवम् । एदं बर्हिर्निषीदत । विश्वेदेवाः शृणुतेमं हवं मे ये अन्तरिक्षे य उपद्यविष्ठ ये अग्निजिह्वा उतवा यजत्रा आसद्यास्मिन बर्हिषि मादयध्वं इति पादादिमूर्धांतं यवा(न्निक्षिप्य)न्विकीर्य ॥

आगच्छन्तु महाभागा विश्वेदेवा महाबलाः ।
ये अत्र विहिताः श्राद्धे सावधाना भवन्तु ते ॥ सावधानोस्मि ब्राह्मणः

हस्तोदकं दत्वा कालकामविश्वेदेवा इदं वो अर्घ्यं स्वाहा नमः अस्त्वर्घ्यं या दिव्या आपः पृथिवी सम्बभूवुः या अन्तरिक्ष्या उत पार्थिवीर्याः हिरण्यवर्णा यज्ञियास्ता न आपः शं स्योना भवन्तु ततश्शुद्धोदकं एवं द्वितीयस्य दद्यात् ततश्शुद्धोदकं अर्चतप्रार्चत प्रियमेधासो अर्चत । अर्चंतु पुत्रका उत पुरं न धृष्ण्वर्चत । प्रार्चत इति मन्त्रेण यवैरभ्यर्च्य । गन्धद्वारां धुराधर्षां नित्यपुष्टां करीषिणीं । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियं । कालकामुकसंज्ञक विश्वेदेवाः यथाभागशोमी वो गन्धाः सुगन्धाः हस्तोदकं दत्वा द्विर्द्विर्दद्यात । आयने ते परायणे+इमे अलंकरणार्थे इमे तिलाः । माल्यार्थे इमानि श्रीतुलसी दळानि सुगन्धाः सुतिलाः सुदळानि इति ब्राह्मणाः प्रतिब्रूयुः । उदकेनैव सांकाल्पिको वो धूपः सुधूपः ज्वालाभिधेन सूर्यस्थितं वो ज्योतिः सुज्योतिः । युवा सुवासाः परिवीत आगात्सउ श्रेयान् भवति जायमानः तं धीरासः कवय उन्नयन्ति स्वाध्यो ३ मनसा देवयन्तः कालकामुकविश्वेदेवाः वः आच्छादनार्थं इदं वस्त्रं सर्वोपचारार्थे साक्षता इमे कुशाः सुकुशाः अर्चन-विधेयं सम्पूर्णं सङ्कल्पसिद्धिरस्त्विति भवन्तो ब्रुवन्तु अस्तु सङ्कल्पसिद्धिः ।

युष्मदनुज्ञया प्रेतपूर्वकतात्पित्राद्यर्चनं करिष्य इति सङ्कल्प्य । प्राचीनावीती अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य+अन्नश्राद्धे प्रेतार्थे इदं ते आसनमुपतिष्ठतु । अयं ते क्षणः उपतिष्ठतु । तत्पितृपितामहप्रपितामहानामिदमिदमासनं आस्यतां धर्मोसि आपः अस्मत्पितुः सपिण्डीकरणश्राद्धे क्षणः क्रियतां ओं तथा प्राप्नुवन्तु भवन्तः प्राप्नवाम इति प्रतिवचनं प्रेतपित्रोर्मध्यदेशे निमित्तार्थं बृहदर्घ्यपात्रमासाद्य (निमित्तस्थानस्थितब्राह्मणस्याग्रे भुवि अर्घ्यपात्रमेकं निधाय तदग्रे त्रीण्यर्घ्यपात्रा-ण्यासाद्य) उत्तानयित्वा प्रोक्ष्य कुशचतुष्टयं प्रेतपात्रे निधाय उदकं पूरयित्वा शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शंयोरभिस्रवन्तु नः ॥

तिलोसि सोमदेवत्यो गोसवे देवनिर्मितः ।
प्रत्नवद्भिः प्रत्न स्वधया प्रेत इमान् लोकान्प्रीणयाहि ॥

प्रेतपात्रे तूष्णीं तृणगन्धाः उपतिष्ठन्तु तिलाः उपतिष्ठन्तु उपतिष्ठतामर्घ्यः। प्रेतपात्रं सम्पन्नं सुसम्पन्नं तत्पश्चिमभागे पात्रत्रयमासाद्य प्रोक्ष्य उत्तानयित्वा पुनः प्रोक्ष्य (अभ्युक्षितायां भुवि त्रीण्यर्घ्यपात्राणि स्युः।) शन्नो देवीरभिष्टय आपो भवन्तु पीतये शंयोरभिस्रवन्तु नः ॥

तिलोसि सोमदेवत्यो गोसवे देवनिर्मितः । प्रत्नवद्भिः प्रत्न स्वध येहि पितामह इमान् लोकान्प्रीणयाहि नः स्वधा नमः प्रपितामह इमान् लोकान् प्रीणयाहि नः स्वधा नमः । वृद्धप्रपितामह इमान् लोकान् प्रीणयाहि नः स्वधा नमः ॥ पृथक्तिलावपनं अर्घ्यपात्रेषु। अर्चत प्रार्चत इमे गन्धाः इमे तिलाः इमानि भृङ्गराजदर्भतृणानि च तत्पितृपात्राणि सम्पन्नानि सुसम्पन्नानि इति ब्राह्मणः प्रतिवचनं। स्वधार्घ्यः स्वधार्घ्यः स्वधार्घ्यः इति त्रिः ॥

आयाहि प्रेत सौम्य गम्भीरैः पथिभिः पूर्वैः प्रजामस्मभ्यं ददतो रयिं च दीर्घायुत्वं च शतशारदं च ॥ अस्मत्पितरं गोत्रं शर्माणं प्रेतं आवाहनमुपतिष्ठतु तत्पितृपितामहप्रपितामहान् गोत्रान् शर्मणः वसुरुद्रादित्यस्वरूपान् भवत्सु आवाहयिष्ये॥ उशन्तस्त्वेति दमनोग्निस्त्रिष्टुप् तत्पित्राद्यावाहने विनियोगः ॥ उशन्तस्त्वा निधीमह्युशन्तस्समिधीमहि। उशन्नुशत आवह पितॄन् हविषे अत्तवे ॥ तत्पितृपितामहप्रपितामहानावाहयामि ॥

आयन्तु नः पितरस्सोम्यासोग्निष्वात्ताः पथिभिर्देवयानैः ।
अस्मिन् यज्ञे स्वधया मदन्त्वधिब्रुवन्तु ते अवन्त्वस्मान् ॥

सावधाना भवन्तु ते सावधानोस्मीति ब्राह्मणः।

अशेषे स्वीकृत्य अशेषे हे परिषत्भवत्पादमूले मया समर्पितां इमां सौवर्णीं दक्षिणां यथोक्तदक्षिणामिव स्वीकृत्य दक्षिणां दत्वा गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिनादारभ्य द्वादशेहनि सपिण्डीकरणाख्यपार्वणएकोद्दिष्टान्नश्राद्धे अर्घ्यसंयोजनं कर्तुं योग्यतासिद्धिरस्त्विति भवन्तः अनुगृह्णन्तु योग्यतासिद्धिरस्त्विति प्रतिवचनं सव्यं ओं ओं अद्य पूर्वोक्तएवंगुणविशेषणविशिष्टायां पुण्यतिथौ प्राचीनावीती अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिनादारभ्य अद्य द्वादशेहनि सपिण्डीकरणाख्यपार्वणएकोद्दिष्टान्नश्राद्धे पितामहप्रपितामहवृद्धप्रपितामहैः गोत्रैः शर्मभिः वसुरुद्रादित्यस्वरूपैस्सह समानोदकत्वसापिण्ड्यसिद्धिद्वारा वस्वादिपितृलोकावाप्त्यर्थं अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य त्वदर्घ्यभागप्रथमद्वितीयतृतीयांशान्

पितामहप्रपितामहवृद्धप्रपितामहानां (तत्पितृपितामहप्रपितामहानां) गोत्राणां शर्मणां वसुरुद्रादित्यस्वरूपाणां पात्रस्थउदकैस्सह संयोजयिष्ये संयोजयेति प्रतिवचनं । प्रेतपात्रे तत्पितृपितामहप्रपितामहपात्रेषु मधूनि निक्षिपेत् ॥

अथ मन्त्राः मधु वाता ऋतायते मधुक्षरन्ति सिन्धवः माध्वीर्नस्सन्त्वोषधीः मधु । मधु नक्तमुतोषसोमधुमत्पार्थिवंरजः मधु द्यौरस्तु नः पिता मधु । मधुमान्नो वनस्पतिः मधुमां अस्तु सूर्यः माध्वीर्गावो भवन्तु नः मधु । एवं तत्पितृपात्रेषु मधु निक्षिपेत् प्रेतपात्रोदकं किञ्चिदादाय अस्मत्पितः गोत्र शर्मन्प्रेत त्वदर्घ्यभागप्रथमांशः पितामहेन गोत्रेण शर्मणा वसुरूपेण सह एष ते अर्घ्यभागस्संयुक्तः इति गृहीतमुदकं पितामहपात्रे निनीय तस्मै ते स्वधा नमः (ये समानास्समनसः पितरो यमराज्ये । तेषां लोकस्स्वधा नमो यज्ञो देवेषु कल्पतां । ये सजातास्समनसः जीवा जीवेषु मामकाः तेषां श्रीर्मयि कल्पतां अस्मिंल्लोके शतं समाः ॥) समानीवस्संज्ञानमनुष्टुप् अर्घ्यसंयोजने विनियोगः । समानीव आकूतिस्समाना हृदयानि वः । समानमस्तु वो मनो यथा वस्सुसहासति । अनेन संयोज्य कृष्णस्मरणं कृत्वा पुनः प्रेतपात्रोदकं किञ्चिदादाय अस्मत्पितः गोत्र शर्मन्प्रेत त्वदर्घ्यभागद्वितीयांशः (अस्मत्) प्रपितामहेन गोत्रेण शर्मणा रुद्ररूपेण सह एष ते अर्घ्यभागस्संयुक्तः इति प्रपितामहपात्रे निनीय तस्मै ते स्वधा नमः (ये समाना येसजाता इत्यभिमन्त्र्य) समानीव आकूतिः+सति इति वाभिमन्त्र्य कृष्ण कृष्ण कृष्ण इति स्मरणं कृत्वा पुनः प्रेतपात्रस्थोदकं किञ्चिदादाय अस्मत्पितः गोत्र शर्मन्प्रेत त्वदर्घ्यभागतृतीयांशः वृद्धप्रपितामहेन गोत्रेण शर्मणा आदित्यरूपेण सह एष ते अर्घ्यभागस्संयुक्तं तस्मै ते स्वधा नमः ये समाना ये सजाता समानीव इतिवाभिमन्त्र्य कृष्णस्मरणं कुर्यात् । ततः निमित्तस्थाने हस्तोदकं दत्वा प्रेतपात्रमादाय अस्मत्पितः गोत्रशर्मन्प्रेत प्रेततृप्त्यर्थं उत्तमलोकावाप्त्यर्थं मरणदिनादारभ्य ० सपिण्डीकरणाख्यान्नश्राद्धे प्रेतार्थे अर्घ्यमुपातिष्ठतु इति अर्घ्यं दत्वा तत्पात्रं छित्वा पृष्ठतो विसृजेत् ॥

इहलोकं परित्यज्य गतोसि परमां गतिम् ।
मनसा वायुरूपेण विप्रे त्वां योजयाम्यहम् ॥

एकोद्दिष्टे निषिद्धं तु यदपावाहनादिकम् ।
तत्सपिण्डीकृते त्वेकोद्दिष्टे सर्वं समाचरेत् ॥

तत्पितृस्थाने हस्तोदकं दत्वा सव्यं (तत्पितः) (अस्मत्पितामह गोत्र शर्मन् वसुरूप इदं ते अर्घ्यं स्वधा नमः प्राचीनावीती या दिव्या आपः पृथिवी संबभूवुः या अन्तरिक्ष उत पार्थिवीर्याः । हिरण्यवर्णा यज्ञियास्तान आपश्शं स्योना सुहवा भवन्तु पुनः हस्तोदकं दत्वा गृहीत्वा सव्यं कृत्वा एवं

सव्यं पितामह इदं ते अर्घ्यं स्वधा नमः, अस्त्वर्घ्यं, प्राचीनावीती या दिव्या आपः + भवन्तु ततश्शुद्धोदकं सव्यं प्रपितामह इदं ते अर्घ्यं स्वधा नमः अस्त्वर्घ्यं प्राचीनावीति या दिव्याः आपः+ भवन्तु ततश्शुद्धोदकं । सव्यं वृद्धप्रपितामह इदं ते अर्घ्यं स्वधा नमः अस्त्वर्घ्यं प्राचीनावीती या दिव्या आपः + भवन्तु ततश्शुद्धोदकं सव्यं इतरार्घ्यपात्रशेषां (पितामहपात्रे) निनीय ताभिरद्भिः पुत्रकामो मुखमनक्ति ॥ प्राचीनावीती तत्पात्रं नोद्धरेदासमाप्तेः पितृभ्यस्थानमसीति न्युब्जं कुर्यात् ॥ प्रेतार्चनं अस्मत्पितः + प्रेत गन्धाः उपतिष्ठन्तु तिलाः उपतिष्ठन्तु सर्वोपचारार्थे सतिलदर्भमुपतिष्ठतु ॥ तिलान्विकीर्य पितामहस्थाने अर्चत प्रार्चत इति गन्धद्वारामिति पितामहप्रपितामहवृद्धप्रपितामहाः यथाभागशर्मा वो गन्धाः अलङ्करणार्थे इमे तिलाः माल्यार्थे इमानि श्रीतुलसीदलानि धूरसीति उदकेनैव सांकल्पिकं वो धूपः सुधूपः उद्दीप्यस्वेति मुखसमीपे एष वो दीपः सुदीपः प्रतिवचनं अथवा ज्वालाभेन अस्तु स्थितं वा ज्योतिः सुज्योतिः प्रतिवचनम् ॥

युवा सुवासाः परिवीत आगात्स उ श्रेयान् भवति जायमानः ।
तं धीरासः कवय उन्नयन्ति स्वाधियो(३) मनसा देवयन्तः ॥

पितामहप्रपितामहवृद्धप्रपितामहाः वः आच्छादनार्थं वस्त्रयुग्मं सर्वोपचारार्थे सतिला इमे कुशाः अर्चनं संपूर्णं संकल्पसिद्धिरस्त्विति भवन्तो ब्रुवन्तु अस्तु संकल्पसिद्धिः युष्मदनुज्ञया श्राद्धसंरक्षकमहाविष्णोरर्चनं करिष्ये श्राद्धसंरक्षकमहाविष्णो इदमासनं क्षणःक्रीयतां ओं तथा प्राप्नुवन्तु भवन्तः प्राप्नुवाम । अर्घ्यपात्रमासाद्य प्रोक्ष्य उद्धृत्य उत्तानं प्रोक्ष्य यवान्विकीर्य उदकं पूरयित्वा शन्नोदेवीरभिष्टये आपो भवन्तु पीतये शंयोरभिस्रवन्तुनः यवोसि + स्मृतं अर्घ्यपात्रमर्चत प्रार्चत इमे गन्धाः इमे अक्षताः इमानि तुलसीदलानि दर्भतृणानि च विष्णुपात्रं सम्पन्नं सुसम्पन्नम् । श्राद्धसंरक्षकमहाविष्णुं भवत्स्वावाहयिष्ये । तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततं तद्विप्रासो विपन्यवो जागृवांसस्समिन्धते । विष्णोर्यत्परमं पदं श्राद्धसंरक्षकमहाविष्णुमावाहयामि हस्तोदकं दत्वा श्राद्धसंरक्षकमहाविष्णवे इदं ते अर्घ्यं या दिव्या + भवन्तु ॥ ततश्शुद्धोदकं विष्णुपात्रमसि अर्चनादि विश्वेदेववत् । सर्वोपचारार्थे साक्षता इमे कुशाः । अर्चनं संपूर्णं संकल्पसिद्धिरस्त्विति भवन्तो ब्रुवन्तु युष्मदनुज्ञया मण्डलोद्वर्तनं पात्रासादनं च करिष्ये ॥ कुरुष्वेति प्रतिवचनम् ॥

नैर्ऋतीं दिशमारभ्य ईशान्यन्तं समाचरेत् ।
तामेव दिशमारभ्य देवस्येति तदन्तिके ॥

तत्र यवकुशान्निक्षिप्य ।

ईशानीं दिशमारभ्य नैऋत्यन्तं प्रदक्षिणम् ।
तामेव दिशमारभ्य पैतृकस्य तदन्तिके ॥

तत्र तिलकुशान्निक्षिप्य विष्णोर्मण्डलं कृत्वा यवकुशान्निक्षिप्य ।

ब्रह्मा विष्णुश्च रुद्रश्च श्रीहुताशन एव च ।
मण्डले तत्र तिष्ठन्ति तस्मात्कुर्वन्तु मण्डलम् ॥

निमित्तान्नं पित्रन्नं च पृथक् पात्रद्वयेनादाय निमित्तान्नं घृतेनाक्त्वा सव्य ओं ओं अद्य पूर्वोक्तएवंगुणविशेषणविशिष्टायां पुण्यतिथौ प्राचीनावीती अस्मत्पितुः गोत्रस्य शर्मणः + सपिण्डीकरणाख्यान्नश्राद्धे प्रेताहुतिं होष्ये निमित्तान्नं किंचिदादायास्मत्पित्रे गोत्राय शर्मणे प्रेताय प्रेतत्वविमुक्तत्यर्थं उत्तमलोकावाप्त्यर्थं + सपिण्डीकरणाख्य पार्वणएकोद्दिष्टान्नश्राद्धे प्रेताय अमुष्मै यमाय च स्वाहा यमायेदं न मम । तदन्नं ब्राह्मणतत्पाकाग्नौ प्रक्षिपेत् ॥ सव्यं ओं ओं अद्य पूर्वोक्त एवंगुणविशेषणविशिष्टायां पुण्यतिथौ प्राचीनावीती अस्मत्पितुः सपिण्डीकरणश्राद्धे भवदनुज्ञया भवत्पाणावेव होमं करिष्ये । कुरुष्वेति ब्राह्मणः । सोमं पितृमन्तमग्निं कव्यवाहनं गृहसिद्धान्नद्रव्येण सद्यो यक्ष्ये । घृतप्लुतमन्नं द्वेधा विभज्य इदं सोमाय पितृमते इदमग्नये कव्यवाहनायेति इत्यभिमर्श्य ब्राह्मणहस्ते हस्तोदकं दत्वा दर्भान्निधाय दर्व्यामुपस्तीर्य मध्यात्पूर्वार्धात् अवदाय पात्रस्थमभिघार्य दर्वीस्थमभिघारयेत् । सोमाय पितृमते स्वधा नमः । सोमाय पितृमत इदं न मम पुनः दर्व्यामुपस्तीर्य + अग्नये कव्यवाहनाय स्वधा नमः अग्नये कव्यवाहनायेदं न मम तूष्णीमप्रदक्षिणं परिषिच्य सव्यं कृत्वा ओं च हिरण्यगर्भस्सारस्वतास्त्रिष्टुप् अग्निप्रार्थने विनियोगः ॥

ओं च मे स्वरश्च मे यज्ञोपचतेनमश्च यत्ते न्यूनं तस्मै ते उपयत्ते अतिरिक्तं तस्मै ते नमः स्वस्ति श्रद्धां मेधां यशः प्रज्ञां विद्यां बुद्धिं श्रियं बलमायुष्यं तेज आरोग्यं देहि मे हव्यवाहन । श्रियंदेहि मे हव्यवाहन ओंनम इति ॥ चतुस्सागरपर्यन्तं मो ब्राह्मणेभ्यः शुभं भवतु + अभिवाद्य ॥

अथाग्नौकरणविधिः पाणिहोमविधिश्च ।

पित्रर्थमुपविष्टानां सर्वेषामेव पाणिषु ।
विभज्य जुहुयात्पूर्वं सोमायेत्यादिमन्त्रतः ॥

विच्छिन्नाग्नौ सभार्यश्चेदग्नौ वाऽथ पितुः करे ।
विश्वेदेवकरे कुर्याद्ब्रह्मचार्यकलत्रतः ॥

निर्णयसिन्धौ :—

षोडशे मासिके चैव सपिण्डीकरणे तथा ।
पाणावेव तु होतव्यमन्यत्राग्नौ तु निक्षिपेत् ॥

अनग्निकस्य विप्रस्य तदन्नं हूयते करे ।
तदन्नमग्नौ प्रक्षिप्य शेषं पितृवदाचरेत् ॥

सर्वान्नपात्रान्प्रोक्ष्य दर्भान् तुलसीं निधाय । दैवं पात्रं प्रोक्ष्य पाणिभ्यां पात्रं स्पृष्ट्वा । पृथिवी ते पात्रं द्यौरपिधानं ब्रह्मणस्त्वा मुखे अमृतं जुहोमि स्वाहात्वाहविर्विद्यावतां प्राणापानयोर्जुहोमि अक्षितमसि मैषां क्षेष्ठा अमुत्रामुष्मि(न्)ल्लोके । इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पांसुरे स्वाहा विष्णो हव्यं रक्षस्व इति द्विजाङ्गुष्ठनिवेदनमन्त्रे निवेश्य कालकामुकसंज्ञकाविश्वेदेवा एतद्वो हव्यं सपरिकरं कालकामुकविश्वेदेवा देवता इदमन्नं ब्राह्मणस्तु आहवनीयार्थे दत्त दास्यमान्नं च आतुष्टेस्तत्सर्वं गयेयं भूः गदाधरो भोक्तान्नं ब्रह्माऽहं च ब्रह्मा भोक्ता च ब्रह्मा सर्वं खल्विदं ब्रह्मा (सु) कल्पितसौवर्णमयं पात्रं अक्षयवटच्छायेयं कालकामुकसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यः इदमिदमन्नममृतस्वरूपमातुष्टेर्जायमानं अक्षय्य तुष्ट्यर्थं यथाभागं हव्यमोंतत्सदमृतरूपेण स्वाहा (हव्यं) नमो न मम गयायां रुद्रपादादिसमस्तपादेषु दत्तमस्त्विति भवन्तो ब्रुवन्तु गयायां दत्तमस्तु (इति ब्राह्मणप्रतिवचनम्)

ये देवासो दिवोदासपुत्रः दिव्येकादशस्य परुच्छेपो ऋषिः उपस्थाने विनियोगः । ये देवासो दिव्येकादशस्थ । पृथिव्यामध्येकादशस्थ । अप्सुक्षितो महिनैकादशस्थ तेदेवासो यज्ञमिमं जुषध्वम् ।

आगच्छन्तु महाभागा विश्वेदेवा महाबलाः ।
ये अत्र विहिता श्राद्धे सावधाना भवन्तु ते ।
सावधानोस्मीति (भोक्तृप्रतिवचनम्) ॥

प्रेतपात्रं गायत्र्या प्रोक्ष्य प्राचीनावीती । तूष्णीं अप्रदक्षिणं परिषिच्य । हस्तोदकं दत्वा पाणिभ्यां पात्रं स्पृष्ट्वा । पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्त्वा मुखे अमृतं जुहोमि । इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पांसुरे अन्नं रक्ष द्विजांगुष्ठमन्त्रे निवेश्य रक्ष अस्मत्पितः गोत्र शर्मन् प्रेत एतत्ते अन्नं सपरिकरं प्रेतो देवता इदमन्नं सोपस्करं सव्यञ्जनं सपरिकरं सदक्षिणाकं सताम्बूलं सतिलापिधानउदकुम्भं अस्मत्पित्रे गोत्राय शर्मणे प्रेताय प्रेतत्वविमुक्त्यर्थं मरणदिनादारभ्य अद्य द्वादशाहनि सपिण्डीकरणाख्यपार्वण एकोद्दिष्टान्निश्राद्धे प्रेतत्वप्रद्वारा प्रेतत्व-विमुक्त्यर्थं उपतिष्ठतु इति तिलोदकं भूमौ निक्षिप्य ।

सव्यं पितामहभोजनपात्रं गायत्र्या प्रोक्ष्य प्राचीनावीती अप्रदक्षिणं परिषिच्य हस्तोदकं दत्वा पृथिवी ते पात्रं द्यौरपिधानं स्वधा त्वा कावविद्यावितां प्राणापानयोः जुहोमि अक्षितमसिमैषांक्षेष्ठा-मुत्रामुष्मिंल्लोके इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूळ्हमस्यपांसुरे स्वधा विष्णो कव्यं रक्षस्व। पितामहप्रपितामहवृद्धप्रपितामहाः एतद्वः कव्यं सपरिकरं पिताप्रपितामहवृद्धप्रपितामहाः। रूपा देवताः इदमन्नं कव्यं ब्राह्मणस्तु आहवनीयार्थे दत्तं दास्यमानं चातृप्तेः तत्सर्वं गयेयं भूः गदाधरो भोक्ता अन्नं ब्रह्मा अहं च ब्रह्मा भोक्ता च ब्रह्मा कल्पितरजतमयं पात्रमन्नं अक्षयवटच्छायायं अस्मत्पितामहप्रपितामहवृद्धप्रपितामहेभ्यः गोत्रेभ्यः शर्मभ्यः वसुरुद्रादित्य-स्वरूपेभ्यः इदमिदमन्न अमृतस्वरूपमातृप्तेर्दास्यमानं अक्षय्यतृप्त्यर्थं यथाभागं ओंतत्सत् अमृतरूपेण स्वधा स्वधा कव्यन्नमः न मम। गयायां रुद्रपादादिसमस्तपादेषु दत्तमस्त्विति भवन्तो ब्रुवन्तु। गयायां दत्त अस्तु इति प्रतिवचनम्। ये चेह पितरो ये च नेह यांश्च विद्म यां उच न प्रविद्म। त्वं वेत्थ यदि ते जातवेदः स्वधाभिः यज्ञं सुकृतं जुषस्व इतितिलदर्भउदकं भूमौ विसृज्य। सावधाना भवन्तु ते सावधानोस्मि॥

देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च।
नमः स्वधायै स्वाहायै नित्यमेव नमो नमः॥

ईशानः पितृरूपेण महादेवो महेश्वरः।
प्रीयतां भगवानीशः परमात्मा सदाशिवः॥

मन्त्रमध्ये क्रियामध्ये विष्णुस्मरणपूर्वकम्।
यत्किंचित्क्रियते कर्म तत्कर्म सफलं भवेत्॥

यज्ञेशाच्युत गोविन्द माधवानन्त केशव।
कृष्ण विष्णो हृषीकेश वासुदेव नमोस्तु ते॥

सप्त व्याधा दशार्णेषु मृगाः कालाञ्जने गिरौ।
चक्रवाकाश्शरद्वीपे हंसास्सरसि मानसे।
ये स्म जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः॥
प्रस्थिता दीर्घमध्वानं यूयं तेभ्योवसीदत।
अमूर्तानां च मूर्तानां पितॄणां दीप्ततेजसाम्॥
नमस्यामि सदा तेषां ध्यायिनां योगचक्षुषाम्।
चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च॥

हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ।
ब्रह्मार्पणं ब्रह्म हविः ब्रह्माग्नौ ब्रह्मणा हुतम् ॥
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ।

यज्ञेश्वरो हव्यसमस्तकव्यभोक्ताव्ययात्मा हरिरीश्वरोत्र ।
तत्सन्निधानादपयान्ति सद्यः रक्षांस्यशेषाण्यसुराश्च सर्वे ॥

त्वां योगिनश्चिन्तयन्ति त्वां यजन्ति च यज्वनः ।
हव्यकव्यभुगेकस्त्वं पितृदेवस्वरूपधृक् ॥

कर्ता क्रियाणां स स युज्यते क्रतुस्स एव तत्कर्म ॥
स्रुगादि यत्साधनमप्यशेषं हरेर्न किञ्चिद्व्यतिरिक्तमस्ति ॥

(प्राचीनावीती) देशकाल मन्त्रतन्त्र कर्तृभोक्तृ हविर्नियम स्थलद्रव्यादिभ्यः सर्वं न्यूनातिरिक्ताभ्यामिदं कर्माच्छिद्रमस्त्विति भवन्तो ब्रुवन्तु । सर्वं न्यूनातिरिक्ताभ्यामिदं कर्माच्छिद्रमस्त्विति प्रतिवचनम् । ओं ओं अद्य पूर्वोक्त + श्राद्धे अस्मत्पितरं गोत्रं शर्माणं प्रेतं पितामह प्रपितामह वृद्धप्रपितामहान् गोत्रान् शर्मणः वसुरुद्रादित्यस्वरूपान् (सव्यं) कालकामुक संज्ञकान् विष्णुं च उद्दिश्य मया क्रियमाणेन अनेन (प्राचीनावीती) अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य अस्मत्पितामह प्रपितामह वृद्धप्रपितामहानां गोत्राणां शर्मणां वसुरुद्रादित्यस्वरूपाणां एतेषां सर्वं सुगुणीभूत्वा कोटिशःकृतेन गयाश्राद्धेनेव अक्षय्यतृप्तिद्वारा पुनरावृत्तिरहितशाश्वतब्रह्मलोके निवाससिद्धिर्भूत्वा पितामह प्रपितामह वृद्धप्रपितामहैः गोत्रैः शर्मभिः वसुरुद्रादित्यस्वरूपैस्सह समानोदकत्व सापिण्ड्यसिद्धिद्वारा वस्वादिपितृलोकावाप्तिरस्त्विति भवन्तो ब्रुवन्तु इति साक्षतदर्भतिलोदकं भूमौ विसृजेत् । भोक्तारः पितृलोकावाप्तिरस्त्विति प्रतिवचनम् ॥

(निवीती) ईशानविष्णुकमलासनकार्तिकेय वह्नित्रयार्करजनीशगणेश्वराणाम् ।
(सभ्यावसथ्यदधिकण्वमतङ्गजानां) क्रौंचामरेन्द्रकलशोद्भवकाश्यपानां पादान्नमामि सततं पितृमुक्तिहेतोः ॥

इत्युत्तरस्यां दिशि तिलानवकिरेत् । इयं भूमिर्गया । (सव्यं) एते ब्राह्मणा भोक्तारो गदाधराः ।

गयायां धर्मपृष्ठेषु सदसि ब्रह्मणस्पतेः ।
गयाशीर्षे वटे चैव पितॄणां दत्तमक्षयम् ॥

तुलस्यक्षतानादाय —

एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः ।
त्रीँल्लोकान्व्याप्य भूतात्मा भुंक्ते विश्वभुगव्ययः ॥

अनेन ब्राह्मणभोजनेन भगवान् सर्वात्मकः सपिण्डीकरणाख्यान्नश्राद्धे ब्राह्मणभोजनेन प्रेतपूर्वतत्पितृपितामहप्रपितामह स्वरूपी श्रीवासुदेवः प्रीयतां तत्सद्ब्रह्मार्पणमस्तु । अथापोशनं प्रदाय कालकामुकसंज्ञकविश्वेदेवाः अमृतमस्तु । (प्राचीनावीती) अस्मत्पितः गोत्र शर्मन् प्रेत प्रेत भुञ्जतां पितामहप्रपितामहवृद्धप्रपितामहाः अमृतं भवतु (सव्यं) अमृतोपस्तरणमसि स्वाहा । निमित्तस्थानस्थितः प्राणाय स्वाहा । अपानाय स्वाहा । व्यानाय स्वाहा । उदानाय स्वाहा । समानाय स्वाहा । ब्रह्मणे स्वाहा । श्रद्धायां प्राणे निविष्टोमृतं जुहोमि । शिवो माविशाप्रदाहाय । प्राणाय स्वाहा । श्रद्धायामपाने निविष्टोमृतं जुहोमि । अपानाय स्वाहा । श्रद्धायां व्याने निविष्टोमृतं जुहोमि व्यानाय स्वाहा । श्रद्धायामुदाने निविष्टोमृतं जुहोमि । उदानाय स्वाहा । श्रद्धायां समाने निविष्टोमृतं जुहोमि । समानाय स्वाहा । ब्रह्मणे स्वाहा । ब्रह्मणि म आत्मामृतत्वाय । स्वामिनः यथासुखं जुषध्वम् ॥

अपेक्षितं याचितव्यं त्याज्यं चैवानपेक्षितम् ।
उपविश्य सुखेनैव भोक्तव्यं स्वस्थमानसैः ॥

विद्यमानपदार्थेषु यद्रोचते तद्ग्राह्यम् । यन्न रोचते तत्त्याज्यं उपविश्य सुखेन भोक्तव्यम् ॥ अभिश्रवणवर्जम् ।

आमश्राद्धे गयाश्राद्धे तीर्थश्राद्धानुमासिके ।
सपिण्डीकरणश्राद्धे न जपेत्पितृसूक्तकम् ॥

यदश्वस्य क्रविषो मक्षिकाश यद्वा स्वरौ स्वधितौ रिप्तमस्ति । यद्धस्तयोश्शमितुर्यन्नखेषु सर्वाताते अपि देवेष्वस्तु । मक्षिकाबाधानिवृत्तिरस्तु । तृप्तान् ज्ञात्वा पात्रत्रयेण अन्नं गृहीत्वा गायत्रीमुच्चार्य मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः माध्वीर्नस्सन्त्वोषधीः । मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः । मधु द्यौरस्तु नः पिता । मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः अक्षन्नमीमदन्त ह्यवप्रियाँ अधूषत । अस्तोषत स्वभानवो विप्रानविष्ठया मती । यो आन्विन्द्रते हरी । मधु मधु श्राद्धं सम्पन्नम् । सुसम्पन्नम् । एतच्छ्राद्धार्थं सम्पादितेषु पदार्थेषु यदिष्टं तत्प्रष्टव्यम् । सर्वं सम्पूर्णम् । कालकामुकसंज्ञकविश्वेदेवाः तृप्ताःस्थ तृप्ताःस्थ । तृप्ताःस्मः प्रतिवचनम् ॥

असोमपाश्च ये देवा यज्ञभागविवर्जिताः ।
तेषामन्नं प्रदास्यामि विकिरं वैश्वदैविकम् ॥

पुनर्मार्जनं । पृथग्यत्नं गृहीत्वा । (प्राचीनावीती) । अस्मत्पितः गोत्र शर्मन्प्रेत तृप्तोसि । तृप्तोस्मि । सदन्नं तत्रैव विसृजेत् । पृथगन्नं गृहीत्वा । पितामहप्रपितामहवृद्धप्रपितामहाः तृप्ताः स्थ । तृप्ताः स्थ । तृप्ताः स्थ । तृप्ताः स्मः प्रतिवचनम् ॥

असंस्कृतप्रमीता ये त्यागिन्यो याः कुलस्त्रियः ।
दास्यामि तेभ्यो विकिरमन्नं ताभ्यश्च पैतृकम् ॥

पुनर्मार्जनं (सव्यं) श्राद्धसंरक्षक महाविष्णो तृप्तोसि । तृप्तोस्मीति प्रतिवचनम् ॥

असंशयो भवेद्विष्णुः मोक्षसाधनमव्ययम् ।
पितॄणां च वरं श्रेष्ठं विकिरान्नं च वैष्णवम् ॥

पुनर्मार्जनं देवपितृमध्ये भूमिं प्रोक्ष्य । तिलदर्भान्निक्षिप्य । ये अग्निदग्धा ये अनग्निदग्धा मध्ये दिवः स्वधया मादयन्ते । तेभिः स्वराळसुनीतिमेतां यथावशं तन्वं कल्पयस्व । अग्निदग्धेभ्यः अनग्निदग्धेभ्यः अस्मत्कुलप्रसूतमृतेभ्यश्च अयं पिण्डः स्वधा नमः । एतद्वस्तिलोदकम् ॥

पवित्रं विसृज्य पात्रे प्रक्षाळ्य पुनः पवित्रं धृत्वा उच्छिष्टभागिभ्योन्नं दीयतां ॥

यजमानकुले जाता दासा दास्यान्नकांक्षिणः ।
ते तृप्तिमखिला यान्तु मया दत्तेन भूतले ॥

अन्नशेषैः किं क्रियताम् । इष्टैस्सह भुज्यताम् । प्रेतपूर्वकमुत्तरापोशनं दत्वा मन्त्रं स्वयं वदेत । ब्राह्मणहस्तप्रक्षाळनानन्तरं पिण्डप्रदानं कुर्यात् । अद्यपूर्वोक्त+प्राचीनावीती पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्त्यर्थमुत्तमलोकावाप्त्यर्थं मरणदिनादारभ्य द्वादशेहनि सपिण्डीकरणाख्यपार्वण-एकोद्दिष्टान्नश्राद्धे प्रेतार्थं तिलोदकपिण्डप्रदानम् करिष्ये इति संकल्प्य पिण्डस्याधः दर्भासनमुपतिष्ठतु तदुपरि एतत्तिलोदकमुपतिष्ठतु प्रेतपिण्डमादाय अस्मत्पित्रे गोत्राय शर्मणे प्रेताय प्रेततृप्त्यर्थं+श्राद्धे प्रेतार्थं एष पिण्डः उपतिष्ठतु पिण्डस्योपरि एतत्तिलोदकमुपतिष्ठतु अञ्जनाभ्यञ्जने उपतिष्ठेतां भोगनिष्पत्त्यर्थं ताम्बूलमुपतिष्ठतु वीर्यनिष्पत्त्यर्थं दक्षिणाः उपतिष्ठन्तु सव्यं ओं अद्य पूर्वोक्त + सपिण्डीकरणाख्यान्नश्राद्धे अस्मत्पितरं गोत्रं शर्माणं प्रेतमुद्दिश्य मया कृतैः सपिण्डीकरणाख्यपार्वण एकोद्दिष्टान्नश्राद्धतिलोदकं पिण्डप्रदानैश्च अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेततृप्तिद्वारा प्रेतत्वविमुक्त्यर्थमुपतिष्ठतु । दत्तं श्राद्धमभिरमतां । सव्यं—

नारायण नमस्तेस्तु शङ्खचक्रगदाधर।
अक्षय्यं पिण्डदानेन प्रेततृप्तिकरो भव॥

ओं ओं अद्य पूर्वोक्त एवंगुण विशेषण विशिष्टायां पुण्यतिथौ प्राचीनावीती अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य सपिण्डीकरणश्राद्धे संयोजनार्थं तिलोदकपिण्डप्रदानानि करिष्य इति संकल्प्य तस्य दक्षिणतः अपहता असुरा रक्षांसि वेदिषदः। तामद्भिरभ्युक्ष्य सकृदाच्छिन्नैः दर्भैरवस्तीर्य शुन्धन्तां अस्मत्पितामहाः शुन्धन्तां अस्मत्प्रपितामहाः शुन्धन्तामस्मद्वृद्धप्रपितामहाः एतत्ते अस्मत्पितामह गोत्र शर्मन् वसुरूप ये च त्वामत्रानु एतत्ते अस्मत्पितामहाय गोत्राय शर्मणे वसुरूपाय ये च तमनुगच्छन्ति तेभ्यश्च अयं पिण्डः तस्मै ते स्वधा नमः गयायां दत्तमस्तु । प्रपितामहवृद्धप्रपितामहाभ्यामपि पिण्डदानम् ॥

प्रेतपिण्डं त्रेधा विभज्य ॥ सव्यं अशेषे स्वीकृत्य प्रणम्य दक्षिणां दत्वा प्राचीनावीती अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेतत्वाविमुक्तयर्थं उत्तमलोकावाप्त्यर्थं मरणदिनादारभ्य + श्राद्धे पिण्डसंयोजनं कर्तुं योग्यतासिद्धिमनुगृहाण योग्यतासिद्धिरस्त्विति प्रतिवचनम् । (सव्यं) संकल्प्य पुण्यतिथौ प्राचीनावीती अस्मत्पितुः गोत्रस्य शर्मणः प्रेतस्य प्रेतत्वविमुक्तया उत्तमलोकावाप्त्यर्थं मरणदिनादारभ्य + श्राद्धे पितामहप्रपितामहवृद्धप्रपितामहैः गोत्रैःशर्मभिः वसुरुद्रादित्यस्वरूपैस्सह समानोदकत्वसापिण्ड्यसिद्धिद्वारा वस्वादिपितृलोकावाप्त्यर्थं अस्मत्पितुर्गोत्रस्य शर्मणः प्रेतस्य त्वत्पिण्डभागप्रथमद्वितीयतृतीयांशान् पितामहप्रपितामहवृद्धप्रपितामहानां गोत्राणां शर्मणां वसुरुद्रादित्यस्वरूपाणां पिण्डैस्सह संयोजयिष्य इति संकल्प्य तत्काले कृच्छ्राचरणं करिष्य इति संकल्प्य कृच्छ्रं कृत्वा मधुवाता इति मधूनि निक्षिप्य प्रथमभागं सव्यहस्ते निधाय शरावाकृतिं कृत्वा मधुना संसृज्य दक्षिणहस्तेन पितामहपिण्डमादाय॥

अस्मत्पितः गोत्र शर्मन् प्रेत त्वत्पिण्डभागप्रथमांशः पितामहेन शर्मणा गोत्रेण वसुरूपेण सह एष ते पिण्डभागस्संयुक्तः तस्मै ते स्वधा नमः। सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम्। देवा भागं यथा पूर्वे संजानाना उपासते। समानो मन्त्रस्समितिस्समानी समानं मनस्सह चित्तमेषाम्। समानं मन्त्रमभिमन्त्र एवः समानेन वो हविषा जुहोमि। समानीव आकूतिस्समाना हृदयानि वः। समानमस्तु वो मनो यथा वस्सुसहासति। कृष्ण कृष्ण कृष्ण। प्रेतपिण्डद्वितीयांशमादाय प्रपितामहपिण्डमादाय अस्मत्पितः गोत्र शर्मन्प्रेत त्वत्पिण्डभागद्वितीयांशः अस्मत्प्रपितामहेन शर्मणा गोत्रेण रुद्ररूपेण सह एष ते पिण्डभागः संयुक्तः तस्मै ते स्वधा नमः। संगच्छध्वं + सुसहासति। कृष्ण कृष्ण कृष्ण। वृद्धप्रपितामहपिण्डमादाय अस्मत्पितः गोत्र शर्मन्

प्रेत त्वत्पिण्डभागतृतीयांशः अस्मत् वृद्धप्रपितामहेन गोत्रेण शर्मणा आदित्यरूपेण सह एष ते पिण्डभागसंयुक्तः तस्मै ते स्वधा नमः। संगच्छध्वं+यथावस्सुसहासति। कृष्णस्मरणं कृत्वा।

पिण्डसंयोजनादूर्ध्वं प्रेतत्वस्य विनिवर्तितः।
मार्जनादिषु सर्वेषु चतुर्थो विनिवर्तते ॥

निमित्तस्थानाश्रितब्राह्मणं प्रार्थयेत् ॥

एष वोनुगतः प्रेत पितृसामान्यमाप्तवान्।
शिवं भवतु शेषाणां जायन्तां चिरजीविनः ॥

प्रतिवचनं इतः परं प्रेतशब्दो नास्तीति वदेत्। एकदर्भपवित्रं विसृज्य पिण्डानभिमन्त्रयेत् अस्मत्पितः गोत्र शर्मन् वसुरूप ये च त्वामत्रानु। अस्मत्पित्रे गोत्राय शर्मणे वसुरूपाय ये च तमनुगच्छन्ति तेभ्यश्च।यं पिण्डः तस्मै ते स्वधा नमः गयायां दत्तमस्तु। पितामह गोत्र शर्मन् रुद्ररूप ये च त्वामत्रानु अस्मत्पितामहाय गोत्राय शर्मणे रुद्ररूपाय ये च तमनुगच्छन्ति तेभ्यश्च अयं पिण्डः तस्मै ते स्वधा नमः गयायां दत्तं अस्त्विति प्रतिवचनम्। अस्मत्प्रपितामह गोत्र शर्मन् आदित्यरूप ये च त्वामत्रानु अस्मत्प्रपितामहाय गोत्राय शर्मणे आदित्यरूपाय ये च तमनुगच्छन्ति तेभ्यश्च अयं पिण्डः तस्मै ते स्वधा नमः। गयायां दत्तमस्तु। तेषु दर्भेषु हस्तं निमृज्य अत्र पितरो मादयध्वं अमीमदन्त पितरः यथाभागमावृषा ईषत सव्यं उदाङ्ङावृत्य अभिपर्यावृत्य चरोः प्राणभक्षं भक्षयेत्। शुन्धन्तां अस्मत्पितरः शुन्धन्तां पितामहाः शुन्धन्तां प्रपितामहाः। अस्मत्पितः अभ्यंक्ष्व पितामह अभ्यंक्ष्व प्रपितामह अभ्यंक्ष्व। पितः अंक्ष्व पितामह अंक्ष्व प्रपितामह अंक्ष्व। एतद्वः पितरो मानोतोन्यत्। प्रेत उत्तरीयं छित्वा दद्यात पितरो युक्ष्वं नमो वः पितर इषे। नमो वः पितर ऊर्जे। नमो वः पितरश्शुष्माय नमो वः पितरो घोराय। नमो वः पितरो जीवाय नमो वः पितरो रसाय स्वधा वः पितर नमो वः पितरो नमः एता युष्माकं पितर इमा अस्माकं जीवा वो जीवन्त इह सन्तः स्याम। मनोन्वाहुवामहे नाराशंसेन सोमेन पितृणां च मन्मभिः। आत एतु मनः पुनः क्रत्वेदक्षाय जीवसे। ज्योक् च सूर्यं दृशे। पुनर्नः पितरो मनो ददातु दैव्यो जनः। जीवं व्रातं सचेमहि। इति तिसृभिः उपस्थाय परेतन पितरस्सोम्या गम्भीरेभिः पथिभिः पूर्व्यणेभिः। दत्वायास्मभ्यं द्रविणेह भद्रं रयिं च नः सर्ववीरं नियच्छत। वीरं मे दत्त पितरः पिंडस्थानात् पितॄन् चालयेत्। (सव्यं) कुलाभिवृध्यर्थं पार्वणपूजां करिष्ये इति संकल्प्य पिण्डपितृदेवताभ्यो नमः कुशतिलयवाक्षतान्समर्पयामि + नैवेद्यं कृत्वा सर्वोपचारान् समर्पयामि ॥

शमीपत्रप्रमाणेन पिण्डं दद्याद्गयाशिरे ।
वद्धरेत्सप्तगोत्राणि कुलमेकोत्तरं शतम् ॥

ओं ओं अद्यपूर्वोक्त + प्राचीनावीती अस्मत्पितुः सपिण्डीकरणाख्यान्नश्राद्धे पितृपितामह-प्रपितामहान् गोत्रान् शर्मणः वसुरुद्रादित्यस्वरूपानेतानुद्दिश्य मया दत्ताः पिण्डाः गयापिण्डसदृशा भवन्त्विति भवन्तो ब्रुवन्तु । गयापिण्डसदृशा भवन्त्विति प्रतिवचनम् । पिण्डान्नमस्कृत्य ॥

अथ वैतरणीगोदानं

ओं ओं अद्य पूर्वोक्त + पुण्यथितौ अस्मत्पितुः गोत्रस्य शर्मणः वसुरूपस्य सुखेन वैतरणीनद्याः उत्तारणार्थं श्रीमहाविष्णुप्रीत्यर्थं वैतरणीसंज्ञकगोदानं गोपूजां च करिष्य इति संकल्प्य गोपूजां कृत्वा महाविष्णुस्वरूपस्य ब्राह्मणस्य इदमासनं सकलाराधनैस्समर्चितम् ॥

यमद्वारे महाघोरे तप्ता वैतरणीनदी ।
तां ततुं गां प्रदास्यामि उत्तारय सुखेन तम् ॥

हिरण्यगर्भगर्भस्थं हेम बीजं विभावसोः ।
अनन्तपुण्यफलदं अतश्शांतिं प्रयच्छ मे ॥

गवामंगेषु .... मे । नालिकेरपूर्णफलतांबूलदक्षिणासहितगोपुच्छं ग्राहयित्वा । अस्मत्पितुः गोत्रस्य शर्मणः वसुरूपस्य मार्गमध्ये वैतरणीनद्युत्तारणं महाविष्णुप्रीतिं कामयमानः महाविष्णु-स्वरूपाय ब्राह्मणाय तुभ्यमहं संप्रदद इति दत्वा । प्रतिग्रहीता देवस्य त्वा... रुद्राय गां इति प्रतिगृह्णीयात् । अनन्तरं पञ्चदानानि दशदानानि मनसोद्दिष्टदानानि दद्यात् ॥ (प्राचीनावीती) भवदनुज्ञया पिण्डानुद्वासयिष्य इति संकल्प्य पिण्डानुद्वास्य ॥

अथ मन्त्राः यत्र तत्परमं पदं विष्णोर्लोके महीयते । देवैस्सुकृतकर्मभिः तत्र मां कृधीन्द्रायेन्दो परिस्रव । यत्र तत्परमाव्यं भूतानामधिपतिः । भावभावी च योगी च तत्र मामसृतं कृधींद्रायेन्दो परिस्रव । यत्र गंगा च यमुना यत्र प्राची सरस्वती यत्र विश्वेश्वरो देवस्तत्र मामसृतं कृधीन्द्रायेन्दो परिस्रव । पिण्डस्थाः स्वस्थाने वासः शोभनं हविः (सन्त्वी) शांतिरस्तु तुष्टिरस्तु आचन्द्रार्कं वन्शाभिवृद्धिरस्तु इति पिण्डस्थाने जलं प्रोक्ष्य शिरसि मार्जयेत् अनन्तरं हस्तशुध्यर्थं कूर्चेण उभयोर्हस्ते, एकं द्वे त्रीणि चत्वारि पञ्च षट् । देवतापितृप्रसादेनास्मद्गोत्रमभिवर्धतां इति वदेत् स्वस्ति वर्धतां गोत्रं विश्वेदेवप्रसादोस्तु पितॄणां प्रसादोस्तु पितृप्रसादाद्वंशाभिवृद्धिरस्तु । भोजनपात्रा-ण्युच्चालयिष्ये । विश्वेषां देवानां मया दत्तं श्राद्धमन्नं अक्षय्योदकं अस्त्विति ब्रूत । प्राचीनावीती

पितृ + प्रपितामहानां मया दत्तं श्राद्धमन्नं अक्षय्योदकमस्त्विति ब्रूत अस्त्वक्षय्योदकमिति प्रतिवचनम्। स्वाहां वाचयिष्ये स्वधां वाचयिष्ये वाच्यतां इति प्रतिवचनम्। धामन्ते वामदेव आपो जगती कूर्चविसर्जने विनियोगः। धामन्ते विश्वं भुवनमधिश्रितमन्तस्समुद्रे हृद्या२अन्तरायुषि अपामनीके समिथेय आभृतस्तदश्याम मधूमन्त ऊर्मिं। पितृपितामहप्रपितामहेभ्यः स्वधोच्यतामिति भवन्तो ब्रुवन्तु। इति कूर्चं विस्रस्य जलेन सह भूमौ विसृजेत्। कर्ता ओं स्वधा अस्तु स्वधा इति ब्राह्मणाः। अथ कर्ता स्वधास्सम्पद्यन्ताम्। सम्पद्यन्तां स्वधा इति ब्राह्मणाः। सव्यं विश्वेदेवाः प्रीयन्तां इति जलं देवब्राह्मणहस्ते निषिच्य। पितृब्राह्मणहस्ते पितृपितामहप्रपितामहाश्च प्रीयन्ताम्। उपविष्टेभ्यः ब्राह्मणेभ्यः दक्षिणाः पान्तु देवानां सुवर्णम्। पितॄणां रजतमिति तुलसीं दत्वा। आमावाजस्य + अमृतत्वाय गम्यात्॥

दातारो नः अभिवर्धन्तां वेदास्संततिरेव नः।
श्रद्धा च नो मा व्यपगात् बहुदेयं च नः अस्तु॥

अन्नं च नः बहु भवेत् अतिथींश्च लभेमहि।
याचितारश्च नस्सन्तु माच याचिष्म कञ्चन॥

अन्नशेषः किं क्रियताम्। इष्टैस्सह भुज्यताम्। स्वादुषंसदः + मोदमानौ स्वे गृहे॥ आशीर्वादं कृत्वा अद्य मे + अर्हथ। वसिष्ठ + पदम्। अद्य पूर्वो + पुण्यतिथौ प्राचीनावीती अस्मत्पितुः सपिण्डीकरणश्राद्धातिथिर्भूत + भवन्तो ब्रुवन्तु गयाश्राद्धफलदमस्त्विति ब्राह्मणप्रतिवचनम्। पितृपितामहप्रपितामहाः भोजनान्ते यथाशक्ति इयं वो दक्षिणा। विश्वेदेवाः भोजनान्ते यथाशक्ति इयं वो दक्षिणा इदं वस्ताम्बूलम्। सदक्षिणाकं सताम्बूलम्। वाजे वाज इत्यस्य मन्त्रस्य वसिष्ठऋषिः त्रिष्टुप्छन्दः। आवाहितपितॄणामुद्वासने विनियोगः। वाजे वाजे अवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः हस्ते जलदर्भं गृहीत्वा शिरःप्रदक्षिणीकृत्य दर्भं द्विभागं कृत्वा प्राचीनावीती उत्तिष्ठ पितृपितामहप्रपितामहाः सव्यं अनुगच्छन्तु विश्वेदेवाः वसिष्ठासः + शंसति॥ आसीमान्तमनुव्रजेयं अनुव्रज॥

ओं ओं अद्य + तिथौ प्राचीनावीती अस्मद्वृद्धप्रपितामहस्य स्वर्गारोहणसिध्यर्थं स्वर्गपाथेयश्राद्धं आमरूपेण अद्य करिष्ये इति संकल्प्य तण्डुला वैश्व + प्रयच्छ मे। इदं स्वर्गपाथेयं सदक्षिणाकं सताम्बूलं वृद्धप्रपितामहस्य स्वर्गारोहणसिद्धिं कामयमानस्तुभ्यमहं संप्रददे इति दत्वा जले पिण्डान् विसृज्य पवित्रं विसृज्य स्नात्वा गृहमागत्य अभ्यञ्जनं कृत्वा उष्णोदके स्नात्वा यज्ञोपवीतं धृत्वा कर्मणः पुण्याहवाचनं सोदकुम्भश्राद्धं च कृत्वा बन्धुभिस्सह भुञ्जीयात्॥

॥ सर्वप्रायश्चित्तपद्धतिः ॥

सर्वप्रायश्चित्तानुक्रमः । आदौ सचेलस्नानम् । पुण्याहवाचनं महासंकल्पः । मृत्तिकास्नानं विज्ञापनाप्रकारः । प्रायश्चित्तनिर्णयः । परिषद्वरणम् । विधायकवरणम् । अनुवादकवरणम् । विधायकं प्रति परिषद्वाक्यम् । अनुवादकं प्रति विधायकवाक्यं । यजमानं प्रति अनुवादकवाक्यम् । वपनविधिः । दन्तधावनम् । दशविधस्नानानि । पूर्वशालाहोमः । पञ्चगव्यहोमः । नान्दी वैष्णवश्राद्धम् । उत्तरशालाहोमः । उदीच्याङ्गगोदानम् । नान्दी वैष्णवश्राद्धम् । कृच्छ्राचरणम् । दशदानानि । निरीक्षिताज्यदानम् । फलदानताम्बूलदानं भूरिदानं ब्राह्मणभोजनम् । इत्यनुक्रमः ॥

सचेलं स्नात्वा वस्त्रधारणम् पुण्ड्रधारणं । समस्तपापक्षयार्थं सर्वप्रायश्चित्ताङ्गभूतं पुण्याहं वाचयित्वा कारयितृवरणं कुर्यात् ॥

अथ महासंकल्पः

अथानन्तवीर्यस्य श्रीमदादिनारायणस्य अचिंत्यापरिमितशक्त्या ध्रियमाणस्य महाजलौघस्य मध्ये परिभ्रमतां अनेककोटिब्रह्माण्डानां एकतमे अव्यक्तमहदहंकारपृथिव्यप्तेजोवाय्वाकाशाद्यैरावरणैरावृते अस्मिन्महति ब्रह्माण्डकरण्डमण्डले आधारशक्ति कूर्मानन्ताद्यष्टदिग्गजोपरि प्रतिष्ठितस्य उपरितले सत्यादिलोकषट्कस्याधोभागे महानालायमानफणिराजशेषस्य सहस्रफणामण्डलमण्डिते दिग्दन्तिशुण्डादण्डोत्तम्भिते लोकालोकाचलेन वलयिते लवणेक्षुसुरासर्पिर्दधिक्षीरोदकार्णवैः परिवृते जम्बूप्लक्षकुशक्रौंचशाकशाल्मलिपुष्कराख्यसप्तद्वीपैर्दीपिते इन्द्रकशेरुताम्रगभस्तिनागगन्धर्ववारणभारताख्यनवखण्डमण्डिते भारतकिंपुरुषादिनववर्षोपशोभिते महासरोरुहाकारे पञ्चाशत्कोटियोजनविस्तीर्णभूमण्डले सुमेर्वादिपर्वतानां हरिवर्षकिंपुरुषयोश्च दक्षिणदिग्भागे मलयाचलाद्युत्तरदिग्भागे जम्बूद्वीपे भारतवर्षे भरतखण्डे नवसहस्रयोजनविस्तृतायां कर्मभूमौ स्वाम्यवन्ति कुरुक्षेत्रादिसमभूमध्यरेखायाः पूर्वदिग्भागे विन्ध्यस्य दक्षिणदिग्भागे श्रीशैलस्याग्नेयदिग्भागे गङ्गासेत्वोर्मध्यदेशे दण्डकारण्ये प्रजापतिक्षेत्रे सकलजगत्स्रष्टुः परार्धद्वयजीविनः ब्रह्मणः प्रथमपरार्धे अतीते द्वितीयपरार्धे प्रथमवर्षे प्रथममासे प्रथमपक्षे प्रथमदिवसे अह्नि द्वितीये यामे तृतीये मुहूर्ते स्वायम्भुवादिषट्सु मनुषु व्यतीतेषु सप्तमे वैवस्वतमन्वन्तरे अष्टाविंशन्महायुगे कृतत्रेता द्वापराख्येषु त्रिषु युगेषु गतेषु वर्तमाने कलियुगे सौरचान्द्रादिमासभ्रमिते प्रभवादिषष्टिसंवत्सराणां मध्ये .... संवत्सरे ... अयने ... ऋतौ ... मासे .. पक्षे... तिथौ.... वारे ... नक्षत्रे .... योगे पुण्यतिथौ अनादि अविद्यावासनया प्रवर्तमाने अस्मिन्महति संसारचक्रे

विचित्राभिः कर्मगतिभिः विचित्रासु योनिषु पुनः पुनः अनेकधा जनित्वा केनापि पुण्यकर्मविशेषेण इदानींतनमानुष्ये द्विजजन्मविशेषं प्राप्तवतः अमुकगोत्रोद्भवस्य नक्षत्रे राशौ जातस्य मम जन्माभ्यासाज्जन्मप्रभृत्येतत्क्षणपर्यंतं बाल्यकौमारयौवनवार्धकेषु जाग्रत्स्वप्नसुषुप्ति अवस्थासु मनोवाक्कायकर्मेन्द्रियव्यापारैः ज्ञानेन्द्रियव्यापारैश्च मया कृतानामिह जन्मनि प्रकाशकृतानां महापातकचतुष्टयव्यतिरिक्तानां अतिपातकानामनुपातकानां समपातकानां सङ्कलीकरणानां मलिनीकरणानां अपात्रीकरणानां जातिभ्रंशकराणां प्रकीर्णकानां रहस्यकृतमहापातकातिदिष्टरूपमहापातकव्रतातिदेशिकरूपातिपातकानां महापातकसमरूपपातकानां उपपातकानां नवानां नवविधानां ज्ञानतस्सकृत्कृतानां ज्ञानतोऽभ्यस्तानां ज्ञानतोऽज्ञानतश्च अत्यन्ताभ्यस्तानां निरन्तराभ्यस्तानां चिरकालाभ्यस्तानां एवं बहूनां बहुविधानां सर्वेषां पापानां अपनोदकं परिषदुपन्यास(उपस्थान)पुरस्सरं सर्वप्रायश्चित्तं करिष्य इति सङ्कल्प्य पुण्याहवाचनं प्रायश्चित्तकर्माङ्गं मृत्तिकास्नानं विधाय आर्द्रवाससा सभां गत्वा दश द्वादश वा विप्रान् परिषदर्थे नियोज्य दक्षिणां गृहीत्वा परिषदं प्रदक्षिणीकृत्य परिषदग्रे दक्षिणां निधाय दण्डवत्प्रणम्य विज्ञापयेत् ॥

अशेषे हे परिषत् भवत्पादमूले मया समर्पितां इमां सौवर्णीं दक्षिणां यत्किञ्चिद्दक्षिणां यथोक्तदक्षिणामिव ताम्बूलं च स्वीकृत्य मदीयां विज्ञापनामवधार्य अमुकगोत्रोत्पन्नस्यामुकनक्षत्रे राशौ जातस्य अमुकशर्मणः मम जन्माभ्यासात् जन्मप्रभृत्येतत्क्षणपर्यन्तं बाल्य कौमारयौवनवार्धकेषु जाग्रत्स्वप्नसुषुप्त्यवस्थासु कामक्रोधलोभमोहमदमात्सर्यैः वाक्पाणिपादपायूपस्थैः त्वक्चक्षुःश्रोत्रजिह्वाघ्राणैः मनोवाक्कायकर्मभिः मया कृतानामिह जन्मनि प्रकाशकृतमहापातकचतुष्टयव्यतिरिक्तानां जन्मान्तरकृतब्रह्महत्यासुरापानस्वर्णस्तेयगुरुतल्पगमनादिमहापातकानां संसर्गीभावितृत्व आज्ञापयितृत्व अनुग्राहकत्व प्रयोजकत्व मैत्रीभावत्व उपदेष्टृत्व अनुमन्तृत्व प्रोत्साहकत्वादीनां महापातकरूपातिदिष्टव्रतादेशिकरूपातिपातकानां यागस्थक्षत्रियवध अज्ञातगर्भवधऋतुमतीवध सगोत्रस्त्रीवध सुहृद्धनन अधीतविस्मृत्यादीनां ब्रह्महत्यादिसमरूपपातकानां उत्कर्षानृतभाषण अभक्ष्यभक्षण पुष्पवतीमुखास्वादनादीनां सुरापानसमानानां रत्नापहरणभूवृत्तिस्त्रीहरणानां स्वर्णस्तेयसमानानां सखिपत्नीकुमारीगमन सगोत्रस्त्रीगमन अंत्यजस्त्रीगमनादीनां गुरुतल्पसमानानां सामान्यमातृगोत्रवध व्रात्यत्वसाधारणद्रव्यस्तेयऋणानपाकरण अनाहिताग्नित्वपुण्यविक्रयपरिवेदनभृतकाध्ययनपरदारसेवनपरत्व लवणविक्रय स्त्रीशूद्रविट्क्षत्रियवधनिन्दितोपजीवन नास्तिक्यव्रतलोपसुत्रविक्रयधान्यविक्रय अयाज्ययाजनपितृमातृसुतत्याग तडाकारामादिविक्रयकन्यादूषणपरपीडन कन्याऽप्रदानेनाऽस्यजीवनार्थक्षयारम्भ मद्यप-

स्त्रीनिषेवणसान्निध्याग्निपरित्याग इन्धनार्थं द्रुमभेदन स्त्रीजीवनहिंस्रयन्त्रविधान औषधजीवन-
व्यसनपरतन्त्रत्व आत्मविक्रयशूद्रप्रेष्यहीनसख्यजीवनहीनयाननिषेवण अनाश्रमवासपरान्नपरिपुष्टत्व
असच्छास्त्राभिगमनभार्याविक्रयादीनां अजावध आविकावध खराश्वोष्ट्रमृगेभवधमीनमहिषवधादीनां
सङ्कलीकरणानां कृमिकीटवयोवध मद्यानुगतभोजनफलपुष्पचौर्यादीनां मलिनीकरणानां निन्दित-
धनादानकुसीदजीवन अनृतभाषणादीनां अपात्रीकरणानां मद्याघ्राणब्राह्मणपीडन पुंमैथुनादि
जातिभ्रंशकराणां उक्तकर्मपरित्यागनिन्दितकर्मनिषेवण इन्द्रियानिग्रहत्वपरमर्मभेदनशौच स्नान सन्ध्या-
वन्दनपञ्चमहायज्ञराहित्य अकालभोजननिन्दितक्लीबव्रात्यशूद्रवार्धुषिकान्नभोजनकुष्ठयन्नपतितान्न पतित-
दापितान्न पतितपक्वान्न पतितनिरीक्षितान्न पतितस्पृष्टान्न पतितसमपङ्क्त्यन्न गणान्न गणिकान्न
शूद्रायामपाचितान्नग्रहकालपर्वान्न ग्रहणकालभोजनकालरात्र्यन्न भानुवाररात्र्यन्न वामहस्तान्नभोजन-
वटाश्वत्थतिन्दुकादिनिषिद्धपत्रभोजन राजपुरोहितान्न राजभृत्यान्न अनिवेदितान्न अब्राह्मणभुक्तशेषान्न-
सदा भिक्षाशन वटाकगोळान्न तुरुष्कान्न अष्टमी चतुर्दशी दिवान्न द्वादशी दशमीरात्र्यन्न वैश्यान्न
पर्युषितान्न खरोष्ट्रयुतयानारोहणसाक्षात्खरारोहण उन्नतवृक्षारोहणघटशिल्प असंस्कृतसाक्तपिण्याकभक्षण
वृथा कृसरयावकपायसापूपभक्षणहस्तदत्तशाकलवणादिभक्षणबुरुडम्लेच्छतुन्नवाय रथकार धन्वकार-
लोहकार वेश्या दासी विधवा गर्भिणी अप्राजापत्यव्रतान्त्यजागमनपुरन्ध्रीगमन कौटिल्यागमन-
तिर्यग्योनिगमन श्रौतस्मार्तकर्मराहित्य पितृमातृस्वकर्तृकप्रत्याब्दिकराहित्यसन्ध्यावन्दनकालेषु नियम-
राहित्य अनग्निस्वनग्नस्नान अशुद्धजलस्नानसूर्योदयमध्यान्हास्तमयेषु स्वाप गुरुविषये त्वङ्कार-
हुङ्कारवाद विवादसमये ब्राह्मणतिरस्कार विप्रताडनार्थं दण्डादिग्रहण सौराष्ट्रदेशगमन-
असहायमार्गगमनपरताडन भर्त्सन एकपङ्क्त्युपविष्टविषमान्नदान सञ्चारमार्गनिरोधनकन्याविवाह-
विघ्नकरण विवाहयागदूषण गुरुदूषणमहच्छुश्रूषणराहित्यब्राह्मणक्षोभकरणसद्वृत्तिपरित्यागपूर्वकद्रव्यार्जन-
स्वमिव परस्वहरणकर्षणाजीवनपीतावशिष्टोदकपानचण्डालकारितवृष्टिफलितधान्यफलादिभक्षणचण्डाल-
कारितवापीकूपतटाकादिषु स्नानोदकपानकरमथिततक्रपानखरोष्ट्रवराहगर्दभक्षीरादिपान अलेह्यलेहन
अपेयपान दीपोच्छिष्टतैलपान रात्रिकाले तैलामलकभक्षण ग्रहणसङ्क्रान्त्यमावास्याव्यतीपातनिषिद्ध-
कालाभ्यङ्गदुर्मरणप्रयत्नकरणशस्त्रधारणपरस्त्रीसाभिलाषनिरीक्षणचार्वाकपाषण्डादि पूजितदेवताभिवादन
परोपकारराहित्यगुल्मनाशनकर्मलोपडाम्भिकस्नानोपवासकरण तिष्ठन्मूत्रपुरीषोत्सर्जन वृक्षमूलमार्गवापी-
कूपतटाकादिषु विण्मूत्रपुरीषोत्सर्जनचण्डालतुरुष्कादिस्पर्शनसम्भाषणसहवासतद्द्रव्योपयोगदीनान्ध-
कृपणादीनां यथाशक्त्यप्रदानसूर्यग्रहादिपुण्यकालेषु तुलापुरुषादिमहादानप्रतिग्रहब्रह्मचारि यतिवेदादि-

निन्दनन्यायशास्त्राद्यनधीतृत्वव्यवहारेषु पक्षपातकरणब्राह्मणग्रहकुल्याद्यपहरणमनुष्यपक्षिपशुबन्धनगरादीनां वर्षातपव्याधिदुःखानिवारणगुर्वादीनामनुपासीनप्रदानवाक्पारुष्यादीनां प्रकीर्णकानां नवानां नवविधानां ज्ञानतस्सकृत्कृतानां ज्ञानतोऽभ्यस्तानां अज्ञानतस्सकृत्कृतानां अज्ञानतोऽभ्यस्तानां चिरकालाभ्यस्तानां बहूनां बहुविधानां सर्वेषां पापानां प्रतिनिमित्तं प्रायश्चित्तं कर्तुं असमर्थस्य मम एकविधं सर्वप्रायश्चित्तं धर्मशास्त्रोक्तप्रकारेण निश्चित्य उपदिश्य मामनुगृहाण इति पुनः पुनः प्रणमेत् ॥

सर्वे धर्मविवक्तारो गोप्तारस्सकला द्विजाः ।
मम देहस्य संशुद्धिं कुर्वन्तु द्विजसत्तमाः ॥

मया कृतं महाघोरं ज्ञातमज्ञातकिल्बिषम् ।
प्रसादः क्रियतां मह्यं शुभानुज्ञां प्रयच्छत ॥
पूज्यैः कृतपवित्रोहं भवेयं द्विजसत्तमैः ॥

अथ परिषद्वाक्यम्

किं ते कार्यं किमर्थं वा अस्मान्मृगयसे द्विज ।
अत्र नो ब्रूहि सत्येन सत्यं हि गतिरात्मनः ॥

सत्येन द्योतते सूर्यः सत्येन द्योतते शशी ।
सत्येन द्योतते वह्निः सर्वं सत्ये प्रतिष्ठितम् ॥

अस्माकं चैव सर्वेषां सत्यमेव परं बलम् ।
यदि चेद्वक्ष्यसे सत्यं नियतं प्राप्स्यसे शुभम् ॥
यद्यागतो ह्यसत्येन न च शुध्यसि कर्हिचित् ॥

परिषदपि यजमानेन ज्ञापितान्याकर्ण्य दक्षिणां स्वीकृत्य धर्मशास्त्रं पर्यालोच्य एकविधं सर्वप्रायश्चित्तं विधायकान्प्रति वदेत् ॥

अथ विधायकवरणम्

अस्मिन् चिकीर्षिते सर्वप्रायश्चित्तानुष्ठाने भवद्भिर्विधायकैर्भवितव्यं इत्यशेषसभानुज्ञया भवन्तोपि तथैवाङ्गीकृत्य मां रक्षन्तु ॥

अथानुवादकवरणम्

अस्मिन् चिकीर्षिते सर्वप्रायश्चित्तानुष्ठाने अनुवादकत्वेन भवता भवितव्यं इत्यशेषसभ्यानुज्ञया भवानपि तथैवाङ्गीकृत्य मां रक्ष इति प्रार्थयेत् ॥

विधायकान्प्रति परिषद्वाक्यम्

हे विधायकाः श्रुतिस्मृति पुराणेतिहासविचक्षणाः, अमुकगोत्रस्यामुकशर्मणः यजमानस्य जन्मप्रभृत्येतत्क्षणपर्यन्तं बाल्ययौवनकौमारवार्धकेषु जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनोवाक्कायकर्मेन्द्रियव्यापारैः संभावितानां इहजन्मनि प्रकाशकृतमहापातकचतुष्टयव्यतिरिक्तानां महापातकव्रतादेशिकसंसर्गिभाव आज्ञापयितृत्वानुग्राहकत्वप्रयोजकत्व उपदेष्टृत्व अनुमन्तृत्वप्रोत्साहकत्वादीनां महापातकरूपातिदेशिकसोमयागस्थक्षत्रियवध ऋतुमतीवध सगोत्रस्त्रीवधादीनां ब्रह्महत्यादिसमरूपपातकानां गुर्वधिक्षेपसुहृद्वधानां सुरापानसमत्वेनोक्तानां उत्कर्षानृतभाषण अभक्ष्यभक्षणपुष्पवतीमुखास्वादनादीनां स्वर्णस्तेयसमत्वेनोक्तानां रत्नाश्वहरणभूम्यपहरणनिक्षेपहरणादीनां गुरुतल्पसमत्वेनोक्तानां सखिपत्नीकुमारीसगोत्रागमन अंत्यजागमनशूद्रस्त्रीगमनादीनां उपपातकसमत्वेनोक्तानां मातृगोत्रवधऋणानपाकरणादीनां अनाहिताग्नित्वकन्यादूषणपरान्नपरिपुष्टत्वकन्दमूलविक्रयादीनां संकलीकरणत्वेनोक्तानां अजमार्जारवध अहिवधमहिषवधादीनां मलिनीकरणत्वेनोक्तानां कृमिकीटवधफलपुष्पशाककाष्ठादिचौर्यादीनां अपात्रीकरणत्वेनोक्तानां निन्दितोपजीवननिन्दितधनादान असद्भाषणादीनां जातिभ्रंशकरत्वेनोक्तानां मद्याघ्राणब्राह्मणताडनपुंमैथुनादीनां प्रकीर्णकत्वेनोक्तानां उक्तकर्मपरित्यागस्नानसंध्यावन्दनपञ्चमहायज्ञपरित्याग अकालभोजनव्रात्यान्नभोजनकुष्ठयन्न पतितपक्वान्नपतितनिरीक्षितान्नपतितस्पृष्टान्नशूद्रानलपाचितान्नशूद्रभाजनभोजनाभिन्नकांस्यभोजनचिकित्सकान्नदेवलकान्नकर्मलोपादीनां अस्य यजमानस्य संभावितानां ज्ञानतोऽज्ञानतश्च कृतानां ज्ञानतः सकृत्कृतानां ज्ञानतोऽभ्यस्तानां अज्ञानतो ज्ञानतश्चात्यन्ताभ्यस्तानां चिरकालाभ्यस्तानां नवानां नवविधानां बहूनां बहुविधानां सर्वेषां पापानामपनोदकं षडब्दप्राजापत्य कृच्छ्रात्मकं प्राच्योदीच्याङ्गगोदानसहितं सर्वप्रायश्चित्तं भवति एतत्साक्षान्मुख्यचर्यया कर्तुमशक्यत्वात् षडब्दप्राजापत्यकृच्छ्रप्रत्याम्नायभूतेन षडब्दसंख्याकेन रूपेणाचरणीयं इत्यस्मान्निर्णीतं प्रायश्चित्तं सम्यग्विधाय अस्योपदिशेत्येकं धर्मज्ञं अनुवादकं नियोजयेत् ॥

अनुवादकं प्रति विधायकवाक्यम्

हे अनुवादक विदुषामग्रेसर सदसि विहितशक्यप्रत्याम्नायरूपप्रतिपदोक्तसर्वप्रायश्चित्तानुवादककुशल हे अनुवादक इदानीं अमुकगोत्रादिविशिष्टेन अनेन यजमानेन विज्ञापितानां अमुक-

गोत्रादियुक्तस्य यजमानस्य मध्यवर्तिनि काले सम्भावितानां रहः प्रकाशकृत महापातकचतुष्टयव्यतिरिक्तानां सर्वेषां पापानामपनोदकं षड्गुणितषडब्दरूपकृच्छ्ररूपाशीत्यधिकसहस्रसंख्याकप्राजापत्यकृच्छ्रात्मकं सर्वप्रायश्चित्तं उत्तमाधिकारिणः। मध्यमाधिकारिणस्तु द्विगुणं सत् षष्ट्युत्तरशताधिकद्विसहस्रसंख्याकं प्रायश्चित्तम्। अधमाधिकारिणस्तु त्रिगुणत्वात् चत्वारिंशदुत्तरशताधिकसहस्रसंख्याकप्राजापत्यकृच्छ्रात्मकं एतत्प्रायश्चित्तं प्राच्योदीच्याङ्गगोदानसहितं पापापनोदकं भवतीति सर्वसभानिर्णयः वयमप्यशेषसभानिर्णीतं प्रायश्चित्तं अस्मै यजमानायानुवदेति (उपदिशेति) त्वां प्रेषयामः त्वमपि तथैव उच्चैरूर्ध्वबाहुस्सन् त्रिवारं अनुवद इत्यनुवादकं ब्रूयुः। अनुवादकोपि तथा करोमीत्युक्त्वा यतासुरूर्ध्वबाहुः त्रिवारमनुवदेत्॥

अथ यजमानं प्रति अनुवादकवाक्यम्

विज्ञापनां समाकर्ण्य सदस्यास्साधुवत्सलाः।
विनयग्राहिणस्सर्वे दूरलोभविवर्जिताः॥

स्वपादमूलनिक्षिप्तां दक्षिणां प्रतिगृह्य च।
धर्मशास्त्रं समालोच्य श्रुतिस्मृतिकदम्बकम्॥

निर्णीतवन्तस्सर्वेषां पापानामपनोदकम्।
प्रायश्चित्तं समावेद्य सदस्यानुपवेदि माम्॥
प्रेरयन्तिस्म तस्मात्त्वं समाहितमनाश्शृणु।

अनुवादकः प्राङ्मुखस्तिष्ठन् हस्तं प्रसार्य विधायकवचनं त्रिवारमुपदिशेत्। भो यजमान अमुकगोत्र नारायणशर्मन् अशेषेयं परिषत् विनयेन त्वदीयां (अमुकगोत्रे अमुकनक्षत्रे अमुकराशौ जात अमुकशर्मन् अमुकशाखाध्यायिन्) विज्ञापनामवधार्य त्वया समर्पितदक्षिणामल्पीयसीमपि यथोक्तदक्षिणामिव स्वीकृत्य त्वया विज्ञापितानां सर्वेषां पापानां अपनोदकं षडब्दप्राजापत्यकृच्छ्रात्मकं प्राच्योदीच्याङ्गगोदानसहितं सर्वप्रायश्चित्तं निर्णीतं अस्मै यजमानायोपदिशेति विधायकमुखेन मां प्रेषितवती। अहमप्युपदिशामि सावधानस्समाकर्णय। अमुकगोत्रस्य अमुकनक्षत्रे जातस्य तव जन्माभ्यासाज्जन्मप्रभृति एतत्क्षणपर्यन्तं मध्यवर्तिनि काले बाल्ययौवनकौमारवार्धकेषु जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनोवाक्कायकर्मेन्द्रियव्यापारैः ज्ञानेन्द्रियव्यापारैश्च त्वया कृतानां रहःप्रकाशकृतानां महापातकचतुष्टयव्यतिरिक्तानां संसर्गिभाव आज्ञापयितृत्व अनुग्राहकत्वप्रयोजकत्व उपदेष्टृत्व प्रोत्साहकत्वादीनां सोमयागस्थक्षत्रियवधवैश्यवधगर्भवधऋतुमतीवधस्त्रीवधादीनां मद्य-

हत्यादिसमरूपपातकादीनां गुर्वधिक्षेप उत्कर्षानृतभाषणसुरापानसमानानां रक्ताश्वहरणादीनां स्वर्णस्तेयसमानानां सखीपत्नीकुमारीगमनादीनां गुरुतल्पसमानानां सामान्यमात्रगोवधव्रात्यत्वादीनां उपपातकादीनां अजादिवध अहिमहिषवधादीनां सङ्कलीकरणानां कृमिकीटवधादीनां मलिनीकरणादीनां निन्दितधनादानअसभ्यभाषणादीनां अपात्रीकरणादीनां मद्याघ्राणपुंमैथुनादीनां जातिभ्रंशकराणां स्वकर्मपरित्यागवार्धुषिकान्नभोजनादीनां अपात्रीकरणानां एवं सम्भावितानां सर्वेषां ज्ञानतस्सकृत्कृतानां अज्ञानतस्सकृत्कृतानां ज्ञानतोऽभ्यस्तानां अज्ञानतोऽभ्यस्तानां अत्यन्ताभ्यस्तानां चिरकालाभ्यस्तानां निरन्तराभ्यस्तानां एवं नवानां नवविधानां बहूनां बहुविधानां सर्वेषां पापानां अपनोदकं षडब्दप्राजापत्यकृच्छ्ररूपं सर्वप्रायश्चित्तं प्राच्योदीच्याङ्गसहितं संपूर्णमनुष्ठेयं मुख्यचर्यया अशक्तश्चेत्प्रत्याम्नायभूतषडब्दसंख्याककावेरीस्नानं पूर्वोत्तरशालाहोमं पूर्वोत्तराङ्गगोदानं नान्दीश्राद्धं वैष्णवश्राद्धं दशदानं पञ्चगव्यहोमसहितं संपूर्णं (त्वमाचर तेन त्वं पूतो भविष्यसि) कुरु पूतो भव। अस्मिन्प्रायश्चित्ते त्वया शक्यप्रत्याम्नायेन कावेरीस्नानरूपेण सम्यगनुष्ठिते सति अमुकगोत्रोद्भवेन अमुकनक्षत्रे राशौ जातेन अमुकशाखाध्यायिना अमुकशर्मणा त्वया परिषत्सन्निधौ विज्ञापितेभ्यः प्रकाशकृतमहापातकचतुष्टयव्यतिरिक्तेभ्यः समरूपातिदिष्टपातकेभ्यः महापातकव्रतदेशिकेभ्यः समरूपपातकेभ्यः उपपातकेभ्यः सङ्कलीकरणेभ्यः मलिनीकरणेभ्यः अपात्रीकरणेभ्यः जातिभ्रंशकरेभ्यः सर्वेभ्यः नवभ्यः नवविधेभ्यः मुक्तो भूयाः इति त्रिवारमुच्चैर्ब्रूयात्॥ तदाह मनुः —

बाल्यात्प्रभृति यत्किंचित्पातकं चोपपातकम्।
षडब्देनैव शुध्यन्ति महतः पातकादृते॥

अथ शालाहोमः (करिष्यमाणः)

व्रतग्रहणविधिः

परिषत्सन्निधौ ततो यजमानः प्राणानायम्य संकल्प्य मम जन्माभ्यासाज्जन्मप्रभृति एतत्क्षणपर्यन्तं बाल्ययौवनवार्धकेषु जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनोवाक्कायकर्मेन्द्रियव्यापारैः ज्ञानेन्द्रियव्यापारैश्च मया कृतानां रहःप्रकाशकृतमहापातकचतुष्टयव्यतिरिक्तानां महापातकातिदिष्टरूपमहापातकव्रतातिदेशिकरूपातिपातकानां महापातकसमरूपातिपातकानां + सर्वेषां पापानामपनोदकं षडब्दप्राजापत्यकृच्छ्रं परिषदुपदिष्टं सर्वप्रायश्चित्तं साक्षान्मुख्यचर्यया कर्तुं असमर्थोहं तत्संख्याकत्वेन प्राजापत्यकृच्छ्रप्रत्याम्नायभूतेन कावेरीस्नानरूपेणाहमाचरिष्ये इति संकल्प्य। इतिव्रतग्रहणम्। ततः वपनं सतस्कारस्तु॥

जङ्घोरुवक्षः कक्षौ च लोमानि भुजयोः क्रमात्।
कुक्षिरोमशिखावर्जं श्मश्रुलोम च वापयेत्॥

केशश्मश्रुलोमनखान् वापयित्वा स्नात्वाचम्य दन्तधावनं संकल्पपुरस्सरं कुर्यात्॥

अथ वनस्पतिप्रार्थना

आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च।
ब्रह्म प्रज्ञां च मेधां च त्वन्नो देहि वनस्पते॥

इति दन्तकाष्ठं आदाय दन्तधावनं कृत्वावगाह्य स्नात्वाचम्य दशविधस्नानानि कुर्यात्॥

ओं भूः + परमेश्वरप्रीत्यर्थं अद्य पूर्वोक्त + मम जन्माभ्यासात् + सर्वेषां पापानामपनोदक परिषदुपदिष्ट करिष्यमाणसर्वप्रायश्चित्ताङ्गं देहशुध्यर्थं दशविधस्नानं करिष्य इति —

संकल्पमुक्त्वा विधिवत्तत्तन्मन्त्रैः पृथक्पृथक्।
अग्निरित्यादिमन्त्रेण मानस्तोकेति वै ऋचा॥

अश्वक्रान्तेति मन्त्रेण आपोहिष्ठेति वै तृचा॥
भस्मगोमयमृद्वारिस्नानानि च पृथक्पृथक्॥

गायत्र्या चैव गोमूत्रं गन्धद्वारेति गोमयम्।
आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि।

घृतं मिमिक्षे चैवाज्यं देवस्य त्वा कुशोदकम्॥
स्नानाङ्गतर्पणं कृत्वा वाससी परिधाय च॥

आचम्य प्राणानायम्य संकल्पं कृत्वा अस्मिन् चिकीर्षिते सर्वप्रायश्चित्ते पितॄनुद्दिश्य नान्दीश्राद्धं हिरण्यरूपेण करिष्ये इति नान्दीश्राद्धं कृत्वा अस्मिन् चिकीर्षिते प्रायश्चित्ते प्राच्याङ्गवैष्णवश्राद्धं हिरण्यरूपेण करिष्य इति संकल्प्य मृष्टान्नपरिमितहिरण्यं दद्यात्। अस्मिन् चिकीर्षिते प्रायश्चित्ते प्राच्याङ्गगोदानं करिष्य इति संकल्प्य स्वर्णशृङ्गीं रौप्यखुरां कांस्यदोहां रक्तपुच्छां स्वर्णघण्टां वस्त्रद्वयसमन्वितां तां पूजयित्वा

यज्ञसाधनभूता या विश्वस्याघप्रणाशिनी।
यज्ञरूपधरो देवः प्रीयतामनया गवा॥

प्रारम्भे सर्वकृच्छ्राणि समाप्तौ च विशेषतः ।
आज्येनैव तु शालाग्नौ जुहुयादाहुतीः पृथक् ॥

शालाग्निरौपासनाग्निः । अनग्निकानां लौकिकाग्निः । अस्मिन् चिकीर्षिते सर्वप्रायश्चित्ते प्राच्याङ्गशालाहोमं करिष्य इति संकल्प्य विधिवदग्निस्थापनान्तं कृत्वा अन्वाधानं कुर्यात् । चक्षुषी आज्येन अग्निं वायुं सूर्यं प्रजापतिं च प्रधानदेवता अष्टोत्तरशतं अष्टाविंशतिवारं वा हुत्वा स्विष्टकृदादिहोमशेषं समापयेत् ॥

अथ पञ्चगव्यहोमः

ओं ओं अद्य पूर्वोक्त+शुभतिथौ मम समस्तपापक्षयार्थं अभक्ष्यभक्षण अभोज्यभोजन अपेयपानादिसमस्तपापपरिहारार्थं पञ्चगव्यप्राशनपञ्चगव्ययोग्यतासिध्यर्थं पञ्चगव्यहोमं करिष्य इति संकल्प्य एह्यग्न इत्यादि चक्षुषी आज्येन अग्निं सोमं रुद्रं विष्णुं गायत्रीं ब्रह्माणं अग्निं वायुं सूर्यं प्रजापतिं च एताः प्रधानदेवताः पञ्चगव्यद्रव्येण शेषेण स्विष्टकृतमित्यादि । अपात्रप्रयोगः तण्डुलपुञ्जेषु पञ्चगव्यं स्थापयित्वा मध्ये क्षीरं पूर्वतो दधि दक्षिणतो घृतं पश्चिमतो गोमूत्रं उत्तरतो गोमयं ईशान्यां कुशोदकं पञ्चगव्यदेवताभ्यो नम इत्यादिषोडशोपचारपूजां कृत्वा । गायत्र्यैव गोमूत्रम् । गन्धद्वारेति गोमयम् । आप्यायस्वेति च क्षीरम् । दधिक्राव्णेति वै दधि । घृतं मिमिक्षिरेति । देवस्य त्वेति कुशोदकं प्रणवेनालोड्य यज्ञीयकाष्ठेन चक्षुष्यन्तं हुत्वा । ब्रह्मकूर्चेन सह दर्व्या पञ्चगव्यहोमः । अग्निं दूतं मेधातिथिरग्निर्गायत्री पञ्चगव्यहोमे विनियोगः । अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् । अस्य यज्ञस्य सुक्रतुं स्वाहा । अग्नय इदं । आप्यायस्व गौतमस्सोमो गायत्री पञ्चगव्यहोमे विनियोगः । आप्यायस्व समेतु ते विश्वतस्सोमवृष्ण्यम् । भवा वाजस्य सङ्गथे स्वाहा सोमायेदं । इरावती वसिष्ठो विष्णुस्त्रिष्टुप् पञ्चगव्यहोमे विनियोगः । इरावती धेनुमतीहि भूतं सूयवसिनीमनुषे दशस्या । व्यस्तभ्नाद्रोदसी विष्णवे ते दाधर्थपृथिवीमभितो मयूखैः स्वाहा । विष्णव इदं । इदं विष्णुर्मेधातिथिर्विष्णुर्गायत्री पञ्चगव्यहोमे विनियोगः । इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पांसुरे स्वाहा । विष्णव इदम् । मानो महान्तं मानस्तोके तनयोरिति कुत्सो रुद्रो जगती । मानो महान्तमुत मानो अर्भकं मान उक्षन्तमुत मान उक्षितम् । मानोवधीः पितरं मोत मातरं मानः प्रियास्तन्वो रुद्ररीरिषः स्वाहा रुद्रायेदम् । मानस्तोके तनये मान आयौ मानो गोषु मानो अश्वेषु रीरिषः । वीरान्मानो रुद्रभामितोवधीर्हविष्मन्तस्सदमित्वा हवामहे स्वाहा रुद्रायेदम् ।

गायत्र्या विश्वामित्रस्सविता गायत्री पञ्चगव्यहोमे विनियोगः । तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात्स्वाहा । सवित्र इदं । ब्रह्मणा ते विश्वामित्रो ब्रह्मा त्रिष्टुप् पञ्चगव्यहोमे विनियोगः । ब्रह्मणा ते ब्रह्मयुजा युनज्मि हरी सखाया सधमाद आशु । स्थिरंरथं सुखमिन्द्राधितिष्ठन् प्रजानन्विद्वां उपाहिसोमं स्वाहा ब्रह्मण इदम् । व्याहृतीनां व्यस्तसमस्तानां विश्वामित्रगौतमात्रिभरद्वाजा ऋषयः अग्निवायुसूर्यप्रजापतयो देवताः गायत्र्युष्णिगनुष्टुप् बृहत्यश्छन्दांसि । पञ्चगव्यहोमे विनियोगः । भूःस्वाहा अग्नय इदं । भुवस्स्वाहा वायव इदं । स्व१ः स्वाहा सूर्यायेदं । ओं भूर्भुवस्व१ःस्वाहा । प्रजापतय इदम् । ततः स्विष्टकृद्धोमशेषं समापयेत् ॥

अथ पञ्चगव्यप्राशनम्

यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके । प्राशनं पञ्चगव्यस्य दहत्यग्निरिवेन्धनम् । त्रिः प्राश्याचामेत् ॥ कृच्छ्राचरणं कुर्यात् ॥

अथ कृच्छ्राचरणम्

कृच्छ्राचरणात्पूर्वं यानि कर्माणि तानि प्राच्याङ्गानि । उपरितनानि उदीच्याङ्गानि । उत्तरशालाहोमः । पूर्ववत्कृत्वा गोदाननान्दीश्राद्धादि पूर्ववत्कृत्वा दशदानानि कुर्यात् ॥

गोभूतिलहिरण्याज्यवासोधान्यगुडानि च ।
रौप्यं लवणमित्याहुर्दशदानान्यनुक्रमात् ॥

गोदानम्

यज्ञसाधनभूता या विश्वस्याघप्रणाशिनी ।
यज्ञरूपधरो देवः प्रीयतामनया गवा ॥

भूमिदानम्

सर्वसस्याश्रया भूमिः वराहेण समुद्धृता ।
अनन्तसस्यफलदा चातश्शान्तिं प्रयच्छ मे ॥

तिलदानम्

तिलाः पापहरा नित्यं विष्णोर्देहसमुद्भवाः ।
तिलदानादसह्यं मे पापं नाशय केशव ॥

हिरण्यदानम्

हिरण्यगर्भगर्भस्थं हेम बीजं विभावसोः ।
अनन्तपुण्यफलदमतश्शान्तिं प्रयच्छ मे ॥

आज्यदानम्

कामधेनोस्समुद्भूतं सर्वक्रतुषु संस्थितम् ।
देवानामाज्यमाहार अतश्शान्तिं प्रयच्छ मे ॥

वासः

शीतवातोष्णसन्त्राणं लज्जाया रक्षणं परम् ।
देहालङ्करणं वस्त्रमतश्शान्तिं प्रयच्छ मे ॥

धान्यदानम्

धन्यं करोति दातारमिहलोके परत्र च ।
प्राणिनां जीवनं धान्यमतश्शान्तिं प्रयच्छ मे ॥

गुडदानम्

इक्षुदण्डसमुद्भूतः गुडस्सर्वरसोद्भवः ।
अतस्तस्य प्रदानेन मम पापं व्यपोहतु ॥

रजतदानम्

शिवनेत्रोद्भवं रौप्यं पितॄणां च सदा प्रियम् ।
अतस्तस्य प्रदानेन मम पापं व्यपोहतु ॥

लवणदानम्

यस्मादन्नरसास्सर्वे नोत्कृष्टा लवणं विना ।
तस्मादस्य प्रदानेन मम पापं व्यपोहतु ॥

फलदानताम्बूलदानं कुर्यात् । कारयितुर्दक्षिणां विधायकादधिकं दद्यात् ॥ भूरिदानं

निबन्धनपूजा ब्राह्मणभोजनं शक्त्यनुसारेण। नामत्रयजपम्। यस्य स्मृत्येत्यादि ब्रह्मार्पणं इति प्रायश्चित्तपद्धतिः॥

श्रीरामार्पणं सर्वप्रायश्चित्तं समाप्तम्॥

अथ स्त्रीणां प्रायश्चित्तपद्धतिः

देशकालौ संकीर्त्य मदीयं पापजातं परिषत्सन्निधौ निवेदयितुकामा मलापकर्षस्नानं करिष्य इति संकल्प्य स्नात्वा पुण्याहं वाचयित्वा सभां गत्वा परिषद्दक्षिणां गृहीत्वा। परिषदं त्रिः प्रदक्षिणीकृत्य परिषद्दक्षिणां विधाय तदग्रे प्रणम्य विज्ञापयेत्॥

अमुकनक्षत्रे राशौ जातायाः अमुकनाम्न्याः मम जन्माभ्यासात् जन्मप्रभृति एतत्क्षण-पर्यन्तं बाल्यकौमारयौवनवार्धकेषु जाग्रत्स्वप्नसुषुप्त्यवस्थासु कामक्रोधलोभमोहमदमात्सर्यैः वाक्पाणि-पादपायूपस्थैः त्वक्चक्षुःश्रोत्रजिह्वाघ्राणैः मनोवाक्कायकर्मेन्द्रियव्यापारैः ज्ञानेन्द्रियव्यापारैश्च मया कृतानां इहजन्मनि महापातकचतुष्टयव्यतिरिक्तानां जन्मान्तरकृतमहापातकव्यतिरिक्तानां महा-पातकादिष्टरूपव्रतादेशिकरूपअतिपातकानां महापातकसमरूपपातकानां संकलीकरणानां मलिनी-करणानां अपात्रीकरणानां जातिभ्रंशकरणानां प्रकीर्णकानां नवानां नवविधानां ज्ञानतस्सकृत्कृतानां ज्ञानतोभ्यस्तानां अज्ञानतोभ्यस्तानां ज्ञानतोज्ञानतश्चात्यन्ताभ्यस्तानां निरन्तराभ्यस्तानां सर्वेषां पापानां स्वार्थक्रियापरत्वपरपुरुषसहवासअव्रतपरायणत्वब्राह्मणदूषणदेवादिदूषणात्मविक्रय-ग्रहणादिपुण्यकालेषु पुरुषसङ्गमअस्पृश्यद्रव्यस्पर्शनरजस्वलायां पुरुषसङ्गमभित्रस्त्रीद्रोहविश्वस्तविषदान-सपत्नीभर्त्सनपङ्क्तिभेदव्यञ्जनादिभेदप्रदानशिशुवधक्षुधार्तशिशोः स्तन्याप्रदानभर्त्रनुज्ञां विना उपवासादिकरणप्रोषिते भर्तरि कुङ्कुमचन्दनाद्यलङ्करणभर्तृश्वश्रूश्वशुरशुश्रूषाराहित्यतदभिवादनराहित्य-गृहद्रव्यनाशित्वतद्विक्रयत्वसदान्यगृहवाससदाभर्त्सन निष्ठुरभाषणअकारणक्रन्दनभर्तृवचनातिक्रमण-सदामलिनत्वबन्धुगृहगमनबन्धुसमीपे कौटिल्यवर्तनभर्तृताडनसदा अनृतभाषण सदा उरस्ताडन-भर्त्रनुज्ञां विना बन्धूनां धान्यधनादिदानभर्त्रनुज्ञां विना तीर्थयात्रागमनपरपुरुषाङ्गमर्दनसाभिलाष-संभाषणसाभिलाषाभिमर्शनसाभिलाषनिरीक्षणादीनां सर्वेषां पापानां प्रतिनिमित्तं प्रायश्चित्तं धर्म-शास्त्रोक्तप्रकारेण निश्चित्य मामनुगृहाण॥

विधवानां विज्ञापनप्रकारः

देशकालौ सङ्कीर्त्य मदीयं पापजातं परिषत्सन्निधौ निवेदयितुकामा मलापकर्षस्नानं करिष्य इति सङ्कल्प्य स्नात्वा पुण्याहं वाचयित्वा सभां गत्वा परिषद्दक्षिणां गृहीत्वा परिषदं त्रिः प्रदक्षिणीकृत्य परिषद्दक्षिणां निधाय तदग्रे प्रणम्य विज्ञापयेत्॥

अशेषे हे परिषन्मदीयां विज्ञापनामवधार्य मया समर्पितां इमां सौवर्णीं दक्षिणां यत्किञ्चिद्दक्षिणां यथोक्तदक्षिणामिव स्वीकृत्य अमुकनक्षत्रे अमुकगोत्रोद्भवाया अमुकनाम्न्याः मम जन्माभ्यासाज्जन्मप्रभृत्येतत्क्षणपर्यन्तं बाल्यकौमारयौवनवार्धकेषु जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनोवाक्काय-कर्मभिः मया कृतानां महापातकचतुष्टयव्यतिरिक्तानां महापातकानां समपातकानां समरूपपातकानां सङ्कलीकरणानां सर्वेषां पापानां अस्नानभोजनपर्वकालभोजन तांबूलचर्वणपर्युषितान्नभोजन एकवारभुक्तराहित्य एकादश्युपवासराहित्य उच्छिष्टभक्षणश्वश्रूश्वशुरतिरस्करणदुर्मरणप्रयत्नकरण-परोपकारनाशनतैलाभ्यङ्गकुलटास्त्रीसहवासडाम्भिकत्व उपवासदिने उपवासाकरणपरगृहेष्वन्नभक्षण-अकालभोजन दिवास्वाप आर्तवे परस्परस्पर्शन परस्परसम्भाषण अनृतभाषणरज्जुनिर्माणनख निकृन्तनभर्तृतिरस्कारकरण लक्षप्रदक्षिणाकरणलक्षपुष्पार्चनाकरणप्रदोषव्रताकरण शिवरात्रिव्रताकरण-सोमवारव्रताकरण नित्यशिवदर्शनाकरण जयन्तीरामनवम्यादिषु निराहाराकरण सेतुस्नानाकरण शिवविष्णुपुण्यक्षेत्रादिगमनराहित्य पञ्चाक्षरजपराहित्य शिवपूजाराहित्य रुद्राक्षधारणराहित्य तुला-कार्तिकमाघवैशाखस्नानराहित्य विभूतिधारणराहित्य ब्राह्मणविश्वासराहित्य वटतिन्दुकाश्वत्थादि-निषिद्धपत्रभोजनशूद्रशेषान्नभोजननरवाहनारोहण वृषभारोहण वृथाकृसरयावकपायसापूपभक्षण-चातुर्मास्यशाकव्रताकरणपुच्छैकादश्यकरणनिन्दितकर्मनिरीक्षण इन्द्रियानिग्रहत्वपरमर्मभेदन सदा-कलहकारित्व सदा क्रूरभाषण मूत्रपुरीषोत्सर्जने वस्त्रपरिवर्तनाकरण मृत्तिकाशौचपादप्रक्षाळना-चमनकरणराहित्यपुराणश्रवणराहित्य असत्कथाश्रवण अन्नविक्रयतण्डुलविक्रयपृथुकविक्रयधान्यविक्रय भक्ष्यादिविक्रयक्षीरविक्रयदधिविक्रय आज्यविक्रयनवनीतविक्रय तिष्ठन् जलपान तिष्ठन् मूत्रपुरीषो-त्सर्जनभर्तृमृत्यनन्तरं केशधारण आभरणादिधारण नीलवस्त्रधारण रक्तपीतपट्टवस्त्रधारण ग्रहणादि पुण्यकालेषु दानाद्यकरणपरपुरुषसहवासादीनां बहूनां बहुविधानां सर्वेषां पापानां प्रतिनिमित्तं पादकृच्छ्रं कर्तुमसमर्थायाः ममैकविधं सर्वप्रायश्चित्तं धर्मशास्त्रोक्तमार्गेण निश्चित्य मामनुगृहाण इति पुनः पुनः प्रणमेत् ॥

सर्वे धर्मविवेक्तारो गोप्तारस्सकला द्विजाः ।
मम देहस्य संशुद्धिं कुर्वन्तु द्विजसत्तमाः ।
मया कृतं महाघोरं ज्ञातमज्ञातकिल्बिषम् ॥

प्रसादः क्रियतां मह्यं शुभानुज्ञां प्रयच्छत ।
पूज्यैः कृतपवित्राहं भवेयं द्विजसत्तमैः ॥

परिषदपि विज्ञापनामाकर्ण्य दक्षिणां स्वीकृत्य धर्मशास्त्रं पर्यालोच्य एकविधं सर्वप्रायश्चित्तं विधायकान्प्रति वदेत् । विधायकेभ्यो दक्षिणां दद्यात् ॥

विधायकान्प्रति परिषद्वाक्यम्

हे विधायकाः अमुकगोत्रायाः अमुकनामधेयायाः जन्मप्रभृति एतत्क्षणपर्यन्तं बाल्ये वयसि यौवने कौमारे वार्धके च जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनोवाक्कायकर्मेन्द्रियव्यापारैः सम्भावितानां ज्ञानाज्ञानकृतानां सङ्कलीकरणानां मलिनीकरणानां अपात्रीकरणानां जातिभ्रंशकराणां प्रकीर्णकानां स्वार्थक्रियापरत्व परपुरुषसहवासादीनां सर्वेषां पापानां अपनोदकं षडब्दकृच्छ्रात्मकं प्राच्योदीच्याङ्ग-सहितं सर्वप्रायश्चित्तं भवति । एतत्साक्षात्कर्तुं मुख्यचर्यया अशक्यत्वात् षडब्दप्राजापत्य-कृच्छ्रप्रत्याम्नायभूतेन षडब्दसंख्याकेन कावेरीस्नानरूपेण आचरणीयः इत्येतन्निर्णीतं सर्वप्रायश्चित्तं सम्यग्विधाय सोपदिशेत् । एकं धर्मज्ञं अनुवादकं नियोजयेत् ॥

अनुवादकं प्रति विधायकवाक्यम्

हे अनुवादक विदुषामग्रेसर सदसि विहितं एकविधं शक्यप्रत्याम्नायरूपोक्तप्रायश्चित्तं अनुवादककुशल इदानीं अनया यजमानया विज्ञापितानां मध्यवर्तिनि काले संभावितानां जन्मान्तर-कृतमहापातकव्यतिरिक्तानां सर्वेषां पापानां अपनोदकं सर्वप्रायश्चित्तं षडब्दप्राजापत्यकृच्छ्रात्मकं भवतीति सर्वसभानिर्णयः । वयमप्येवमेव अशेषसभानिर्णीतं षडब्दप्राजापत्यकृच्छ्रात्मकं सर्व-प्रायश्चित्तं अस्यै यजमानायै उपदिशेति त्वां प्रेरयामः । त्वमपि तथैव उच्चैस्त्रिवारमनुवद ॥

यजमानां प्रति अनुवादकवाक्यम्

अमुकनामधेये अशेषपरिषत् त्वदीयां विज्ञापनां अवधार्य सर्वेषां पापानामपनोदकं षडब्दप्राजापत्यकृच्छ्रात्मकं प्रायश्चित्तमस्या उपदिशेति विधायकमुखेन प्रेषितवती अहमप्युपदिशामि हे यजमाने तव जन्माभ्यासाज्जन्मप्रभृत्येतत्क्षणपर्यन्तं मध्यवर्तिनि काले संभावितानां पापानां परिषत्सन्निधौ विज्ञापितेभ्यः महापातकादिष्टरूपपातकेभ्यः उपपातकेभ्यः संकलीकरणेभ्यः मलिनी-करणेभ्यः अपात्रीकरणेभ्यः जातिभ्रंशकरेभ्यः सर्वेभ्यः नवविधेभ्यः बहुभ्यः बहुविधेभ्यः सर्वेभ्यः पापेभ्यः मुक्ता भूयाः इति त्रिः । परिषदपि तथास्त्विति प्रतिब्रूयुः ॥

सूत्र ग्रन्थ

नारीणां वपनं नास्ति केशानां अग्रसंग्रयोः ।
महादोषेषु सर्वेषु छेदयेदंगुलित्रयम् ॥

सुवासिनीनां वपनं नास्ति । विधवायाः कार्यमेव । शालाहोमपञ्चगव्यहोमनान्दीवैष्णवश्राद्धादि अध्वर्युकृतेपि कृताकृतम् । पुरुषस्योक्तप्रायश्चित्ते स्त्रीणामर्धम् । विधायकानुवादकावपि कृताकृतम् । विधायकानुवादकानां अभावेपि स्वशक्तितः परिषदः अनुज्ञया कुर्यात् प्रायश्चित्तविधानं इति विज्ञानेश्वरः ॥

स्त्रीणां प्रायश्चित्तविधिस्समाप्तः ॥

श्रीरामार्पणमस्तु ॥